×

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. 1

Title BHAGAVANTA-BHASKARA.
(SAMAYA-MAYUKHA)

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 1 Subject: Dharmaśāstra Ritual

Title: Samay Mayukh.

Author: Nīlakantha Bhatt Scribe: —

Date of the work: c. 1640 A.D. Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.8" by 5" Extent: 89 folios. (No. 53 & 66 missing.)

Language: Sanskrit. Script: Devanagari.

Remarks: Folio no. 53 & 66 missing.

स०म० श्रीगणेशाय नमः॥ यो लीलया संततनुते त्रिविश्वं तत्पालयत्यात्मनि विश्वरूपे॥ लयं नयत्याशु च पूर्णरूपः शिवं तं न
मामि रविं भिमासो॥ १॥ श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं तंत्राणि बंधानपि सन्निबंधान॥ श्रीशंकरस्यात्मजनीलकंठस्ति
थ्यादिकृत्यं विवृणोति सम्यक्॥ २॥ प्रतारकैराहृतमत्र किंचिन्मया तु निर्मूलतया तदुक्तं। तां क्रनोक्ति तानोन हि तेन कावित्त
पुण्यहीनाप वितिर्न हीयते॥ ३॥ सपूलनिर्मूलमपि व्यवस्थां विनादृतं यद्विबुधस्य केरपि ना बीनोक्षघेसद्धतिगाप
रा स्यैर्भिषग्वरानुक्रमेगुरोस्समंततः॥ ४॥ संस्काराचारकालाः श्राद्धनीतिर्विवाददानेव॥ अत्रोत्सर्गः प्रतिष्ठाप्रायश्चित्तानि
शुद्धिशांती च॥ ५॥ ॥ ॥ ॥ ॥ तिथिर्द्विधा॥ ॥ पूर्णाखंडा च॥ ॥ आद्यास्कांदे॥ ॥ ॥ ॥ ॥
प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः। संपूर्णा इति विख्याता हरिवासरवर्जिताः॥ हरिवासर एकादशी॥ ... खंडा त
रं वक्ष्यते॥ तद्द्विधा खंडा॥ तस्याश्च द्वैधमाह पैठीनसिः॥ पक्षद्वये तिथिद्वयस्थिति पूर्वांतिथोत्तरां॥ त्रिमुहूर्त ... धं तिसा
मान्यो यं विधिः स्मृतः इति॥ अत्र पूर्वया तिथ्या उदयोत्तरमुत्तरया वोदयात्पूर्वं त्रिमुहूर्तया वेधो विद्धा ... कि वित्
निबंधकृतां तु सर्वेषां दिनमध्य एव पूर्वोत्तरतिथ्योस्त्रिमुहूर्तयोः प्रवेशे वेधो भिमतः च स्यमोराशिवरे ... हस्य विसुधर्मोत्तरादिवाक्यात्॥ स
र्वथा होरात्रद्वयगामिनी तिथिः संदिग्धत्वान्निर्णेया॥ सा च कर्मांगतया विहितेव न निषिद्धा॥ तथा च वृद्धगार्ग्यः॥ दि ... ः एकस्यां तिथौ तत्र
निषेधः कालमात्रक इति॥ यत्तु दक्षः॥ त्रिमुहूर्ता न कर्तव्या या तिथिः क्षयगामिनी। द्विमुहूर्तापि कर्तव्या या तिथिर्वृद्धिगा राम
१

स०म० ययोर्गिन्यामावरेन्नहूतं व्रती तिस्मतेश्चापेक्ष्यते कर्मकालस्पर्शो ... उभयोर्नोभयोः साम्येनैकदेश उभ
योरपि तेषु पक्षेषु निर्णयो निगमे॥ युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः। रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णि
मा॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं। एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमिति॥ युग्मं द्वितीया॥ अग्निस्तृती
या॥ युगं चतुर्थी॥ भूतं पंचमी॥ षट् षष्ठी॥ मुनिः सप्तमी॥ वसुरष्टमी॥ रंध्रं नवमी॥ रुद्र एकादशी॥ तिथ्योर्युग्मं द्वितीयातृती
यायुता तृतीया चतुर्थ्येति॥ एवं चतुर्थीपंचम्यादीनां युग्मानि॥ यत्तु षष्ठ्यष्टम्यमावास्याकृष्णपक्षे चतुर्दशी॥ एताः
परयुताः पूज्याः पराः पूर्वेण संयुता इति युग्मवाक्यं तदपि तस्य बाधकं वा॥ यत्तु प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युते
ति॥ यच्च चतुर्थीसंयुता या च सा तृतीया फलप्रदा॥ चतुर्थी च तृतीयायां महापुण्यफलप्रदेति तदेतद् द्विरुक्तं॥ अन्ययोश्च
पक्षभेदेन व्यवस्थोक्ता विष्णुधर्मोत्तरे॥ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्त
मितो रविरिति॥ कर्मकालव्याप्तिस्तु उपक्रमगा॥ यो यस्य विहितः कालः कर्मणस्तदुपक्रमे॥ विद्यमाना भवेदंगं नो
क्ति तोपक्रमे तातिति वचनात्॥ अत्र युग्मवाक्यं कृतानिर्णयो ... वेव एव कर्मतिथि॥ पित्र्ये तु पूर्वोक्तिपक्षेषु खर्वो दर्पस्त
था हिंसा त्रिविधं तिथिलक्षणं॥ खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी इति उशनावचनं सोनिर्णयः॥ खर्वः साम्य
दर्पो वृद्धिः हिंसा क्षयः॥ एते च खर्वादयः ... तिथिद्वयपेक्षया ... तिथेरेव ... विद्धा ... तिथेरिति तत्र राम
२

यच्चुद्दत्तः॥ त्रिमुहूर्त्तान्न कर्त्तव्या या तिथिः क्षयगामिनी। द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनीति॥ अत्रापि श
स्य पूर्वार्द्धं च यान त्रिमुहूर्त्तव्यापि द्विमुहूर्त्तव्यहतो व तात्पर्यं किंतु द्विमुहूर्त्तस्यानुकल्पत्वे। अत एव शिवरहस्ये॥ यांप्रा
प्यास्तंमुपैत्यर्कः सा चेत्स्यात् त्रिमुहूर्त्तगा॥ धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधा इति॥ तेन विष्णुधर्मे [illegible] दिते दैवतं
भानो पित्र्यं चास्तमिते रवौ॥ द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति द्विमुहूर्त्तव्याप्तितो किंत्वनुकल्प [illegible] उदिते भा
नो द्विमुहूर्त्तं दिवतं॥ अस्तमिते त्रिसांगतुमारवेऽह्नस्त्रिमुहूर्त्तं पित्र्यमित्यर्थः॥ अह्नः इत्यन्वयाद्दस्तमि गदेति [illegible] कर्मोति
कः॥ व्रतोपवासनियमे घटिकैकापि या भवेत्॥ उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके इत्यादीनि पाद्मादिवच [illegible]
नाधिकरतान्यायेन त्रिमुहूर्त्तविधमेव स्तुवंतीति माधवादयः॥ एकादशीपरा रात्रितु युक्तं॥ कासुचित्ति [illegible]
प्रयोजनको विधः स्कांदे॥ नागोद्धो दशनाडीभिर्दिक्भूपं वदशाभिस्तथा॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिं [illegible]
पंचमी। दिक् दशमी। भूतश्चतुर्दशी॥ ॥ तिथिवेधः॥ तत्र विहितातिथिर्विभक्तविभागेन षोढा॥ पूर्वेद्युरेवकर्मकालव्या
परेद्युरेवोभयोर्नोभयोरुभयोरंशेन तत्रापि साम्येन वैषम्येण वेति॥ तत्रान्यतरदिने कर्मकालव्याप्तौ सैव ग्राह्या॥ यो
यस्य विहितः कालस्तत्कालव्यापिनी तिथिः॥ तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति गार्ग्योक्तेः॥ अत एवाह
रात्रसाध्य उपवासादेर्याहोरात्रगा सैव ग्राह्या त्वात तदभावेन्यतरगा॥ दिवारात्रिव्रतं यच्च एकमेकतियोगतं॥ तस्यामुभ

तत्र वक्ष्यामः॥ तथा च निगमे॥ द्वितीयादिक युग्मानां पूज्यता नियमादिषु॥ एको द्दिष्टादिवष्ट्यादौ ह्रासवृद्ध्यादि वोद
नेति॥ अत्राद्यमादिपदं तिथ्यंतराणामुपादानार्थं। द्वितीयं सकलदैवकर्मणां॥ ततीयं पार्वणस्य। चतुर्थं वृद्ध्यादे
येषामित्यतद्गुणसंविज्ञान बहुव्रीहिणा सर्वदैवश्राद्धानां मुख्यत्वं द्विष्टा हस्यतिथ्यप्रयुक्तत्वेन तन्निरासायानुपयोगोति॥
वृद्धिपदस्य निमित्तकश्राद्धलक्षकं एवं समासमपस्य। ह्रासवृद्ध्यादिवो हनाख्वंदपादिवा क्वमित्यर्थः॥ पच्चुदेवलः॥ यां तिथिं
समनुप्राप्य उदयं याति भास्करः॥ सा तिथिः सकला ज्ञेया स्नानदानजपादिषु इति॥ पच्च स्कांदे। यां तिथिं समनुप्राप्य यात्य
स्तं पद्मिनीपतिः॥ सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु इति तत्पूर्वोत्तरवाक्याद्यत्समाधक्रानां प्रमसर्व [illegible]
दिवसांडपोद्धलकं॥ एतदपवादः स्कांदे। मन्वादौ च युगादौ वयरते वेदरूपधीः॥ व्यतीपाते विधृतौ च तत्कालव्यापिनी
क्रिया॥ अप्येवं वोदचीस्नानदेनधादनमे पुने॥ ज्ञातेव महहतरतेवि च तत्कालव्यापिनी तिथिरिति॥ विष्णु [illegible]
॥ अहःसामान्यतो विभागमाह व्यासः॥ मुहूर्त्तत्रितयं प्रातस्तावानेव तु संगवः॥ मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोपिता
दृशः॥ सायाह्नस्त्रिमुहूर्त्तः स्यात्सर्वकर्मबहिष्कृत इति॥ पूर्वाह्णमध्याह्नापराह्ण इति त्रेधा विभागस्येवक्षेत्र पूर्वाह्णः प्राह्ण
इति द्वेधा विभागस्यच पर्वनिर्णयादेउपयोगो वक्ष्यते॥ ॥ अथैकभक्तं॥ देवलः॥ दिनार्द्धसमयेतीते भुज्यते नियमेन
यत्॥ एकभक्तमिति प्रोक्तं न्यूनं ग्रासत्रयेण तु॥ दिनार्द्धोत्तरं सामान्यतो भुक्तः कालो मध्याह्ने नावधिर्वा॥ मध्याह्नव्या

व०मे०

पिनीयाह्या एकभक्तव्रते तिथिरिति बोधायनोक्तेः॥ अत्र पूर्वोक्तषट्पक्षेषु तत्तद्दिन एव कर्मकालव्याप्त्यभावे धिक
स्पर्शे वा तत्पूर्वैव तिथिर्माधवादयः॥ ॥अथ नक्तं॥ ॥व्यासः॥ त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तं गते सति॥ नक्तं
तत्र प्रकुर्वीत इति शास्त्रस्य निश्चयः॥ यत्तु सायं संध्यात्रिघटिका ह्यस्तादुपरि भास्वतः इति स्कांदोक्तं संध्यायां स्कांदे
येन चत्वारि मानि कर्माणि संध्यायां परिवर्जयेत्॥ आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति भोजनं निषिद्धं तद्राग
प्राप्तं न ये धर्मभक्तभोजनं। विधिस्पृष्टे निषेधानवकाशात्॥ एतेनपवादिता त्रिभोजननिषेधोप्यत्र प्रत्युक्तः॥ प्रदोषव्या
प्तमाविस्कांदे। प्रदोषव्यापिनी ग्राह्या दिवा नक्ते विधीते॥ आत्मनो द्विगुणच्छाया यदा मंदीभवति भास्करे नक्तकालस्तमित्या
हुर्न नक्तं निशि भोजनं॥ एवं ज्ञात्वा ततो विद्वान्सायाह्ने तु भुजिक्रियां॥ कुर्यान्नक्तव्रती नक्तफलं भवति निश्चितमिति॥ सो
रनक्ते॥ त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः॥ तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनं॥ स्मृत्यंतरे विशेषः॥ यतिश्च
विधवा चैव कुर्यात्तत्सदिवाकरं॥ सदिवाकरं तु तन्मोक्तमंतिकघटिकाद्वयमिति॥ ॥इति नक्तनिर्णयः॥ अथायाचितं॥
तद्याचितभोजनं निषिद्धरूपमयाचितं भोज्यमिति तद्रूपं वा। तस्य फलमुक्तं माधवीये स्मृत्यंतरे॥ अयाचिताशी मित
भुक् परोक्षि छिमवा भुज्यादिति अत्र विशेषवचनाभावादुपवासवन्निर्णय इति केचित्॥ तन्न। एकभक्तायाचितयोर्या
विंशद्घटिकाव्याप्तिः॥ साति अत्र विशेषे वचनाभावादुपवासवन्निर्णय इति केचित्॥ तन्न। एतत्प्रसंगाद्व्रतविषयविशे राम २

विदुष्यते। सत्यव्रतः कृत्स्नप्रातिपदा दिनमभवे दिनमध्यभाक्॥ सा वंद्यं व्रतानां स्यादारंभश्च समापनमिति॥ अथ हविष्य
मेले॥ दिनमध्ये यदा रात्रौ रात्रिमध्ये ह्यादिवा न त्वान्यथा। एकभक्तार्पि तु प्राहुरेवं पुरातनाः॥ व्रतखंडे अग्निपुराणे॥ व्री
हिषष्टिकमुद्गाश्च कलायाः सतिलं पयः॥ श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः॥ कूष्मांडालाबुवार्ताकि
पालक्यज्योत्स्निकास्त्यजेत्॥ चरुभैक्ष्यसक्तुकणाशाकं दधि घृतं मधु॥ श्यामाकशालिनीवारयावकं मूलतंडुलं
हविष्यव्रतनक्तादावग्निकार्यादिके हितं॥ मधुमांसं विहायान्यद्व्रते की॥ तितविहितामधुमद्य॥ छिद्रे गोपे तिशिचिक्का
व्यल्पायनः॥ हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः॥ माषकोद्रवगौरादीन्सर्वाभावेपि वर्जयेत्॥ भविष्योत्त
रे हैमंतिकं सिता स्विन्नं धान्यं मुद्गा यवास्तिलाः॥ कलायकंगुनीवारवास्तूकं हिलमोचिका॥ षष्टिका कालशाकं च मू
लकं केमुकेतरत्॥ कंदः सैंधवसामुद्रे लवणे गोमधुसर्पिषी॥ पयोऽनुद्धृतसारं च पनसाम्रहरीतकी॥ पिप्पली जीरकं चै
दनागरंगाकं तिंतिडी॥ कदली लवली धात्री फलान्यगुडमैक्षवं॥ अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते॥ सर्पिः
पयश्चान्नगव्यं अतैलपक्वमिति... हविष्याणामिव विशेषतां॥ हारीतः॥ पतितपाषंडिनास्तिकादिसंभाष
णानृताश्लीलादिकमुपवासादिषु वर्जनीयमिति कौर्मे॥ बहिर्ग्रामांत्यजान्सूतिपतितं वरजस्वलां॥ नस्पृशेन्नाभि
भाषेत नेक्षेत व्रतवासरे॥ व्रताधिकारे सुमंतुः॥ विहितस्याननुष्ठानं निंदितस्य च सेवनं निग्रहः॥ निषिद्धसेवनं नित्यं वर्जनी

स·म०

यं प्रयच्छन्नरः इति॥ विष्णुधर्मेपि॥ असकृज्जलपानाच्च दिवास्वापाच्च मैथुनात्॥ तांबूलचर्वणान्मांसं वर्जयेदुपवासरः इति॥ मांस
निषेधः पारणादिनेपि पारणेपि तद्व्रतं ज्ञेयमित्युक्तेः॥ ननु प्रधानदिने प्रसक्त्यभावात्॥ वर्जयित्वा पारणे मांसं व्रताहेप्येवं
सदित्युक्तेश्च॥ औषधरूपमपि मांसं व्रताहे वर्जयेदिति बोध्यं॥ देवलः॥ असकृज्जलपानाच्च सकृत्तांबूलचर्वणात्॥
उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥ अशक्तौ तु स एव॥ अत्यये चांबुपानेन नोपवासः प्रणश्यतीति॥ अत्यये
प्राणात्यये चेत्युद्भवसिद्धः॥ उपवासे तथा श्राद्धे न कुर्याद्दंतधावनं॥ दंतानां काष्ठसंयोगो हंति सप्त कुलानि वै इति॥ पि
हीनमिति॥ अलाभे वा निषिद्धे वा काष्ठानां दंतधावने॥ पर्णादिना विशुद्धेत जिह्वोल्लेखः सदैव च॥ व्यासः॥ [illegible]लाभे दं
तकाष्ठानां निषिद्धायां तथा तिथौ॥ अपां द्वादशगंडूषैर्विदध्याद्दंतधावनं॥ विष्णुरहस्ये॥ स्नात्वा लीपन गंधादिस्वाद
नं परिकीर्तनं॥ अन्नस्य वर्जयेत्सर्वं ग्रासानां चाभिकांक्षतां॥ गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं॥ व्रतस्थो वर्ज
येत्सर्वं यच्चान्यद्बलरागकृत्॥ मैथुनं चाष्टधांगं तथा च स्मरणं॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं॥ संकल्पो
ध्यवसायश्च क्रियानिर्वृत्तिरेव च॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः॥ देवलः॥ स्त्रीणां तु प्रेक्षणात्स्पर्शात्
ताभिः संकथनादपि॥ विपद्यते ब्रह्मचर्यं न दारेष्वृतुसंगमादिति॥ स्वदारेष्वृतुसंगमादित्यपि क्वचित्पाठः॥ विष्णु
धर्मोत्तरे॥ तज्जप्यजपनध्यानं तत्कथाश्रवणादिकं॥ तदर्चनं च तन्नामकीर्तनश्रवणादयः॥ उपवासकृतामेते गु रास ४

णाः प्रोक्ता मनीषिभिः॥ तच्च व्रतेनोपास्यदेवता व्रतदेवता वा॥ देवलः॥ ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनं॥
व्रते ष्वेतानि चत्वारि चरितव्यानि स्मृतिभिः॥ आमिषं मांसं॥ आमिषं इति पानीयं गोवर्जं क्षीरमामिषं॥ मसूरमामि
षं सस्यं फले जंबीरमामिषं॥ [illegible] भुक्तिकाचूर्णं आरनालं तथामिषमिति स्मृत्यंतरोक्तं वा॥ [illegible] द्रीतान्यव्रत
घ्नानि आपोमूलं फलं पयः॥ हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं॥ पयःपानादी नाम व्रतघ्नत्वं स्त्रीबालाद्यल्पं न पीडि
तविषयं॥ सर्वभूतभयं चैव [illegible]॥ अव्रतघ्नानि पञ्चैते सकृदेतानि शास्त्रतः॥ सर्वभूतभयं सर्वेभ्यो भूते
भ्यो भयं॥ हेमाद्रौ पाद्मे [illegible] तिलका॥ दृष्ट्वा कुमारी वाथरोमिरति॥ यदा मुद्रातदन्येन कारयेत्प[illegible]पामिति॥
मदनरत्नेप्येवं भविष्ये॥ पुत्रं [illegible] वरं कामभो हितं॥ जीवन्भवति [illegible] लोभतः भावाभिजा पुन[illegible]प्र
तो॥ क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदि॥ दिनत्रयं न भुंजीत मुंडनं शिरसोथवेति॥ प्रायश्चित्तं नरः [illegible]
नानुष्ठान[illegible]य [illegible] मिदं कृत्वा पुनर्व्रती भवेदिति वायुपुराणोक्तेः॥ तत्र प्रथमप्रतिपदमारभ्य क्रमेणास व
तिथीनां निर्णयस्तत्क्रमेणोच्यते॥ तत्रादौ प्रतिपन्निर्णीयते॥ तत्र प्रतिपद्दर्शकव्यापिनी शुक्लपक्षे पूर्वविद्धा
त्वात्प्रतिपदमावास्ययेति युग्मवाक्यात्॥ मदनरत्ने स्कंदपुराणेपि॥ प्रतिपत्संमुखी कार्या या भवेदापराह्णिकीति
॥दीपिकायां॥ शुक्लस्य प्रतिपत्तिथिः प्रथमतस्त्रेधा परा ह्रस्वेदिति॥ तदभावे तु क्रमाद्ध्वने॥ तदभावे तु साम्याह्नव्यापिनीप

ताः प्रोक्ता मनीषिभिः ॥ तद्रूपं देवोपास्यदेवता व्रतदेवता वा ॥ देवलः ॥ ब्रह्मचर्यमहिंसा च सत्यममांसमामिषवर्जनं ॥
व्रतेष्वेतानि चत्वारि कर्तव्यानी ह्यसूरिभिः ॥ आदिमिषं मांसं ॥ आमिषं इति पानीयं गोवर्जं क्षीरमामिषं ॥ मसूरमामि
षं सस्ये फले जंबीरमामिषं ... अभुक्तिकाचूर्णं आरनालं तथामिषमिति स्मृत्यंतरोक्तं वा पापं ॥ अष्टौ तान्यव्रत
घ्नानि आपो मूलं फलं पयः ॥ हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं पयःपानादीनामव्रतघ्नत्वं स्त्रीबालाद्यशक्तपीड़ि
तविषयं ॥ सर्वभूतभयं वैद्यप्रमादो गुरुशासनं ॥ अव्रतघ्नानि पठ्यंते सकृदेतानि शास्त्रतः ॥ सर्वभूतभयं सर्वेभ्योऽभ्यते
भ्योऽभयं ॥ हेमाद्रौ पाद्मे ॥ ... तिलिका रिक्षकुमारी वाथवा ... निति ॥ यदा भुक्तं तदन्येन कारयेत्प्रयतः ... पमिति ॥
मदनरत्ने ब्रह्मलिंगः ॥ पूर्वं ... वरे कामसमोहितः ॥ जीवन्भवति चांडालो मृतः श्वा चाभिजायते पुत्रे ... श्र
तो ॥ क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदीति ॥ दिनत्रयं न भुंजीत मुंडनं शिरसोऽथवेति ॥ प्रायश्चित्तं ॥ नरमतितो
तानुष्ठानका ... प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेदिति वा पुराणोक्ते ॥ तत्र प्रथमप्रतिपदमारभ्य क्रमेणास्य व
तिथीनां निर्णयस्तत्कृत्यं चोच्यते ॥ ॥ तत्रादौ प्रतिपन्निर्णीयते ॥ तत्र प्रतिपदपराह्णव्यापिनी शुक्लपक्षे पूर्वीया
त्वात् ॥ प्रतिपदमावास्येति युग्मवाक्यात् ॥ मदनरत्ने स्कंदपुराणे ॥ प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी इति
॥ दीपिकायां ॥ शुक्लस्या प्रतिपत्तिथिः प्रथमतस्तिथ्या पराह्णे भवेदिति ॥ तदभावे तु क्रमाध्रुवेन ॥ तदभावे तु सायाह्नव्यापिनीप

सर्वप्रथमेऽहनि शुक्लपक्षे समग्रं तु तदा सूर्योदये यवतीति ॥ दिनद्वये उदयव्याप्त्या व्याप्तौ वा पूर्वैवा पूर्वोक्तिवद्बहुव
चनप्रामाण्यात् ॥ तत्र तैलाभ्यंगः ... सैव च वत्सरादौ वसंतादौ बलिराज्ये तथैव च ॥ तैलाभ्यंगमकुर्वाणो नरकं प्र
तिपद्यते इति ॥ अत्र ... आदि ... मुहूर्त ज्योतिःशास्त्रे ॥ शाकवत्सरभूपमंत्रिरसाधिपधान्येश्वरमेघपतीनां ॥ फ
लं ... भुक्त्वा ... हृष्टचित्ते ॥ चैत्रस्यामलमासत्वे तैलाभ्यंगशकप्रवृत्यादि शुक्ल ए
व कार्यं ... सर्वस्तयोः प्रवृत्तिरिति ॥ तथापि षष्ट्यां तु दिवसैर्मासः कथितो बादरायणैः ॥ पूर्वमर्द्ध
परित्यज्य कर्तव्या चोत्तरे क्रियेति वचनेन पूर्वमासस्य कृत्यस्योत्तरमासे कर्तव्यत्वाभिधानात् ॥ नवरात्रोत्सवन
चम्पादिवत् ॥ तथात्र विशेषो भविष्ये ॥ अतीते फाल्गुने मासि प्राप्ते चैत्र महोत्सवे ॥ पुण्येऽह्नि विप्रकथिते प्रपादा
न समारभेत् ॥ तस्मात् ... जति विद्वान्मंत्रेणानेन मानवः ॥ प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ॥ अस्याः प्र
दानात्पितरस्तृप्यंतु हि पितामहाः ॥ अनिवार्यं ततो देयं जलं मासचतुष्टयं ॥ प्रपां दातुमशक्तो न विशेषाद्धर्मी
... प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः ॥ ब्राह्मणस्य गृहे देयः शीतामलजलैर्भृतः ॥ एष धर्मघटो दत्तो
ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्सकला मम संतु मनोरथाः ॥ अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति ॥ प्र
पादानफलं सोऽपि प्राप्नोति ह्यसंशयः इति ... प्रतिपदि दश ... ॥ काशीखंडे ... मासि सिते पक्षे

स्म० अथ प्रतिपदं निर्णयः॥ दर्शाश्वमेधिकेला त्वामुच्यते सर्वपातकैः। एवं सर्वासु तिथिषु क्रमस्तापी नरोत्तमः। आश्वयुक्
दे दशमी प्रतिजन्माघमुत्सृजेदिति॥ आश्विनशुक्लप्रतिपदि नवरात्रारंभः॥ तदुक्तं हेमाद्रौ धौम्येन॥ आश्विनेमा
सि शुक्ले तु कर्तव्यं नवरात्रकं॥ प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत्॥ अत्र पूर्वाह्णव्यापिनी ग्राह्या। आश्वि
नस्य सिते पक्षे नवरात्रमुपोषितः॥ सुस्नातस्तिलतैलेन पूर्वाह्णे पूजयेच्छिवामिति देवीपुराणात्तस्य कर्मकालतो
क्तेः। कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः इत्यनेन कर्मकालव्यापिन्यामेव कर्मकर्तव्यत्वोक्तेः॥ नवरात्रोप
वासानुरोधेन निर्णयः। तस्या नवरात्रमुपोषितः पूजयेदित्यादि देवीपुराणादौ नवरात्रनिर्णयं तत्र समानीत्या दिवत्प
त्तिसंस्कारत्वेन पूजांगत्वावगमात्॥ अतः प्रधानभूतपूजाकालपूर्वाह्णव्यापित्वेनैव निर्णयः॥ पूजायास्तु प्राधान्यफ
लसंबंधात्॥ सवत्सकादे आश्विने मासि मेघांते महिषासुरमर्दिनी॥ देवी संपूजिता येन दात्रे चाष्टमीषु वाक्यार्थे इति वि
विधेर्भोगैर्देवलोके सुदुर्लभे॥ नाधयो व्याधयस्तेषां न च शत्रुभयं भवेदिति॥ पद्मे देवीपुराणे॥ शरत्काले महापूजा
क्रियते या च वार्षिकी॥ सा कार्योदयगामिन्यां नतिथ्यस्तत्र युग्मतेति॥ तत्रोदयगामित्वमपि प्रायः पूर्वाह्णव्यापि
त्वएव भवति। युग्मतायुग्मवाक्यानुरोधेन निर्णय इत्यर्थः॥ वार्षिकीत्यनेन संवत्सरस्यादौ चैत्रशुक्लप्रतिपद्युग्म
क्रम्यान वम्यंता पूजाभिधीयते॥ ततश्च शरद्वसंतयोस्तुल्य एव दुर्गोत्सवः कार्यः। यानि तु। योमां पूजयते नित्यं राम ६

द्वितीयादिगुणान्विता॥ प्रतिपच्छारदे ना त्वासोभ्युतेसुखमव्ययं॥ यदि कूर्पस्मा युक्तप्रतिपत्स्थापनं मम। तस्य शाप
युतं दत्वा भस्मशेषं करोम्यहं॥ आयहा कुरुते यस्तु कलशस्थापनं मम। तस्य संपद्विनाशः स्यान्नेपवः पुत्रो विनश्यति॥ न
शानदर्श कलश्यापुक्ता प्रतिपच्चंडिकार्चने॥ उदये द्विमुहूर्ताथिपाल्या सोदयगामिनी तिथिः वाश्वयुजि मासे तु प्रतिप
द्रुद्रयान्विता॥ शुद्धममार्चनं तस्यां शतपत्र फलप्रदमित्येमा योगनिषेधकानि। या निवा द्वितीयाशेषसंयुक्ता प्रति
पच्चंडिकार्चने॥ मोहाद्यो पद्देशाद्यान्कतं पुत्रविनाशकं॥ आरंभेन वरात्रस्य द्वितीयात्रुटिसंयुता॥ नकेवलं तिथिं हं
तिविभात्यां पुत्रसंपदमित्यादीनि द्वितीयायोगनिषेधकानि तान्युभयविधानमन्यपि सर्वाणि निर्मूलानि। सम्मूलत्वे
पि परस्परं सप्रतिपक्षत्वाद नित्यायिकानि॥ चंद्रप्रकाशे॥ प्रातरावाहयेद्देवी प्रातरेव प्रवेशयेत्॥ प्रातः प्रातश्च स
पूज्य प्रातरेव विसर्जयेदित्युक्तेः॥ सति संभवे प्रतिपद आद्या नाडी षोडशके त्यक्त्वा कलशस्थापयेत्॥ आद्याः षोडश
नाडीस्त्यक्त्वा कलशस्थापयः कुरुते नरः॥ कलशस्थापनं तत्र त्वरिष्टं जायते ध्रुवमिति देवीपुराणवचनात्॥ कलशस्थापने वैध
ति चित्रादि योगनिषेधकानि वचनानि निर्मूलानि। तथा भद्रायुतापि प्रतिपत्तुलभ्यते विरुद्धयोगे रत्ति संगवासंतास
ती॥ से वा पराह्णे विबुधैर्विधेया स्त्रीपुत्रराज्यादिविवृद्धिहेतुरिति॥ कलशस्थापनं तु दिवैव कार्यं नरात्रौ॥ तदुक्तं मात्स्ये।
नरात्रौ स्थापनं कार्यं न च कुंभाभिषेचनमिति॥ अत्र त्रिरात्रमप्युक्तं हेमाद्रौ धौम्येन। त्रिरात्रं वापि कर्तव्यं सप्तम्यादि य

स०भ० धात्क्रममिति॥ देवीपुराणे॥ कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदिकां॥ अयाचीत्वथ वैकाशी नक्ताशी वाथ वायुदः॥
प्रातःस्नायी जितद्वंद्वस्त्रिकालं शिवपूजकः॥ जपहोमसमायुक्तः कन्यकां भोजयेन्मुदा॥ शिवश्च शिवा च शिवोत
योः पूजकः। नंदा च प्रतिपद्देवा प्रथमोपस्थितत्वात्॥ तत्र प्रतिपदि पूर्वाह्णे तिलतैलेन स्नात्वा व्ययजमानो गता
पतिं संपूज्य देशकालौ निर्दिश्य नवमीपर्यंतमुपवासाद्यन्यतमनियमोपेतो दुर्गापूजनममुकफलकामः
करिष्य इति संकल्पयेत्। ततः कदलीस्तंभवस्त्रादिमंडिते गृहे चतुरस्रां चतुर्हस्तां वेदिं कोपरि सर्वतोभद्रादि
मंडलं विधाय तत्र महीद्यौरित्यादि वरुणपूजांतं कलशं संस्थापयेत्॥ सौवर्णादिप्रतिमापूजार्थं॥ पूज्या मंडलकु
मस्थिति देवीपुराणात्॥ मन्मयादिकानु कलशस्य पश्चात्संस्थाप्य॥ विदिक्कोणेषु पि चत्वारः कलशाः स्था
प्याः॥ चतुरः कलशान्यस्तु दद्याद्द्विजगृहे नरः॥ चतुःसमुद्रवलयां स तु भुंक्ते वसुंधरामिति विष्णुधर्मोत्तरात्॥ प्रति
मा च हेममौद्रिमयी॥ देवीपुराणे॥ हेमरजतमृच्छा तु शैलचित्रार्पिता पि वा॥ वृक्षमूले चितां देवी सर्वकामफलप्र
दा॥ मन्मयीं प्रतिमां कृत्वा बिल्वे वा पत्तु पूजयेत॥ आत्मवित्तानुसारेण तासलभे मौलिकं फलमिति॥ प्रतिमालक्ष
णं मत्स्यपुराणे॥ जटाजूटसमायुक्तामर्द्धेंदुकृतलक्षणां॥ लोचनत्रयसंयुक्तां पद्मेंदुसदृशाननां॥ अतसीपुष्प
वर्णाभां सुप्रतिष्ठां सुलोचनां॥ नवयौवनसंपन्नां सर्वाभरणभूषितां॥ सुचारुवदनां तद्वत्पीनोन्नतपयोधरां॥ राम ७

त्रिभंगस्थानसंस्थानां महिषासुरमर्दिनी॥ त्रिशूलं दक्षिणे दद्यात्खड्गं चक्रं क्रमादधः॥ तीक्ष्णबाणं तथा शक्तिं वाम
तोऽपि निबोधत॥ खेटकं पूर्णचापं च पाशमंकुशमूर्ध्वजं॥ घंटां वा परशुं वापि वामतः संनिवेशयेत्॥ अधस्तान्महिषं त
द्वच्छिरस्कं प्रदर्शयेत्॥ शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनं॥ हृदि शूलेन निर्भिन्नं निर्यदंत्रविभूषितं॥ रक्तरक्तीकृ
तांगं च रक्तविस्फारितेक्षणं॥ वेष्टितं नागपाशेन भ्रुकुटीभीषणाननं॥ सपाशवामहस्तेन धृतकेशं च दुर्गया॥ वम
द्रुधिरवक्त्रं च देव्याः सिंहं प्रदर्शयेत्॥ देव्यास्तु दक्षिणं पादं समं सिंहोपरि स्थितं॥ किंचिदूर्ध्वं तथा वामं अंगुष्ठं महि
षोपरि॥ स्तूयमानं च तद्रूपममरैः संनिवेशयेदिति॥ ध्यानमप्येवं॥ एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा॥ आवाहयाम्य
हं देवि सर्वकामार्थसिद्धये॥ अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु॥ रक्षां कुरु सदा भद्रे विश्वेश्वरि नमोऽस्तु ते इति
आवाहनं॥ भगवति दुर्गे इहागच्छ इह तिष्ठ इह संनिधेहि इह स्थिरा भव सुप्रसन्ना भव इत्यादि पठित्वा पूजादि मंत्र श्रुकृत्पा
देव्याश्च मंत्रैस्तोत्र निधाय जयंती मंगला काली भद्रकाली कपालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥
अनेनैव तु मंत्रेण जपहोमादि कारयेत्॥ इति देवीपुराणोक्तः॥ तल्लिंगैः पूजयेन्मंत्रैः सर्वदेवान्समाहितः इत्याग्नेयपु
राणाद्वैदिक आगमिको वा॥ नाम्ना सर्वं समापयेदिति साधारणवाक्याल्लेखावादिचतुर्थ्यंतनमोंतनाममंत्रो वा
॥ कांदे तु दुर्गमे दुस्तरे कार्ये भव दुःखविनाशिनी॥ पूजयामि सदा भक्त्या दुर्गे दुर्गार्तिनाशिनी॥ अनेनैव तु मंत्रेण जप

सप्त·

होमादिकारयेदित्यर्थः॥ अत्र चामरादिभी राजोपचारैः पूजा॥ तदंते प्रणम्य देवीं प्रार्थयेदनेन मंत्रेण॥ महिषघ्नि म
हामाये चामुंडे मुंडमालिनि॥ द्रव्यमारोग्यविजयं देहि देवि नमः सदा॥ भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि॥
देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा॥ सर्वमंगलमंगल्ये शिवे सर्वार्थसाधके॥ शरण्ये त्र्यंबके गौरि नारायणि नमो
स्तु ते॥ रूपं देहि यशो देहि भगं भगवति देहि मे॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ इतीततो दुर्गामंत्रैर्वै
दिकमागमिकं वा जपेत्॥ दुर्गाग्रतो जपेन्मंत्रमेकचित्तः समाहित इति॥ देवीपुराणात्॥ पद्मामाहात्म्यं भगव
त्यास्तु पुराणादिषु कीर्तनं॥ पठेच्छृणुयाद्वापि सर्वकामसमृद्धये॥ तथा॥ एकोत्तराभिवृद्ध्या तु नवमीयावदेव तु॥
चंडीपाठं जपेद्विद्वाञ्जापयेद्वा विधानतः॥ वाराहीतंत्रे॥ संकल्पितं स्तोत्रपाठसंख्यां कृत्वा पठेत्सुधीः॥ तत्रैव॥ चंडीपा
ठफलं देवि शृणुष्व गदतो मम॥ एकावृत्त्यादिपाठानां यथावत्कथयामि ते॥ संकल्पपूर्वकं स्तं प्रमन्यस्यांगे सुमन
सकृत॥ पाठाद्बलिप्रदानाद्वसिद्धिमाप्नोति मानवः॥ उपसर्गोपशांत्यर्थं त्रिरावृत्तं पठेन्नरः॥ ग्रहोपशांतौ कर्तव्य
पंचावृत्तं वरानने॥ महाभये समुत्पन्ने सप्तावृत्तं समुच्चयेत्॥ नवावृत्त्याग्निविष्ट्यातिवाजपेयफलं लभेत्॥ राज
वश्याय भूत्ये च रुद्रावृत्तमुदीरयेत्॥ अर्कावृत्ते कामप्राप्तिः सिद्धिर्वैरिहानिश्च जायते॥ मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्री
वश्यतामियात्॥ सोर्ध्वं पंचदशावृत्त्या श्रियमाप्नोति मानवः॥ कलावृत्त्या पुत्रपौत्रधनधान्यागमं किं विदुः॥ राज्ञो

राम
८

भीतिविमोक्षाय वैरस्योच्चाटनाय च॥ कुर्यात्सप्तदशावृत्तं तदाष्टादशकं प्रिये॥ महारत्नविमोक्षाय विंशावृत्तं
पठेत्सुधीः॥ पंचविंशावर्तनात्तु भवेद्बंधविमोक्षणं॥ संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा॥ जातिध्वंसे कु
लोच्छेदे आयुषो नाश आगते॥ वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये॥ तथैव त्रिविधोत्पाते तथा चैवातिपा
तके॥ कुर्याद्यत्नाच्छतावृत्तं ततः संपद्यते शुभं॥ श्रियो वृद्धिः शतावृत्त्याद्राज्यवृद्धिस्तथा परा॥ मनसा चिंतितं देवि
सिद्ध्येदष्टोत्तराच्छतात्॥ शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते॥ सहस्रावर्तिना लक्ष्मीरावृणोति स्वयं स्थि
रा॥ भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात्॥ यथाश्वमेधः क्रतूनां देवानां च यथा हरिः॥ स्तवानामपि
सर्वेषां तथा सप्तशतीस्तवः॥ अथवा बहुनोक्तेन किमेतेन वरानने। चंड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यंति
सिद्धय इति॥ पाठश्च नारायणादीन्नमस्कृत्य कार्यः॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं॥ देवीं सरस्वतीं
व्यासं ततो जयमुदीरयेत् इति वचनात्॥ जयशब्दार्थश्च भविष्यपुराणे॥ अष्टादशपुराणानि रामस्य चरितं त
था॥ विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत॥ कार्ष्णं च पंचमो वेदो यन्महाभारतं स्मृतं॥ शैवाश्च धर्मराजेंद्र मा
नवोक्ता महीपते॥ जयेति नाम एतेषां प्रवदंति मनीषिण इति॥ पाठप्रकारश्च मात्स्ये॥ प्रणवं चादितो दत्त्वा
स्तोत्रं वा संहितां जपेत्॥ अंते च प्रणवं दद्यादन्यथा विफलं भवेत्॥ शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः॥ नकार्या

स०म० सकृन्मनसा कार्यं स्तोत्रं [illegible]वनं ॥ आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः ॥ हस्तसंस्थापनादेव यस्मादल्पफ
लं भवेत् ॥ स्वयं च लिखितं यच्च शूद्रेणालिखितं च यत् ॥ ब्राह्मणेनालिखितं तच्चापि विफलं भवेत् ॥ कतीने
ख्वकः तदुपजीवी तथैव ॥ ऋत्विजं द्वादि कन्यस्य पठेत्स्तोत्रं विवक्षताः ॥ संकल्पिते स्तोत्रपाठे संख्यां कृत्वा प
ठेत्सुधीः ॥ अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ॥ कृते विरामे मध्ये तु अध्यायादिं पठेत्पुनरिति ॥ अत्र वाचकब्रा
ह्मणो देवकार्ये ॥ ब्राह्मणं वाचकं विंद्यान्नान्यवर्णजमादरात् ॥ अन्यवर्णाद्ब्राह्मणेतरवाचकान्तरकं ब्रजेदिति
भविष्यपुराणात् ॥ यद्यपि देवीपुराणे जपपूजादिवद्धोमोपि प्रत्यहमुक्तस्तथाप्यष्टम्यां नवम्यां वा कार्यः ॥ ब्र
ह्मपुराणे ॥ तत्राष्टम्यां भद्रकाली त्क पक्रम्य होमे श्रीं ह्लतान्तर्यतो रिपयमीकल्पमध्ये पाठात् ॥ नवम्यां बलि
दानं च कर्तव्यं वै यथाविधि ॥ जपं होमं च विधिवत्कुर्यात्तत्र विधिवत्कुर्यात्तत्र विभूतये इति कालिकापुराणा
त् ॥ शिवावाराह्य ॥ बलिदानमष्टमीनवम्योरेव ॥ पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् इति कालिका
पुराणात् अत्र यद्यपि विशेषपरिग्रहीतकालिकापुराणादिषु मेघस्वगात्ररुधिरं परं प्रदातादिकमुक्तं तथापि ब्रा
ह्मणस्य न भवति ॥ मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥ स्वगात्ररुधिरं दत्वा ब्रह्महत्यामवाप्नुयादिति का
लिकापुराणे निषिद्धत्वात् ॥ सात्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैरित्येतत्प्रकारकसात्विकपूजा यामभवत् राम ९

नादिषु ब्राह्मणाधिकारिकतायां एवउक्ते ॥ पशुबलिदानस्य तु विजयार्थं नृपोत्तम इति राजपुरस्कारेणोव विहितत्वा
त् ॥ अतो माषभक्तादिनानेन बलिदानं कार्यं माषकुल्माषमांसाद्यैर्देयो दितु बलिर्निशि कूष्माण्डमिक्षुदंडं च
द्यमासवमेव च ॥ एते बलिसमास्तेषां तृप्तौ छागसमाः स्मृता इति कालिकापुराणात् ॥ ॥ अथ कुमारीपूजा देवीपुराणे ब्र
ह्मोवाच ॥ ॥ न तथा तुष्यते शक्र होमदानजपादिना ॥ कुमारीपूजनेनात्र यथा देवी प्रसीदति ॥ अत्र नवरात्रेऽष्
टाष्टमीचतुर्दशीषु नवम्यां च विशेषत इत्यादि ॥ प्रसंगादन्यत्रापि विधानं कुमारीपूजने विशेषो मदनरत्ने स्कांदे
॥ एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च ॥ द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं च वा ॥ एकवर्षा तु या कन्या पूजार्थे तां विव
र्जयेत् ॥ गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥ द्विवर्षकन्यामारभ्य दशवर्षावधि क्रमात् ॥ यथोक्तालाभे तु
देवीपुराणे विवाहानंतरं कन्यात्वमुपजायते ॥ तावत्संपूज्यते कन्या यावत्पुष्पं न दृश्यते इति ॥ पूजामंत्रस्तु स्कांदे
मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं ॥ जगत्पूज्ये जगद्वन्द्ये सर्वश
क्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते ॥ एवमभ्यर्चनं कुर्यात्कुमारीणां प्रयत्नतः ॥ कंचुकैश्चैव
वस्त्रैश्च गंधपुष्पाक्षतादिभिः ॥ नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः ॥ अत्र पूज्यकन्यास्वरूपमुक्तं तंत्रे
वा हीनाधिकांगीं कुष्ठीं विनाशिं कुलसंभवां ॥ ग्रंथिस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां ॥ जात्यंधां केकरां काणां कु

समं० रूपं तनुरोमशां ॥ संत्यजेद्दोषिणीं तीक्ष्णां दासीगर्भसमुद्भवा इति देवीपुराणात् ॥ ज्योतिःशास्त्रे सप्तम्यां बिल्वशाखा
पूजनीका ॥ आश्विनस्य सिते पक्षे सुमुहूर्तेन सप्तमी । तस्यां वपत्रिकापूज्या कर्तव्यानवनायके ॥ प्रशस्तं सफलाबिल्व
शाखामाहृत्य प्रजपेद् इति । बोधनप्रकारान् तकालान्तेगे । कन्यायां कृष्णपक्षेतु प्रजपित्वार्द्रमेदिवानवम्यां बो
धयेद् देवीं महाविभवविस्तरैः ॥ भविष्ये षष्ठ्यां बिल्वतरोबोधं सायंसंध्यासु कारयेत् ॥ देवीपुराणे । ज्येष्ठानक्ष
त्रयुक्तायां षष्ठ्यां बिल्वाभिमंत्रणं ॥ बिल्ववृक्षाय नम इति बिल्वतरुं संपूज्य । बिल्ववृक्षे जपंतीष्योत्पादि दु
र्गे इहागच्छ स्यादिना वदुर्गामावाह्य पूजयित्वा गीतवाद्यघोषपुरःसरं देवीं बोधयेत् ॥ मंत्रस्तु ॥ रावणस्य वधा
र्थाय रामस्यानुग्रहाय च ॥ अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥ इषे मासि सिते पक्षे नवम्यामार्द्रयो
गतः ॥ श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहं ॥ षष्ठ्यां तु इष इत्यादेः स्थाने ॥ अहमप्याश्विने षष्ठ्यां सायाह्ने बो
धयामि त इति । ततो बिल्वतरोरामंत्रणं ॥ मंत्रस्तु ॥ मेरुमंदरकैलासहिमवच्छिखरे गिरौ ॥ जातः श्रीफलवृक्षत्वं
अंबिकायाः सदा प्रियः ॥ श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ॥ नेतव्योसि मया वत्स पूज्यो दुर्गास्वरूपत इति
अपरेद्युः पुनरपि संपूज्य कृतांजलिः प्रसादयेत् ॥ बिल्ववृक्ष महाभाग सदा त्वं शंकरप्रिय । गृहीत्वा तव शाखां तु राम
दुर्गापूजां करोम्यहं ॥ शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया प्रभो इति । ततः फलयुतामपराजितदिग्गतामेकां शाखां छि १०

द्ये छिन्नस्यानेन मंत्रेण ॥ ॐ विन्नु छिंधि फट् ॐ हूं स्वाहेति मंत्रः ॥ ततः शाखां गृहे आनीय बिल्वशाखायै नम इति
पूजयित्वा बिल्वशाखायां मृन्मयप्रतिमायां वा देवीमावाह्य पुरःसरं पूजयित्वा माषभक्तादि बलिं दत्वा दोला
दिना शाखाप्रतिमां च पूजागृहे द्वारदेशे स्थापयित्वा पूजागृहस्थानि भूतानि भूतेभ्यो नम इति गंधादिभिः संपू
ज्य भूताः प्रेताः पिशाचाश्च ये वसंत्यत्र भूतले । ते गृह्णंतु मयोद्दत्तो बलिरेष प्रसाधितः ॥ पूजिता गंधपुष्पाद्यैर्ब
लिभिस्तर्पितास्तथा ॥ देशादस्माद्विनिःसृत्य पूजां पश्यंतु मत्कृतां ॥ भूतेभ्य एष माषभक्तबलिर्नम इति बलिं
दत्वा अपसर्पंतु ये भूता ये भूता भूमिपालकाः ॥ भूतानामविरोधेन पूजाकर्म करोम्यहं फडिति तानपसारयेत् ॥
स्थिते पुनस्तत्र भूतेषु नैवेद्यं मंडलं तथा ॥ विलुंपंति महालुब्धा नवं [illegible] देवताः ॥ तस्माद्यत्नेन कर्तव्यं भूता
नामपसारणमिति कालिकापुराणात् ॥ सर्षपान् दीक्षावकिरेत् ततः पुनः शाखायां प्रतिमायां वा देवीं संपूज्य गीत
वाद्यादिपुरःसरं पूजागृहं प्रवेशयन् आरोपितासि दुर्गे त्वं मन्मये श्रीफलेपि च ॥ स्थिरा नितांतं भूत्वा मे गृहे त्वं का
मदा भव इति पूजागृहे स्थापयेत् ॥ ततः प्राणप्रतिष्ठां कृत्वा आवाहयाम्यहं देवीं मन्मये श्रीफले तथा ॥ कैला
लाद्विंध्यशिखराद्वा विविध्याद्रे हिमपर्वतात् ॥ आगत्य बिल्वशाखायां चंडिके कुरु सन्निधिं ॥ भगवति दुर्गे इहागच्छे
त्यनयावाह्य ॥ स्थापितासि मया देवि श्रीफले मन्मयेपि च ॥ आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते ॥

सम भगवति दुर्गे रहितिष्ठेतिस्थापयित्वा दुर्गे दुर्गे स्वरूपासि सुरतेजो महाबले ॥ सदानंदकरे देवि प्रसीद मम सिद्धये ॥
एह्येहि भगवत्यंब शत्रुक्षयजयप्रदे ॥ भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते ॥ पल्लवैश्च फलोपेतैः पु
ष्पैश्च सुमनोहरैः ॥ पल्लवैः संस्थिते देवि पूजयेत्वां प्रसीद मे ॥ दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय ॥ पञ्चभि
रागच्छ हारपल्लवयोगिनीकोटिभिः सह इति कृतांजलिः पठेत ॥ ततो जयंतीत्यादि दुर्गायै नमः ॥ इदं पाद्यं पुष्पग
धाक्षतकुंकुमदधिदूर्वाकुशतिलबिल्वपत्रसहितजलेनार्घ्यमाचमनीयं पंचामृतस्नानीयं पुनराचमनी
यं वस्त्रं पुनराचमनीयानुलेपनानि दत्वा ॐ दुर्गायै नमः इति पुष्पांजलित्रयं दद्यात ॥ ततश्रमतोऽह्नं वंश्री
वत्सोद्भवं शंकरस्य सदा प्रियं ॥ बिल्वपत्रं प्रदास्यामि पवित्रं ते सुरेश्वरि इति बिल्वपत्रं ब्रह्मविष्णुशिवादीनां द्रोण
पुष्पं सदा प्रियं ॥ तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये इति द्रोणपुष्पं च निवेद्य जयंतीत्यादिना पुष्पं धूपदी
पनैवेद्यं पुनराचमनीयं तांबूलानि दत्वा पूजासांगतायै दक्षिणां दत्वा स्तुतिभिः स्तुत्वा प्रणाम्य बद्धांजलिः प्र
पठेत ॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि ॥ द्रव्यमारोग्यमैश्वर्यं देहि देवि नमोस्तुते ॥ कुंकुमेन समाल
ब्धं चंदनेन विलेपितं ॥ बिल्वपत्रकृतापीडं दुर्गेहं शरणागतः ॥ सर्वमंगलेति रूपं देहीति च श्लोकं पठेत ॥ बलि राम

११

वदद्यात ॥ एवमेव महाष्टम्यामपि देवीपूजनं विशेषतस्तद्रात्रौ जागरं तां वा राजा नु विजयकामोऽर्द्धरात्रे वि
शेषपूजापूर्वकं बलिं दद्यात ॥ तदर्द्धयामिनीशेषे विजयार्थं नृपोत्तमः ॥ पंचाब्दं लक्षणोपेतं गंधधूपस्रग
र्चितं ॥ विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेदिति देवीपुराणात ॥ पंचाब्दं महिषमजं वा तत्रैव शेषमादि
पूजनं च कुर्यात ॥ महानवम्यामेव पूजा बलिदानं होमश्च ॥ होममंत्रश्च जयंतीत्यादिः ॥ अनेनैव तु मंत्रेण जपहोमादि
कारयेत इति देवीपुराणात तत्रैवोक्तं ॥ पूजयेत्तिलहोमैश्च दधिक्षीरघृतादिभिः इति केचित्तु प्रतिश्लोकं च ज
हुयात्पायसं तिलमिश्रं इति रहस्ये पठनात्सप्तशतीस्तवेन प्रतिश्लोकं तिलसर्पिर्मिश्रपायसेन होमं कुर्व
ति ॥ राज्ञा त्वश्वपीडाशांतये ब्रह्मपुराणोक्तार्चनं तत्पूजापि कार्या ॥ स चैवं वाक्पापामुषायां सूर्यादुत्पन्नो वाजिग
णाधिपः ॥ पूजामंत्राः शालिहोत्रे ॥ नमो देवाधिदेवाय तुरंगवनचारिणे ॥ सर्पप्रपुत्राय स्वायेतरगाम हिताय
वा तुरंगपरिबद्धस्यन्दनोपरिधावति ॥ साम्बमश्वाधिपं रक्तं नूतनां ब्रजोम्पहं ॥ मंत्रेणानेन रैवतं पाद्यादि
वचित सुधीः ॥ दशम्यां प्रातः पूजां विधाय विसर्जयेत ॥ संपूज्य प्रेषयेत्तां च दशम्यां शाबरोत्सवैरिति भविष्यपुराणा
त ॥ ततः संप्रेषितां देवीं दशम्यां शाबरोत्सवैरिति कालिकापुराणाच्च ॥ एवं पूजां विधाय प्राप्य दुर्गे शिवां शां
तिकरीं ब्रह्माणीं ब्रह्मणः प्रियां ॥ सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवां ॥ मंगलां शोभनां शुद्धां निष्कलां पर

स·म·
मांकल्यां॥ विश्वेश्वरीं विश्वमातां चंडिकां प्रणमाम्यहं॥ सर्वदेवमयीं देवीं सर्वरोगभयापहां॥ ब्रह्मेशविष्णुनमितां
प्रणमामि सदा उमां॥ विंध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीं॥ योगिनीं योगमातां च चंडिकां प्रणमाम्य
हं॥ ईशानमातरं देवीमीश्वरीमीश्वरप्रियां॥ प्रणतोस्मि सदा दुर्गां संसारार्णवतारिणीं॥ य इदं पठति स्तोत्रं शृणुयाद्वा
पि यो नरः॥ स मुक्तः सर्वपापेभ्यो दुर्गया सह मोदते॥ इत्यादिभिः स्तोत्रैः स्तुत्वा बद्धांजलिर्महिषघ्नीत्यादिश्लोकवदु
च्चेन प्रार्थ्य विधिहीनं क्रियाहीनं भक्तिहीनं यदर्चितं॥ पूर्णं भवतु तत्सर्वं त्वत्प्रसादान्महेश्वरीति प्रसाद्य समस्तं
स्तुत्वा एकं पुष्पं ॐ दुर्गायै नमः इत्यैशान्यां निक्षिपेद्विसर्जयेत्॥ उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम
कल्याणमष्टाभिः शक्तिभिः सह॥ गच्छ परं स्थानं स्वस्थानं देवि चंडिके। व्रज स्रोतोजलं वृद्ध्यै तिष्ठ गेहे च भूतये॥ इत्य
नुपगीतवाद्यदुंदुभिघोषपुरःसरं स्रोतोजलसमीपं गत्वा दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते॥ संवत्स
रे व्यतीते तु पुनरागमनाय वै॥ इमां पूजां मया देवि यथाशक्त्योपपादितां॥ रक्षार्थं त्वं समादाय व्रज स्वस्थानमु
त्तममिति प्रवाहयेत्॥ ततो देवीपूजास्थाने शांतिकलशोदकेन ब्राह्मणैरभिषिक्तस्तेभ्यो दक्षिणां दत्वा ब्राह्मणा
न् भोजयित्वा बंधुभिः सार्द्धं भुंजीत॥ ॥अथ लोहाभिसारिकं कर्म भविष्योत्तरे॥ नृपाभिलाषिणां पतिः प्रतिप्र
तिपदमतिक्रमात्॥ लोहाभिसारिकं कर्म कारयेद्यावदष्टमी॥ प्रागुदक्प्रवणे देशे पताकाभिरलंकृतं॥ मंडपं का राम

१२

रयेद्दिव्यं नवसप्तकरं वरं॥ आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभनं॥ मेखलात्रयसंयुक्तं योन्या वलदलाभया॥ राज
चिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च॥ आनीय मंडपे तानि सर्वाण्यधिवासयेत्॥ ततस्तु ब्राह्मणः स्नातः शु
क्लांबरधरः शुचिः॥ ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्धुतं॥ शाखामंत्रैर्होतव्यं पायसं घृतसंयुतं॥ हुतशेषं तुरंगा
णां गजानामुपहारयेत्॥ बद्ध्वा प्रतिसरान्यं वगजाश्वान्समलंकृतान्॥ ग्राममध्ये नगरे नित्यं नंदिघोषपुरःसरान्॥ प्रत्यहं
नृपतिः स्नात्वा संपूज्य पितृदेवताः॥ पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः॥ हुतशेषं प्रदातव्यं श्वोपनायनिकेज
ने॥ लोहनामाभवत्पूर्वमसुरः सुमहाबलः॥ स देवैः समरे क्रुद्धैर्बहुधा शकलीकृतः॥ तदंगसंभवं सर्वं लोहं पश्य
पते क्षितौ॥ तस्याभिहरणात्प्रात्तो विजयः समुदाहृतः॥ इति॥ ॥पूजामंत्रास्तु तत्रैव॥ पथ्यां बुस्थाद्वाययति शि
वायेमां वसुंधरां॥ तथा त्वाद्य राजानं विजयारोग्यसिद्धये॥ छत्रस्य॥ शशांककरसंकाश क्षीरडिंडीरपांडुर॥ प्रोत्सा
रयाशु दुरितं चामरामरभूषण॥ चामरस्य॥ शक्रकेतो महावीर्य सुपर्णस्त्वामुपाश्रितः॥ पतत्रिराड्वैनतेय पक्षधाना
रायतो ध्वजः॥ काश्यपेयोमृतहर्ता नागारिर्बलवाहनः॥ अप्रमेयो दुराधर्षो रणे देवारिसूदनः॥ गरुत्मान्मारुतगति
स्त्वयि संनिहितः स्थितः॥ शास्त्रवर्मपुधान्योधान्वर तत्वंवरिपून्दह॥ ध्वजस्य॥ कृतभुग्वसवो रुद्रा वायुः सोमो महर्ष
यः॥ नागकिंनरगंधर्वयक्षभूतगणा ग्रहाः॥ प्रमथाश्च सहादित्यैर्भूतेशा मातृभिः सह॥ शक्रः सेनापतिः स्कंदो व

स॰म॰ ठराध्या श्रीतत्त्वयि। प्रदहंतु रिपून्सर्वान राजाविनयमछतु॥ यानि प्रयुक्तान्यरिभिर्दूषितानि समंततः॥ एतानि सर्व
शत्रूणां हतानि तव तेजसा॥ कालनेमिवधे पद्यद्वत्रिपुरघातने॥ हिरण्यकशिपोर्युद्धे देवासुरे तथा॥ शोभिता सि
तथैवायुधशोभ त्वसमयेस्मर॥ नीलांबराभिमांद्यध्वान स्यंता भुममारव्य॥ इतिपताका॥ पाः॥ दुंदुभे त्वं सपत्नानां घोष
हृदयकंपन॥ भव भूमिपसैन्यानां तथा त्वं जयवर्द्धन॥ यथा जीमूतघोषेण हृष्यंति वरवारणाः॥ तथास्तु तव शब्देन
हर्षोस्माकं नयावहा॥ दुंदुभेः॥ पुरा पक्षंशंखपुत्पानां मंगलानां च मंगलं॥ विष्णुनाचैव धृतो नित्यमतः शांतिं प्रयच्छ मे
॥ शंखस्य महि इतिमि निर्दिव्यैर्देवा जादिसैवित॥ शिविकेपाहि मां नित्यं सदा त्वं सन्निधौ भव॥ शिविका॥ दोलिक
यो॥ विजयो नयदोर्जेताहि पुष्पातीमुभकर॥ धु॥ खहामद॥ शांतः सर्वारिष्ट विनाशनः॥ एतेवत्संनिधौ यस्मात्त
वसि त्वं महाबला॥ तेन सिंहासने तिष्ठ देवैश्वर्ये प्रयच्छ मे॥ त्वपि स्थितः शिवः साक्षात्त्वयि शक्रः सुरे श्वरः॥ त्वयि
स्थितो हरिर्विष्णुस्त्वं तपसे तपः॥ नमस्ते सर्वतो भद्र भद्रदो भव भूपतेः॥ त्रैलोक्यं तपसर्वं त्रि सिंहासन नमोस्तुते॥ सिंह
सनस्य॥ गंधर्वकुलजातस्त्वं माभूयाः कुलदूषक॥ ब्रह्मणः सत्य वाक्येन सोमस्य वरुणस्य च॥ तेजसा चैव सूर्यस्य
मुनीनां तपसा सदा॥ रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च॥ प्रभावाद्ब्रह्मताराम्य वइस्वितं तुरंगम॥ स्मर त्वं राजपु
त्रोसिकौस्तुभं च मणिं स्मर॥ सुरासुरैर्मथ्यमाना क्षीरोदादमृतादिभिः॥ जातस्त्वैः श्रवाः भूर्वं तेन जातोसि तत्स्मर॥ राम

९२

यांति ब्रह्महा गोघ्ना तहा पितृहा तथा॥ भूम्यर्थे नृतवादी च क्षत्रियश्च पराङ्मुखः॥ सूर्याविंदुमसौ वा पुपवित्प
श्यंति दुष्कृतं॥ व्रजाश्चैतां गतिं त्वं तत्त्व पापं भवेत्तव॥ विकृतिं च पादि गच्छेथा पुष्ठा ध्वानि तुरंगम॥ रिपून्विजित्य सम
रे सभर्त्रा सुखी भव॥ अश्व॥ ऐरावतः कुमुदश्च वामनः पुष्पदंतो पवामनः॥ सुप्रतीकोंजनो नील एते दैवयोनयः॥
तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रिताः॥ मंदो भद्रो गनमृगश्चैव राजसंकीर्णास्तथैव च॥ वने वने प्रसूतास्ते पूच्या निसु
महांतिव॥ पांतु त्वां वसवो रुद्राश्चादित्याः समरुद्गणाः॥ भर्त्तारं रक्ष नागेंद्र स्वामीवप्रतिपाल्यतां॥ अवाप्नुहि जयं युद्धे
गमनेस्वस्ति नो व्रज॥ गजस्य॥ प्रोत्सारणाय दुष्टानां साधु संरक्षणाय च॥ ब्रह्मणा निर्मितश्चासि व्यवहारस्य सिद्धये
॥ यशोदेहि सुखं देहि जयदो भव भूपते॥ तोडयस्त्वरिपून्सर्वान्हेमदंड नमोस्तुते॥ दंड॥ नकरंडस्य॥ सर्वायुधानां प्रथ
मं निर्मितासि पिनाकिना॥ शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभं॥ चंडिकायैः प्रदत्तासि सर्वदुष्टनिवर्हिणी॥
सपा विस्तारिता चासि देवानां प्रतिपादिता॥ सर्वसत्वांगभूतासि सर्वदुष्टनिवर्हिणी॥ छुरिके रक्ष मां नित्यं शांतिं य
छ नमोस्तुते॥ छुरिकायाः॥ रक्षांगानि गजान्रक्ष रक्ष वाजिधनानि च॥ मम देहं सदा रक्ष कहारक नमोस्तु ते॥ कट्ट
रकस्य॥ सर्वायुधमहामात्रः सर्वदेवारिसूदनः॥ चापमेरक्ष सा कंसा पकसन्न द्धे॥ धनंकप्रोनरत्नायसंहारायचं
हरे राव॥ त्रयी मूर्तिगतं देवधनुरस्त्रं नमाम्यहं॥ धनुषः॥ शार्ङ्गप्रधानं समरे वमस्त्रिन्नियपयोधमे॥ रक्षमां रक्षतीयि हिंता

स०म० पनयज्ञमोक्षने॥ वर्मणः॥ प्रासनीयपयत्रं स्त्वमनयालोकमायया॥ गहातानीवितं तेषांममसैन्यंवरतय॥ कृतस्य॥
श्रीविश्वासनः स्वकृत्ती स्याधातेदुरासदः॥ श्रीगमोविजयश्चैव धर्मधारस्तथैवच॥ इत्यष्टौ तवनामानि पूर्वमुक्तानि
वेधसा॥ नक्षत्रं कृत्तिकानुम्यं गुरुर्देवो महेश्वरः॥ हिरण्यंवशरीरं ते धातादेवो जनार्दनः॥ पितापितामहो देवस्त्वंमांपा
लयसर्वदा॥ दर्पणेन धृता ज्योतिः हृतश्च महिषासुरः॥ नीताधारयभुद्धायपरं स्वरूपाय तेनमः॥ स्वरूपस्य॥ लोहाभिसा
रिकं कर्मकृत्वैवंमंत्रपूर्वकं॥ जयंप्राप्नोति नृपतिः सर्वान्कामान्समश्नुते॥ ॥ इतिलोहाभिसारिकं॥ ॥ अत्रसूतके वि
शेषो विश्वरूपनिबंधे॥ ॥ आश्विनेशुक्लपक्षे तु प्रारब्धेन वरात्रके॥ शावाशौचे समुत्पन्ने क्रियाकार्याकथंबुधैः॥ देवी
पूजावकर्त्तव्यापशुयज्ञविधानतः॥ सूतके पूजनं प्रोक्तं दानंचैव विशेषतः॥ देवीमुद्दिश्यकर्त्तव्यं तत्रदोषोनविद्यतइ
ति॥ सूतकेपारणं कुर्यान्नवम्यां होमपूर्वकं॥ तदंते भोजयेद्विप्रान्दानंदद्याच्चशक्तितः॥ तदंते सूतकांतः स्यात् धर्मः॥ त
था मलेमासिनकर्त्तव्यं नवदुर्गोत्सवव्रतं॥ अस्तंगते गुरौ शुक्रे सिंहस्थे विबुधाधिपे॥ देवपूजनमुख्यंस्याद्विरिबाल
केतथा॥ आश्चारंभेविरामः स्याद्वितीयादौ नवंतयेदिति॥ तथा स्त्रीणां विशेषउक्तो गरुडपुराणे॥ गंधालंकारतं
बूलपुष्पमालानुलेपनं॥ उपवासेनदुष्यंति दंतधावनमंजनमितिदिक्॥ ॥ इतिनवरात्रकृत्यं॥ ॥ कार्तिक
शुक्लप्रतिपत्पूर्वविद्धाग्राह्या॥ पूर्वविद्धाप्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति ब्रह्मवैवर्ते॥ माधवोपि॥ वत्सपुत्रस्यं राम
१४

वपूर्वेद्युरुपवासस्वदावर्तिदितिपूर्वविद्धायामित्यर्थः॥ इहतैलाभ्यंगआवश्यकः॥ तथाचवसिष्ठः॥ वत्सरादे
वसंतादौ बलिराज्येतथैवच॥ तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यतइति॥ अत्रविशेषो हेमाद्रौ स्कांदे॥ प्रातर्गो
वर्द्धनः पूज्यो द्यूतं चापिसमाचरेत्॥ पूजनीयास्तथा गावस्त्याज्ये वाहनदोहने॥ मंत्रः॥ गोवर्द्धनधराधारगोकुलत्रा
ताकारक॥ बहुबाहुकृतच्छाय गवांकोटिप्रदो भव॥ गोपूजामंत्रः॥ याल्लक्ष्मीर्लोकपालानां धेनुरूपेणसंस्थिता॥
घृतंवहति यज्ञार्थे ममपापंव्यपोहतु॥ अग्रतः संतुमे गावो गावो मे संतु पृष्ठतः॥ गावो मे संतु हृदये गवांमध्ये वसा
म्यहमिति॥ ततोपराह्णसमये पूर्वस्यां दिशि भारत॥ मार्गपालीं प्रबध्नीयाद्दुर्गस्तंभेथपादपे॥ कुशकाशमयीं
दिव्यां लंबकैर्बहुभिर्युतां॥ मंत्रः॥ मार्गपालि नमस्तेस्तु सर्वलोकसुखप्रदे॥ विधेयैः पुत्रदाराद्यैः पुनरेमि व्रतस्यमे॥ मा
र्गपालीतलेनैव यांतिगावो गजावृषाः॥ राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः॥ मार्गपालीसमुल्लंघ्यनी
रुजः स्युः सुखान्विताइति॥ भविष्ये कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः॥ पूजांकुर्यान्नृपः साक्षाद्भूमौमंडल
केशुभे॥ बलिमालिख्यवर्णैः पंचरंगकैः॥ गृहस्यमध्यशालायां विशालायां ततो र्चयेत्॥ लोकश्चापि गृहस्यां
तः शय्यायां शुक्लतंडुलैः संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्॥ मंत्रस्तु॥ बलिराज नमस्तेस्तु देवदानववंदितइ
न्द्रशत्रो महाशस्त्र विष्णुसान्निध्यदो भवेति॥ व्रालितस्माद्यूतंप्रकर्त्तव्यं प्रभाते तत्र मानवैः॥ तस्मिन्द्यूतेजयोयस्य

स्य संवत्सरं नयः॥ पराजयो विरुद्धश्च तानाशको भवेत्॥ दृष्टिता भिक्षुसहितैर्नैर्यात्रा च भवेन्निशेति॥ ॥
इति प्रतिपन्निर्णयः॥ ॥अथ द्वितीया॥ ॥सा तु परैव॥ युग्माग्नीति वचनात्॥ एकादश्यष्टमी षष्ठी द्विती
या च चतुर्दशी॥ त्रयोदशी अमावास्या उपोष्याः स्युः परान्विता इति विष्णुधर्मोत्तरात्॥ अत्र विशेषः स्कांदे॥ आषाढ
स्यासिते पक्षे द्वितीया पुष्यसंयुता॥ तस्यां रथे समारोप्य रामं वै भद्रया सह॥ यात्रोत्सवं प्रवर्त्याथ प्रीणयेत्तु द्विजान्
बहून्॥ भद्रा सुभद्रा॥ श्रावणे कृष्णद्वितीया बृहत्तपोच्यते॥ सा पूर्वविद्धा ग्राह्या। तदाह संवर्तः कृष्णाष्टमी बृहत्त
पा सावित्री वटपैतृकी॥ कामत्रयोदशी रंभा उपोष्याः पूर्वसंयुता इति। उपोष्याः सेवनीया इति॥ कार्तिकशुक्लद्विती
या यमद्वितीयोच्यते॥ सा परा हृद्व्यापिनी ग्राह्या कर्मकालव्याप्त्या॥ तदुक्तं स्कांदे॥ ऊर्जे शुक्लद्वितीयायामपरा
ह्णेऽर्चयेद्यमं॥ स्नानं कृत्वा भानुजायां यमलोकं न पश्यति॥ ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः॥ वेष्टितः
किंनरैर्हृष्टैस्तस्मै यच्छति वांछितं॥ भविष्येपि॥ कार्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर। यमो यमुनया पूर्वं भोजि
तः स्वगृहे वितः॥ अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता॥ अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः। स्नेहेन भगिनीहस्ता
द्भोक्तव्यं पुष्टिवर्द्धनं॥ दानानि च प्रदेयानि भगिनीभ्यो विशेषतः॥ स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः॥ सर्वा भ
गिन्यः संपूज्या अभावे प्रतिपन्नकाः॥ अभावे भगिनीनां प्रतिपन्नकास्तत्स्थानीयाः॥ ब्रह्मांडेपि॥ यानुभोजयते नारीं भ्रात

युग्मके तिथौ॥ अर्चयित्वा भगिनीं बूलैर्नसा वैधव्यमाप्नुयात्॥ भ्रातुरायुःक्षयो राजन्न भवेत्तत्र कर्हिचिदिति॥ ॥
इति द्वितीयानिर्णयः॥ ॥अथ तृतीया॥ सा तु परैव॥ तदुक्तं विष्णुधर्मोत्तरे॥ एकादश्यष्टमी षष्ठी पौर्णमासी च
तुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः परान्विताः॥ चैत्रशुक्लतृतीयायां दोलोत्सवो रामार्चनचंद्रिकायां गारुडे॥
मधौ शुक्लतृतीयायां जानकीरमणं प्रभुं॥ राजोपचारैः संपूज्य मासमांदोलयेत्कलौ॥ दक्षिणाभिमुखं देवं दोल
मानं सुरेश्वरं॥ सुपूजितं सकृद्दृष्ट्वा सर्वपापैः प्रमुच्यते॥ चैत्रे मासि सिते पक्षे तृतीयायां रमापतिं॥ दोलारूढं समभ्य
र्च्य मासमांदोलयेत्कलौ॥ दोलारूढं प्रपश्यंति ये कृष्णं मधुमाधवे॥ अपराधसहस्रैस्तु मुक्तास्ते नात्र संशयः॥ दोला
रूढस्य देवस्य ये कुर्वंति जागरं॥ सर्वपुण्यफलावाप्तिर्निमिषे निमिषे भवेत्॥ इयमेव गौरीतृतीया॥ तत्र मुहूर्तमा
त्रापि परयुता ग्राह्या॥ ववनं त्वग्रे वर्तते॥ मदनरत्ने स्कांदे विशेषः॥ तृतीयायां यजेद्देवीं शंकरेण समन्वितां॥ कुंकु
मागरुकर्पूरमणिवस्त्रैः सुगंधकैः॥ स्रग्धूपदीपनैवेद्यैर्दमनेन विशेषतः॥ आंदोलयेत्ततो वत्स शिवोमातुष्टये
सदेति॥ वैशाखशुक्लतृतीयायां त्रिलोचनयात्रोक्ता काशीखंडे॥ राधशुक्लतृतीयायां स्नात्वा पैलिप्पिलेहृदे॥
तर्पयित्वा पितॄन्देवान् त्रिलोचनमथार्चयेदिति॥ इयमेवाक्षय्यतृतीयोच्यते॥ तदुक्तं भविष्ये॥ यात्वेषा कुरुशार्दूल
वैशाखे तु महातिथिः॥ तृतीया साक्षया लोके गीर्वाणैरभिवंदिता॥ यत्किंचिद्दीयते दानं स्वल्पं वा यदि वा बहु॥ तत्

सम०
दैमन्नयंदस्मात्तेनेपमन्नयास्मनेति॥ रूपमेव युगादिः॥ सा पूर्वाह्णव्यापिनी ग्राह्या॥ तदुक्तं नारदीये॥ द्वे शुक्ले द्वे
तथा कृष्णे युगादीः कवयो विदुः॥ शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इति॥ अत्र विशेषो गोविंदार्णवे देवी
पुराणे॥ तृतीयायां तु वैशाखे रोहिण्यृक्षसंयुते॥ उदकुंभप्रदानेन शिवलोके महीयते॥ कलशदानमंत्रस्तु
॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः॥ अस्य प्रदानात्तृप्यंतु पितरोपि पितामहाः॥ गंधोदकतिलैर्युक्तं
सान्नं कुंभं सदक्षिणं॥ पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठत्विति॥ एतद्दर्शे भवेत्तिलतर्पणं काम्यमित्युक्तं॥
विष्णुपुराणे॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः॥ श्राद्धं कृतं तेन समाः सहस्रं रहस्य
मेतत्पितरो वदंतीति॥ तथात्र मलमासेपि विशेषश्राद्धं कार्यं॥ योगादिकं मासिकं च श्राद्धं चापरपक्षि
कं॥ मन्वादिकं तैथिकं च कुर्यान्मलिम्लुचेपि च॥ अपरपक्षो नाम कृष्णपक्षोत्र गृह्यते॥ मलमासे महालयस्य
निषेधात्॥ ज्येष्ठशुक्लतृतीया रंभातृतीयोच्यते॥ सा पूर्वा ग्राह्या॥ तदुक्तं माधवीये स्कांदे॥ बृहत्तपात
थारंभा सायाह्नव्यापिनीत्यर्थः॥ ब्रह्मकैवर्तेपि॥ रंभाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम॥ अन्येषु सर्वका
र्येषु गणायुक्ता प्रशस्यतरेति॥ गताश्चतुर्थी॥ भाद्रकृष्णतृतीयायां विशाला तृतीया त्रोक्ता काशीखंडे॥ भाद्र
कृष्णतृतीयायामुपवासपरैर्नरैः॥ कर्तव्या नागरैस्तत्र विशालाक्षीसमीपत इति॥ अत्र रात्रिव्यापिनी ग्राह्या॥
१९

रात्रौ जागरणविधानात्॥ भाद्रशुक्लतृतीया हरितालिकोच्यते॥ सा मुहूर्तमात्रापि परयुता ग्राह्या॥ तदाह मा
धवः॥ मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे॥ शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति॥ चतुर्थीयुक्तायां
तु फलाधिक्यमाह माधवीये आपस्तंबः स एव॥ द्वितीयाशेषसंयुक्तां या करोति विमोहिता॥ सा वैधव्यमवाप्नो
ति प्रवदंति मनीषिण इति॥ आश्विनकृष्णतृतीया ललितादेव्या यात्रोक्ता काशीखंडे॥ इषकृष्णतृतीयायां ल
लितां प्रतिपूज्य वै॥ नारी वा पुरुषो वापि लभते वांछितं फलमिति॥ ॥ इति तृतीयानिर्णयः॥ ॥ अथ चतुर्थी॥ ॥
सा परा ग्राह्या॥ युग्मभूतानामिति युग्मवाक्यात्॥ माधवीये ब्रह्मवैवर्तेपि॥ एकादशी तथा षष्ठी अमावास्या च
तुर्थिका॥ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति॥ सर्वासु चतुर्थीषु ढुंढियात्रोक्ता काशीखंडे॥ कुर्यात्प्रति च
तुर्थीं यात्रां विघ्नेशितुः सदा॥ प्रात्हरोभ्यस्तु ढुंढिः शाद्यं पावेमोदकामुदेति॥ लैंगे॥ अंगारकचतुर्थ्यां येस्नात्वा
नरवहांभत्ति॥ अभ्यर्च्यांगारकं केशानं नमस्यंति नरोत्तमाः॥ न ते बांधवपीडा च कदाचित्किं प्राप्नुयुरिति॥ नाग
चतुर्थी तु मध्याह्नव्यापिनी परविद्धा ग्राह्या॥ तदाह गोविंदार्णवे देवलः॥ युग्मं मध्यं दिने यत्र तत्रोपोष्य फणीश्वरा
न्॥ क्षीरेणाप्याय पंचम्यां पूजयेत्प्रयतो नर इति॥ युग्मं चतुर्थी॥ विनायकव्रते तृतीयायुतैव॥ चतुर्थी तु तृतीया
यां महापुण्यफलप्रदा॥ कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणीति॥ श्रावणकृष्णचतुर्थी संकष्टचतुर्थी

स॰म॰ त्कृष्यते॥ सा चंद्रोदयव्यापिनी ग्राह्या। तदुक्तं स्कांदे। श्रावणे बहुले पक्षे चतुर्थ्यां तु विधूदये॥ तस्मिन्दिने व्रतं कार्यं
संकष्टाख्यं सुरेश्वरीति॥ दिनद्वये चंद्रोदयसत्वे तत्पूर्वैव मातृविद्धा गणेश्वर इति वचनात्॥ भाद्रकृष्णचतुर्थी बहुला॥
सा पूर्वैव। तदुक्तं गोविंदार्णवे पुराणसमुच्चये। गोपाश्चतुर्थी वत्सपूजा तु गर्वनिंदुर्भरहो लिकेव॥ वत्सपूजा शि
वरात्रिरेताः परान्विता ग्राह्यंतिन्तिः पंचसरा पूर्विति॥ भाद्रशुक्लचतुर्थी वरदचतुर्थीत्युच्यते॥ सा मध्याह्नव्यापिनी पूर्व
विद्धा ग्राह्या॥ पूर्वदिने मध्याह्नव्याप्त्यभावे परैव॥ तदुक्तं माधवीये बृहस्पतिना॥ चतुर्थी गणनाथस्य मातृवि
द्धा प्रशस्यते। मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनीति॥ स्मृत्यंतरेपि॥ मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यत इति॥ सिद्धिविनायकव्रतेपि सा मध्याह्नव्यापिनी ग्राह्या॥ प्रातः शुक्लतिलैः
स्नात्वा मध्याह्ने पूजयेन्नृप इति पूजायास्तत्कालत्वात्॥ उभयदिने मध्याह्नव्याप्त्यसत्वे व्याप्तिसत्वे वा पूर्वैव। मातृविद्धा
प्रशस्यत इति वाक्यात्॥ इयं च रविभौमाभ्यां युता महती कथ्यते॥ तदुक्तं वराहपुराणे॥ माघे शुक्ले चतुर्थी या भौमे
नार्केण वा युता॥ महती सात्र विघ्नेशस्यार्चयित्वेष्टमाप्नुयादिति॥ अस्यां चंद्रं न पश्येत॥ तदाह मार्कंडेयः॥ भाद्रे मा
सि सितेपक्षे चतुर्थी ख्यातियातिनी॥ मिथ्याभिशापं कुरुते दृष्टश्चंद्रो नभस्यपः॥ पराशरोपि॥ कन्यादित्ये चतुर्थ्यां
तु शुक्ले चंद्रस्य दर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा॥ अत्राशक्तौ त्रियहणं द्विवारदर्शनिनंदो प्रहतिः॥ राम
८

त्रा चिवंदं इत्याधान्पात्॥ तद्दोषशांत्यर्थं पुराणोक्तरे॥ ततश्चतुर्थ्यां रात्र्यां यो प्रमादादृश्यमानवः॥ पठेत्स्तोत्र
मिकं वाक्यं प्राङ्मुखो वाउदङ्मुखः॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः॥ सुकुमारक मारोदीस्तव ह्येष स्यम
मंतकः इति॥ वरदचतुर्थी त्वेवास्याविदंते तत्रैव॥ सुरासुराणां प्रवतीगणेशं भक्तिपूर्वकं॥ तस्यां प्रासादाद्दरतस्मा
द्यस्मादुद्वरचतुर्थिके ति॥ माघशुक्ले तिलचतुर्थी॥ तदुक्तं काशीखंडे॥ माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः॥ येत्वां
दुंढे विषयंति ते वैः सुरसुरदुर्हां॥ विधायवार्षिकीं यात्रां चतुर्थीं प्राप्य तापसी॥ शुक्लां तिलान्गुडैर्धाप्राशी
याल्लुकान्भृती॥ तापसीमाद्धी॥ अत्र नक्तग्रहणात्प्रदोषव्यापिनी ग्राह्येति दिक्॥ ॥ इति चतुर्थीनिर्णयः॥ ॥
अथ पंचमी सा चतुर्थीयुतैव ग्राह्या॥ युग्मवृत्तानामिति युग्मवचनात्॥ ॥ पंचमी सप्तमी चैव दशमी च त्रयोदशी॥ प्र
तिपन्नवमी चैव कर्तव्या संमुखी तिथिरिति पैठीनसिवचनाच्च॥ संमुखी सा या मध्याह्नव्यापिनी॥ ब्रह्मवैवर्तेपि प्रतिप
त्पंचमी भूतसावित्रीवटपूर्णिमा॥ नवमी दशमी चैव नोपोष्याः परसंयुता इति॥ ॥ माधवीये स्कांदेपि॥ पंच
मी तथा कार्या चतुर्थीसंयुता विभो इति॥ मत्स्यपुराणे॥ ब्रह्मरोत्पादिनस्यादिः कल्पादिः संप्रकीर्तितः॥ विशा
खस्य तृतीयायां या कृष्णा फाल्गुनस्य च॥ पंचमी चैत्रमासस्य तस्यैवांत्या तथापरा॥ शुक्ला त्रयोदशी माघे का
र्त्तिकस्य तु सप्तमी॥ नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहं॥ कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः॥ अ

स०म० त्रेताः शुक्लाः पौर्वाह्णिकाः कल्पाद्याः पराह्णिकाः परति युगादिवच्चवस्था॥ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो र
विः कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तंगतो रविरिति वाक्यात्॥ अत्र पक्षविशेषानुपादाने शुक्लेतिपः॥ श्रावणशु
क्लपंचमी नागपंचमीत्युच्यते॥ सा परविद्धा ग्राह्या॥ तदुक्तं चमत्कारचिंतामणौ॥ पंचमी नागपूजायां कार्या षष्ठी
समन्विता नागपंचमी॥ तां परित्यज्य पंचम्यां चतुर्थीसहिता हिता इति हे॥ ॥ अत्र कर्तव्यमुक्तं काशीखंडे॥ यः स्नातो नाग
पंचम्यां कुंडे वासुकिसंज्ञके॥ न तस्य विषसंसर्गो भवेत्सर्पसमुद्भवः॥ कर्तव्या नागपंचम्यां यात्रा वर्षासु तत्र वै॥ ना
गाः प्रसन्ना जायंते कुले तस्यापि सर्वदेति॥ गोविंदार्णवे भविष्येपि॥ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधि
प॥ द्वारस्योभयतो लिख्या गोमयेन विषोल्बणाः॥ पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः॥ गंधपुष्पोपहारैश्च
ब्राह्मणानां च तर्पणैः॥ ये तस्यां पूजयंतीह नागान्भक्तिपुरस्सराः॥ न तेषां सर्पतो वीर भयं भवति कुत्रचिदि
ति॥ भाद्रशुक्लपंचमी ऋषिपंचमीत्युच्यते॥ तदुक्तं ब्राह्मे॥ नभस्ये शुक्लपक्षे तु यदा भवति पंचमी॥ नद्यादिके तथा
स्नात्वा कृत्वा नियममेव च॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा वापि वरानने॥ कृत्वा नैमित्तिकं कर्म गत्वा निजगृहं पुनः॥
वेदिं सम्यक्प्रकुर्वीत गोमयेनोपलिप्य तां॥ रंगवल्लिसमायुक्तां नानापुष्पोपशोभितां॥ तत्र सप्तर्षीन्
दिव्यान्भक्तियुक्तान्प्रपूजयेदिति॥ तत्र पंचमी पूर्वयुता ग्राह्येति मदनरत्ने युग्मवाक्यात्॥ माधवीयेप्येवं॥ आश्वि राम

१८

नशुक्लपंचम्यां उपांगललिताव्रतं॥ यद्यपि महानिबंधेष्वनुक्तं तथाप्यतिप्रचारान्निरूप्यते॥ तत्र पंचमी म
ध्याह्नव्यापिनी ग्राह्या तत्रैव पूजाविधानात्॥ माधवीये समस्तंतरेपि॥ पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी
तिथिरिति॥ मार्गशीर्षे शुक्ले पंचम्यपि नात्॥ माधवीये समस्तंतरेपि॥ पूजाव्रतेषु सर्वेषु मध्याह्नव्यापि
नी तिथिरिति॥ मार्गशीर्षपंचम्यपि नागपंचमी॥ शुक्ले मार्गशिरे पुण्या श्रावणे या च पंचमी॥ स्नानदाने बहुफला
नागलोकप्रदायिनीति स्कांदे हेमाद्रौ॥ इयमपि परयुतैव ग्राह्या॥ पंचमी नागपूजायां कार्या षष्ठी समन्विते ति पू
र्वोक्तवचनात्॥ ॥ इति पंचमीनिर्णयः॥ ॥ अथ षष्ठी सा तु सर्वेषूपवासव्रतादिषु स्कंदव्रतातिरिक्ता सप्तमी
युतैव ग्राह्या॥ षण्मुन्योरिति युग्मवाक्यात्॥ माधवीये स्कांदेपि॥ नागविद्धा न कर्तव्या षष्ठी चैव कदाचन॥ स
प्तमीसंयुता कार्या षष्ठी धर्मार्थचिंतकैरिति॥ अत्र पंचमी वेधः षण्मुहूर्तात्मिको ज्ञेयः॥ नागो द्वादशनाडीभिर्दूष
यत्युत्तरां तिथिमिति वचनात्॥ तेन षण्मुहूर्तन्यूनपंचमीयोगे पूर्वैव॥ अस्यामेव रविवारयोगे लोलार्क
यात्रोक्ता काशीखंडे॥ कृतानि यानि पापानि नरैः संवत्सरादपि॥ नश्यंति तत्क्षणात्तानि षष्ठार्के लोलदर्शना
त्॥ लोलो लार्कः॥ वार्षिक्या यात्राप्युक्ता तत्रैव॥ मार्गशीर्षस्य सप्तम्यां षष्ठ्यां वा रविवासरे॥ विधाय वार्षिकीं
यात्रां नरः पापात्प्रमुच्यते इति॥ आषाढशुक्लषष्ठी स्कंदषष्ठीत्युच्यते॥ सा पंचमीयुता ग्राह्या॥ तदुक्तं स्कांदे॥ कल्पा

आ०
स०म०

षष्ठीस्कंदषष्ठी शिवरात्रिश्चतुर्दशी॥ एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति। भाद्रकृष्णषष्ठी योगविशेषे
णकपिलाषष्ठीत्युच्यते तदुक्तं पुराणसमुच्चये॥ भाद्रे मासि सिते पक्षे भानौ वै वकरे स्थिते। पाते कुजे च रोहिण्यां
सा षष्ठी कपिला भवेत्॥ संयोगे तु चतुर्णां तु निर्दिष्टा परमेष्ठिनेति। वराहपुराणे। नभस्ये कृष्णपक्षे तु रोहिणी
पातभूसुतैः। युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता। व्रती पयोव्रतासीन यमं भास्करं तत्र पूजयेत्। कपिलां च द्वि
जाग्र्याय दत्त्वा क्रतुफलं लभेत्। तत्र तद्धेमाद्रौ विशेषः स्कांदे प्रोष्ठपदासिते पक्षे षष्ठी भौमेन संयुता। व्यतीपा
तेन रोहिण्या सा षष्ठी कपिला स्मृता॥ द्वितीया तु महापुण्या व्रतिनां कविता षष्ठी तत्र तारस्यां ते सा पुनसीत्तिन
संयुता वै त्र वैशाखयोर्मध्ये सितेपक्षे भौमेन पावैशाखे पिवरा नेदद्यात्ववत्यापरा स्मृतेति। मार्गशुक्ला चंपाषष्ठी।
तस्यां खंडेरायाख्यमल्लारी पूजा ब्राह्मणानां भोजनादि मल्लारिमाहात्म्ये दृष्टि। तत्पेषु प्रसिद्धं। अस्यां योगवि
शेषस्तत्रैवोक्तः। मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता॥ रविवारे तारसंयुक्ता सा चंपेतीह कीर्तितेति। त
था मार्गशीर्षे मलेपक्षे षष्ठ्यां वारे शुमालिनः॥ शततारागते चंद्रे लिंगस्य दृष्टिगोचरमिति। इयं च योगविशे
षात्पवपितावाय्रात्ता॥ तत्पव्रासप्तमी युता कार्या पूर्वोक्तसामान्यनिर्णयादिति दिक्॥ इति षष्ठीनिर्णयः॥ अ
थ सप्तमी॥ सा सर्वत्र पूर्वैवाष्टम्युक्ता पोरितियुग्मवचनो तस्कादपि षष्ठ्यायुता सप्तमी व कर्तव्या तातस्व पदिति॥ राम
१८

वैशाखशुक्लसप्तम्यां गंगापूजोक्ता ब्राह्मे। वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी स्वयं॥ क्रोधात्पीता पुनस्त्य
क्ता कर्णरंध्रात्तु दक्षिणात्॥ तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति। अत्र पूर्वाह्णव्यापिनी ग्राह्या दिनद्वये साम्ये
न पूर्वाह्णगामिनी पूर्वा सामान्यनिर्णयात्॥ आश्विनशुक्लसप्तमी देवीपूजायां परयुता ग्राह्या पुनापा वर्षव
द्धिश्च सप्तमी पार्वती प्रियायरवेरुदयगामी तं तेन तासु तिथियुग्मनेति। प्रतापमार्तंडे भविष्योक्तेः॥ वर्षवृद्धि
जन्मतिथिः। अ[illegible]त्रैव मूलनक्षत्रे पुस्तकस्थापनमुक्तं रुद्रयामले। मूलर्क्षे तु सुराधीश पूजनीया सरस्वती॥ पूज
येत्प्रत्यहं देवं यावद्वैष्णवमृक्षकं॥ नाध्यापयेन्न वा लिखे[illegible]न्नाधीयीत कदाचन॥ पुस्तके स्थापिते देवि विद्याका
मो द्विजोत्तमः॥ संग्रहेपि॥ आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीं॥ मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्॥
माघशुक्लसप्तमी रथसप्तमीत्युच्यते साऽरुणोदयव्यापिनी स्नानादौ ग्राह्या। सूर्यग्रहेण तुल्या तु शुक्ला माघ
स्य सप्तमी। शुक्लाग्ररुणोदयवेलायां तस्यां स्नानं महाफलमिति वृद्धिकार्यां विष्णुक्तेः। अरुणोदयवेलायां शु
क्ला माघस्य सप्तमी॥ प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समेति। समं तत्र तत्रादिनद्वये रुणोदये वेत्पूर्वैवाष्टम
न्योरितियुग्मवाक्यात्॥ अत्र कृत्यं भविष्ये कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलं। ताम्रं तैलं पैसम्पकृद
त्वा शिरसि दीपकं सो वर्तराजते में ताम्रे नत्पानाबुमपि तत्पा॥ तैलेन वर्तिदत्त वाम हारजनं रजिता॥ समाहि

स०म० [illegible]लनाभूत्वादत्वादीतिदीपकं॥भास्कारंहृदयेध्यात्वाइमंमंत्रमुदीरयेत्॥नमस्तेरुद्ररूपायरसानां
पतयेनमः।वरुणायनमस्तेस्तुहरिवासनमोस्तुते।जलेपरिहरेद्दीपंध्यात्वासंतर्प्यदेवताइति।महारत
नंकुसुंभंपरिहरेन्मुंडेत्।काशीखंडेविशेषः।लोलार्केरथसप्तम्यांस्नात्वागंगासिसंगमे।सप्तजन्मकृ
तैःपापैर्मुक्तोभवतितत्क्षणादिति।इयंचषष्ठीरविवासरयोगेतिफलदा॥षष्ठीवसप्तमीयोगेवारश्चेद
भुमालिनः॥योगोयंपद्मकोनामसहस्रार्कग्रहैःसमइतिस्मृतिचंद्रोदयेगर्गोक्तेः॥अर्घ्यमंत्रश्चकाशीखंडे
॥यदाजन्मकृतंपापंमयासप्तसुजन्मसु।तन्मेरोगंचशोकंचमाकरीहंतुसप्तमीति॥ ॥इतिसप्तमीनिर्णयः॥
॥अथाष्टमीसाकृष्णापूर्वाशुक्लापराग्राह्या॥शुक्लपक्षेष्टमीचैवशुक्लपक्षेचतुर्दशी॥पूर्वविद्धानकर्त
व्याकर्तव्यापरसंयुतेति॥कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतुर्दशी॥पूर्वविद्धैवकर्तव्यापरविद्धानकुत्रचित्॥
उपवासेषुतन्मेंद्रएषधर्मःसनातनइतिनिगमात्॥सर्वास्वष्टमीषुभैरवयात्राकाश्यांविशे॥अष्टम्यांच
तुर्दश्यांरविभूमिजवासरे॥यात्रांचभैरवींकृत्वानरःपापैःप्रमुच्यतइति॥तत्रैवाष्टम्यांचचतुर्दश्यां
भौमवारेविशेषतः॥संपूज्यमतनंकाश्यपांदुर्गांदुर्गातिनाशिनीमिति॥चैत्रशुक्लाष्टम्यांविशेषस्त राम
२०

त्रैवादैत्राष्टम्यांमहायात्रांभवान्याःकारयेत्सुधीः।अत्रबाधिकाःप्रकर्त्तव्याशतकृत्वःप्रदक्षिणाइति।इयंच
परयुताग्राह्या।युग्मवचनात्॥श्रावणकृष्णाष्टमीद्विधा॥जन्माष्टमीजयंतीवातत्रकेवलाजन्माष्टमी।रोहिणी
युताजयंती॥तत्राद्यास्कांदे।अष्टमीश्रावणेमासिकृष्णपक्षेयदाभवेत्॥कृष्णजन्माष्टमीतियामहापातक
नाशिनीति।पुराणांतरेपि।श्रावणेबहुलेपक्षेकृष्णजन्माष्टमीव्रतं॥रात्रिपुष्पांप्रकुर्वीतविशेषेणतुसंयुता
मिति॥जयंतीतुकावह्निपुराणे॥कृष्णाष्टम्यांभवेद्यत्रकलैकारोहिणीयदि॥जयंतीनामसाप्रोक्ताउपोष्यासा
प्रयत्नतइति।स्कांदेपि।प्राजापत्येनसंयुक्ताअष्टमीतुयदाभवेत्॥श्रावणेबहुलेसातुसर्वपापप्रणाशिनी॥
जयंपुण्यंचकुरुतेजयंतीतांविदुर्बुधाइति॥शैवपुराणेशिववाक्यं।मत्तोपिवत्सप्रवरूपामिश्राष्टमीभेदनिर्णये
॥श्रावणेकृष्णपक्षस्यघटिषष्टिर्यदाभवेत्॥तदाजन्माष्टमीख्यातासंपूर्णासाप्रकीर्तिता।रोहिणीऋक्षसं
युक्ताजयंतीसातुकथ्यते।जयंतीयदिलभ्येततत्रपुण्यमनंतमिति॥पाद्मे।प्रेतयोनिगतानांतुप्रेतत्वंना
शितंनरैः॥यैःकृताश्रावणेमासिअष्टमीरोहिणीयुता॥किंपुनर्बुधवारेणसोमेनापिविशेषतः।किंपुनर्नवमी
[illegible]लकोघास्तुमुक्तिदेति।सोमःसोमवारइतिकेचित्॥पुत्रंतुचंद्रोदयइति।अत्रात्रेतुयोगोयंतारापत्यफदयोः

स०म० नीतिविष्णुधर्मोत्तरे कर्मूलकल्पनालाघवात् तत्र जन्माष्टमी नित्या येन कुर्वंति मानवाः कृष्णजन्माष्टमीव्र
तं॥ न करोति महाप्राज्ञ व्याली भवति कानने रविमविष्येनयंत्यपि नित्या काम्या च। नित्योक्ता स्कांदे। भूकांते
न तुपत्याप्यंधाव हस्तस्य भोजनेन तथा पं लभंते कुंतिजपती विमुखो नरः। न करोति यदा विष्णो नृपतीसंभवं व्रतं। प
मस्य वशमापन्नः सहते नारकीं व्यथामिति अकरणे प्रत्यवायश्रवणात्काम्याप्युक्ता स्कांदे महाजपार्थ्यं
कृतं जयंती मुक्तये पर्वा॥ धर्ममर्थं वि कामं च मोक्षं च मुनिपुंगव। ददाति वांछितानर्थान्यच्चान्यदपि दुर्लभा
इति फलविशेषश्रवणात्॥ अस्मिंश्च व्रते उपवासः पूजा च द्वे प्रधाने। जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजो
त्तम॥ त्रैलोक्यसंभवं पापं तेन भुक्तं न संशय इति स्कांदात्॥ अर्द्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्॥ तस्यामभ्य
र्चनं शौरेर्हंति पापं त्रिजन्मजं॥ सोपवासो हरेः पूजां कृत्वा तत्र न सीदतीति। भविष्यत्पुराणाच्च फलसंबंधावग
मादिति नव्याः॥ तन्न॥ विश्वजिन्न्यायेन फलसंबंधाध्याहारे योगभेदापत्तेः॥ ननु पूर्वोदाहृतवाक्येषु गौरवप
त्तिहीर्षया केवलं फलसंबंध एव कल्प्यते॥ श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं॥ न करोति नरो यस्तु भ
वति क्रूरराक्षसः इत्यादिषु कालविधायकेषु भविष्यत्पुराणादिवचनेषु कृष्णजन्माष्टमीव्रतशब्दो नामधेयरूप राम

21

दानत्वाद्दर्शपूर्णमासशब्दवदित्यादिवत्प्रयोगैक्यमिति चेन्न॥ प्रातिस्विकवाक्यैः पृथक् फलसंबंधाद्विश्वजि
दिवत्परस्परनैरपेक्ष्येतिकर्तव्यतायाश्च पृथक्पात भिन्न एव प्रयोगविधिः कल्प्येत। एवं चैकशब्दोपादान
मप्युपहस्यापद्भुनासोमेनेत्यादिवन्न विरुध्यते॥ अस्तु पृथक्प्रयोग इति चेन्न॥ अनंतरस्वकृतव्रतानुष्ठानप
क्षतोऽप्येकप्रयोगत्वेऽखनविरोधात्॥ तस्मात्सोपवासो हरेः पूजामित्यनंतरोपन्यस्तमासि भाद्रपदेऽष्टम्यां कृष्ण
पक्षेर्द्धरात्रके॥ शशांके वृषराशिस्थे ऋक्षे रोहिणीसंज्ञके। योगेऽस्मिन्वसुदेवाद्धि देवकी मामजीजनत्॥ तस्मा
न्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः इत्यादावुपवासस्य गुणत्वप्रतीतेः॥ यदतो धावतीत्यादिवत्फलसंस्का
रः पूजैव प्रधानं॥ एवं चोपवासस्य पारार्थ्ये नित्यत्वपक्षेऽपि फलोक्तिस्तवः सकेवलं साधक एव पताति
दिवत्॥ अंगे फलश्रुतिरर्थवाद इति न्यायात्॥ ननु वासुदेवं समुद्दिश्य सर्वपापप्रशांतये॥ उपवासं क
रिष्यामि कृष्णाष्टम्यां नभस्यहं॥ अद्य कृष्णाष्टमीं देवीं नभश्चंद्रसरोहिणीं॥ अर्चयित्वोपवासेन भोक्ष्येह
मपरेऽहनीति भविष्यदुक्तसंकल्पवाक्ये उपवासस्य कर्तव्यत्वेनोक्तेर्वास्तोऽपि प्रधानमिति चेन्न॥ अंगत्वेऽप्यु
पवासस्य क्रियासंबंधित्वेन वा प्रकाशयन्मंत्रः करता वमनंतरतिन्यायात् क्रियासंबंधकपवासप्रकाशकत्वे
नापि मंत्रस्य कारकत्वोपपत्तेः॥ उपवासेनैतत्फलं तरिष्यामीति॥ उपवासस्य पूजाकरणत्वासंभवात्॥ ननु पू

स०म० वोदाहृतयोः पूजाफलसंबंधबोधकवाक्ययोः करणानिंदार्थवादादेरभावात्कथंव्रतस्य द्वैधमिति चेन्न॥ उक्त
पुण्यापूजापाद्यवफलसंबंधेपूर्वोक्तहेतुभावात्तेबहुलेपक्षेइत्यादिवाक्येषु कृष्णजन्माष्टमीव्रतशब्दे
नपूजायाग्रहणात्पूजोक्तकरणानिंदार्थवादश्रवणान्नित्यत्वोद्वैधमिति॥ तस्मादुपवासोगंपूजैवतुप्रधानं॥
अस्याश्चपूजायाःकालउक्तोविष्णुधर्मोत्तरे॥ रोहिणीसहिताकृष्णामासिभाद्रपदेष्टमी॥ सप्तम्यामर्धरात्र
धःकलयापियदाभवेत्॥ तत्रजातोजगन्नाथःकौस्तुभीहरिरीश्वरः॥ तमेवोपवसेत्कालंतत्रकुर्याच्चजा
गरं॥ अर्धरात्रेतुयोगोयंतारापत्युदयेतथा॥ नियतात्माशुचिःस्नातःपूजांतत्रप्रवर्तयेदिति॥ वसिष्ठस्तुस्पष्ट
मर्धरात्रस्यमुख्यकालत्वमाह॥ अष्टमीरोहिणीयुक्तानिश्यर्धेदृश्यतेयदि॥ मुख्यकालःसविज्ञेयस्तत्र
जातोहरिःस्वयमिति॥ मुख्यस्यप्रधानस्यकालोमुख्यकालः॥ अत्रकेवलाष्टमीवत्षड्भेदाः॥ पूर्वेद्युरेवनिशी
थव्यापिनीपरेद्युरेवोभयेद्युर्नोभयेद्युश्चेति॥ तत्रप्रथमद्वितीयपक्षयोः कर्मकालव्याप्तेर्नास्तिसंदेहएव
अंत्ययोरपिपक्षयोः प्रातःसंकल्पकालेसत्वाद्ग्राह्यत्वापरैवा ब्रह्मवैवर्तेपि॥ वर्जनीयाप्रयत्नेनसप्त
मीसंयुताष्टमीति॥ रोहिणीयुतापिषड्धा॥ पूर्वेद्युरेवनिशीथयोगिनी॥ परेद्युरेवतादृशी॥ उभयेद्युर्नो
भयेद्युर्निर्भयेद्युश्चेति॥ तत्रपूर्वेद्युर्निशीथयुतापूर्वैव॥ कार्याविद्धापिसप्तम्यारोहिण्यासहिताष्टमीतिप राम
२२

ग्रात॥ सप्तमीसंयुताष्टम्यांनिशीथेरोहिणीयदि॥ भवितासाष्टमीपुण्यायावच्चंद्रदिवाकराविति वह्निपु
राणात॥ तथैवाष्टमीपूर्वविद्धायांउपवासंसमाचरेदितिगारुडाच्च॥ भविष्येविष्णुधर्मोत्तरेच॥ रोहिण्यामर्धरा
त्रेचयदाकृष्णाष्टमीभवेत्॥ तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजं॥ प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्ट
मी॥ सोपवासोहरेःपूजांकृत्वातत्रनसीदति॥ अर्धरात्रेतुयोगोयंतारापत्युदयेतथा॥ रोहिणीसहिताकृष्णामासि
भाद्रपदेष्टमी॥ अर्धरात्रादधश्चोर्ध्वंकलयापियदाभवेत्॥ तत्रजाभुतगोविंदोबालरूपीचतुर्भुजः॥
तस्मात्तंपूजयेत्तत्रनिशीथेराजसत्तमेति॥ अवशिष्टेषुत्रिषुपक्षेषुपरदिनएवव्रतं॥ तदुक्तंब्रह्मवैवर्ते॥ वर्जनी
याप्रयत्नेनसप्तमीसहिताष्टमी॥ सऋक्षापिनकर्तव्यासप्तमीसंयुताष्टमीति॥ स्कांदे॥ सप्तमीसहिताष्टम्यां
भूत्वाऋक्षंद्विजोत्तम॥ प्राजापत्यंद्वितीयेह्निमुहूर्तार्धंभवेद्यदि॥ तदाष्टयामिकंज्ञेयंप्रोक्तंव्यासादिभिःपुरा॥
पाद्मे॥ मुहूर्तेनापिसंयुक्तासंपूर्णासाष्टमीभवेत्किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेतिपदस्तुपूर्वेद्युरो
हिणीरहितानिशीथगामितिथिः परेद्युर्दिनेरोहिणीसहितानिशीथास्पृक्तदापूर्वैवप्राप्ता॥ कर्मकालशील
त्वात्स्यसर्वपिक्षयाप्राबल्यस्यसर्वत्रप्रसिद्धत्वात्॥ रोहिणीयोगेतुप्राशस्त्यार्थेनातिशयमात्रंनतुतस्य
नित्योपयोगिता॥ नवमीबुधवारवत्॥ अन्यथाप्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः॥ येःकृताश्रावणेमा

सम० सिअष्टमीरोहितीयुता॥ किंपुनर्बुधवारे तासोमेनापिविशेषतः॥ किंपुनर्नवमीयुक्ता कुलकोट्यास्तुमुक्तिदेति
पापमवत्सापूर्वेद्युरर्द्धरात्रेवर्त्तमानांसरोहितीमष्टमीयुक्ताबुधनवमीयुतापरैवकार्योपपद्येतापरंतुपुनर्नव्याः॥
सत्यं कर्मकालशास्त्रं सर्वापि तयाप्रबलं तथापीपमास्मिन्व्रतेपरैवग्राह्येत्येवंविधेनप्रातिस्विकेनशास्त्रेण
बाध्यते॥ अतएवविष्णुरहस्ये॥ प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिवाष्टमी॥ मुहूर्त्तमपिलभ्येतसोपोष्या
सामहाफलेति॥ वह्निपुराणेपि॥ कृष्णाष्टम्यांभवेद्यत्रकलैकारोहिणीयदि॥ जयंतीनामसाप्रोक्ताउपोष्या
प्रयत्नतः॥ स्कांदेऽपिवाष्टमीकिंचिन्नवमीसकलायदि॥ भवेत्तुबुधसंयुक्ताप्राजापत्यर्क्षसंयुता॥ अपि
वर्षशतेनापिलभ्यतेयदिवानवेति॥ ब्रह्मवैवर्त्तेदिवावायदिवारात्रौनास्तिचेद्रोहिणीकला॥ रात्रियुक्तांप्रकु
र्वीतविशेषेणेंदुसंयुतामिति॥ प्रातिस्विकशास्त्रस्यकर्मकालशास्त्रस्यतयाप्राबल्यंमाधवाचार्यादिभिर्विस्था
पितमेवेत्याहुः तदपिन॥ तद्वैहिप्रातिस्विकंशास्त्रंकर्मकालबाधकंयदनन्यथासिद्धंभवति॥ संभवतितस्यान्य
थान्योपपत्तिः तथाहियत्रावश्यंदेवकीयंतत्रेंदुसंयुतामित्यस्यसोमेनापिविशेषतइत्यनेनैकमूलकल्पना
लाघवलिप्सयासोमवारपरत्वात्रास्यादिवावच्छेदेनरात्र्यवच्छेदेनवारोहिणीकलायोगाभावेनिशीथग
ग्राह्येत्ययमर्थः॥ निशीथगमकशब्दाभावात्॥ किंतुसोमवारयुक्ताविशेषेणाधिक्येनात्रियुक्ताग्राह्येति॥ राम
२२

रात्रिपदे एवंवोभयदिनेनिशीथस्पर्शाभावेसोमवाराधिकरात्रिव्याप्त्योर्निर्णायकत्वमुक्तंभवति॥ पद्मे॥ इंदुसंयुतामित्य
स्यनिशीथपरत्वेपिरात्रिपदत्वेपिनैवाधिकंरात्रिंलप्नापिवाऽहोरात्रावच्छेदेनकलापिरोहिणीतियोगाभा
वेऽधिकरात्रिव्यापिनींकुर्वीतेत्यक्त्वाविशेषितोत्पादिनातद्योपघते॥ सत्यपिरोहिणीयोगेइंदुसंयुतैवग्रा
ह्येति॥ अथवानिशीथसमुहूर्तमात्रात्मकबाउभयदिनेवैषम्येतानिशीथस्पर्शेहोत्रेरोहिणीयोगमभा
वेवविशेषे॥ आधिक्येनेंदुसंयुक्तानिशीथगात्रैप्राह्या॥ अधिकनिशीथव्यापिनीतियावत्॥ रोहिणीयोगेत्व
धिकनिशीथव्यापिनीमपिविहायस्वाल्पनिशीथव्यापिनीरोहिणीयुक्तामेवकुर्वीतेति॥ यत्तुस्कांदेऽप्येवा
ष्टमीकिंचिदित्यत्राप्युदयपशब्दस्यनारापत्फदयेसनीत्याधिकमूलकल्पनालाघवलिप्सयावश्योदयपरतैवा
भीकार्या॥ नसूर्योदयपरता॥ यदित्वेवंव्याख्यायतेततोयथाश्रुतवाक्यबलाद्यत्पूर्वेद्युर्निशीथेष्टमीमात्र
सत्वमुत्तरेद्युश्चनिशीथस्पर्शिन्यष्टमीरोहिणीयुक्तावसतीयदाबुधयुक्तातदैवोत्तरास्यान्नतुतदभावे॥ याव
द्वचनंवाचनिकमितिन्यायात्॥ यदितुबुधाभावेपिरोहिणीमात्रवशादेवोत्तरोच्यतेतदारोहिणीयोगाभावेपिबु
धमात्रवशादेवाद्युत्तरास्यात्॥ अन्यतरापायेप्यतद्वचनप्रवृत्तेःस्वीकारात्॥ नचयोगवत्सरयोगस्यापिप्राशस्त्य
हेतुत्वाद्याप्रतीर्द्धजरतीयापत्तिः॥ किंवा॥ यथापूर्वेद्युर्निशीथेष्टमीमात्रसत्वेऽत्तरेद्युश्चनिशीथात्पूर्वमर्कयोगेबु

धसत्वे दैवतद्वयनायुत्तरेद्युर्वृत्ते ॥ एवं पूर्वेद्युर्निशीथेसत्त्वष्टमीसत्त्वेप्युत्तरेद्युर्बुधाधिक्यादुपवासापत्तिः प्रयोविता
वैतद्वचो व्याख्यादि तनित्तपि गुरुभिः ॥ पद्यविष्णुरहस्यष्ठ्यं यदस्ति वह्निपुराणात्तस्ठुं तत्रमुहूर्तपदं निशीथ्यात्वमुहू
र्तपरं कल्पापदं तद्धर्कि किलापरमिति तेन विरोधः ॥ वस्तुतस्त्वेतद्वाक्यद्वयमुभयदिने निशीथेष्टमीव्याप्ताव्याप्तावि क
देशव्याप्तोवासावकाशमतो न कर्मकालव्याप्तिबाधकं ॥ तस्मात्कर्मकालशास्त्राबाधात्पूर्वैव ग्राह्या ॥ यदि तु ज
यंतीव्रतं जन्माष्टमीव्रतान्निन्नं तदा तत्र्वं तु परेहनि ननु जन्माष्टमीव्रतं ॥ यत्तु माधवाचार्यैर्जयंतीव्रतेन जन्माष्ट
मीव्रतस्य प्रसंगसिद्धिरभ्यधायि । तन्न कालभेदात् । चोदिवत्तेरेव नामभेदान्निमित्तभेदाद्रूपभेदाच्च शुद्धमिश्रत्व
भेदान्निर्देशभेदाच्च कर्मभेद उक्तः सोप्ययुक्तः ॥ कामं नामधेयभेदे हि स्यात्कर्मभेदः ॥ न त्वत्र जयंतीशब्दः कर्म
नामकिं तु रोहिणीसहिताया अष्टम्याः । रोहिणी च यदा कृष्णपक्षेष्टम्यां द्विजोत्तम ॥ जयंतीनामसा प्रोक्ता सर्व
पापहरा तिथिरिति विष्णुधर्मोक्तात् ॥ यच्च निमित्तभेदादित्युक्तं तत्र रूपशब्देन धात्वर्थभेदो गुणभेदो वाभि
प्रेतः ॥ नाद्यः ॥ कर्मभेदसाधकतया । मित्राधिकरणोपन्यासासंगतेः ॥ न त्वामित्राधिकरणो धात्वर्थभेदाद्भेदः
सिध्यति ॥ नांत्यः ॥ उत्पत्तिशिष्टस्य गुणस्य वाक्यांतरभवत्वात् ॥ निमित्तभेदश्च शुद्धमिश्रत्वभेदनिर्देशभेदानां
तु कर्मभिदकत्वं नक्कापिदृष्टमादिते ॥ ननु जन्माष्टमीजयंतीवशिवारात्रिवत्पूर्वविद्धैव कर्तव्यापि विधिमां

तेवपारणामिति भृगुवाक्ये जन्मपरपुनः श्रवणात्तत्र तदभ्यासादेव भेद इति चेन्न । एतस्य वचसो जन्माष्टमीमत्वा
दि जयंत्यनुवादेन पूर्वविद्धत्वगुणमात्रविधायकत्वेनाप्युपपत्तेः ॥ अथ पूर्वेद्युरुक्तेषु वाक्येषु उपवसेत्पूजयेदि
त्यपयीयधातुनिष्पिन्नाख्यातरूपाच्छब्दांतरादेव भेद इष्यते तत्र शब्दांतरेणोपवासपूजयोर्भेदेप्युपवासस्य
पूजांगत्वस्य प्राक्स्थापितत्वेन नस्वातंत्र्येण कालनिर्णयप्रयोजनकत्वं । प्रकरणांतरादृष्टे इति चेन्न ॥ उपलभ्यमा
नस्मृतिपुराणादिषु असंनिध्यनुपलंभात् ॥ यदि स्यात्तदाकिमिति नेराजन्माष्टमी गवि द्वायभ्युद्धमिश्रत्वादि कुमारो
माधवाचार्यैराश्रीयेत । एवमपि स्वमात्रसाक्षिकत्वेन प्रकरणांतरादृष्टे समाश्रीयमाणे भवतु जयंतीव्रतं परेहनि
॥ जन्माष्टमीव्रते तु सत्यप्युत्तरदिने निशीथव्याप्त्यभावादष्टम्या रोहिणीयोगे पूर्वदिनेवकेवलायां निशीथयोगे
पूर्वैव क्रिया स्यादिति दिक् ॥ ॥ अथ जन्माष्टमीव्रतप्रयोगः ॥ व्रतपूर्वदिने दंतधावनं कृत्वोपवासदिने प्रातः सूर्यः सो
मो यमः कालः संध्ये भूतान्यहः क्षपा पवनो दिक्पतिर्भूमिराकाशं खचरामराः ॥ ब्राह्मं शासन [illegible] मास्थाय कल्पध्वमिह संनि
धिमित्युक्त्वा सफलपुष्पाक्षतं जलपूर्णं ताम्रपात्रमादाय मासाद्युल्लिख्यामुकफलकामः पापक्षयकामो वाकृ
ष्णप्रीतये कृष्णजन्माष्टमीव्रतं करिष्ये ॥ तथा वासुदेवं समुद्दिश्य सर्वपापप्रशांतये । उपवासं करिष्यामि कृष्णाष्टम्यां
नभस्यहं ॥ अद्य कृष्णाष्टमीं देवीं नभश्चंद्रसरोहिणीं ॥ अर्चयित्वोपवासेन भोक्ष्येहमपरेहनि ॥ एनसो मोक्षकामोस्मि यद्

विंदस्त्रियो निजे॥ तन्मे मुंचतु मां त्राहि पतितं शोकसागरे॥ आजन्ममरणं यावद्यन्मया दुष्कृतं कृतं॥ तत्प्रणाशय
गोविंद प्रसीद पुरुषोत्तमेत्युक्त्वा पात्रस्थं जलं क्षिपेत्॥ ततः कदलीस्तंभवासो भिराम्रपल्लवयुतस्वजलपूर्णक
लशोदीपैः पुष्पमालाभिर्युतमगरुधूपितं अग्निखड्ग कृष्णछागर ज्ञामतिक्षरान्यस्तमुसलादि युतं मंगलोपेतं ष
ष्ठ्यादेव्याधिष्ठितं देवक्याः सूतिकागृहं विधाय तस्याः समंतात् भित्तिषु वसुदेवकुमारं नंदं देवगंधर्वादीन् खड्गचर्म
धरवसुदेवदेवकीनंदयशोदागोपगोपीकान् कंसनियुक्तान् गोधेनुकुंजराद्यमुनां तन्मध्ये कालियसर्पाद्यन्य तत्का
लीनं गोकुलचरितं यथासंभवं विलिख्य सूतिकागृहमध्ये प्रच्छदपटावृतं मंचकं तत्रोपरि बालमध्याह्ने नद्यां जने
तिलैः स्नात्वा कृतनित्यमपरिवार श्रीकृष्णपूजां करिष्य इति संकल्प्य कांचनीं राजतीं ताम्रीं पैत्तलीं मृन्मयीं त
था॥ वार्क्षीं मणिमयीं चित्रवर्तिकालिखितां वाथ वे सुलक्षणां तत्मेन प्रतिमां विधाय आग्न्युत्तारणं कृत्वा प्रतिमा
रूपे लीयस्वानं देवतानां मूलमंत्रं प्राणान् वादिवतुर्थ्यंतं नाम वा अस्मिन् देवत्वं संस्थाप्य पैत्याहितिवमंत्रे पठन्नात्मप्रति
ष्ठां कुर्यात्॥ अस्मिन् स्वस्थाने तत्र देवतानाम ग्राह्यं॥ गायद्भिः किंनराद्यैः सततपरिवृतां वेणुवीणानि
नादैः भृंगारादर्शकुंतप्रवर कृतकरैः किंनरैः सेव्यमाना॥ पर्यंकस्थास्तृते या मुदिततरमुखी पुत्रिणी सम्यगा
स्ते सा देवी देवमाता जयति सुवदना देवकी दिव्यरूपा॥ इति देवकीं मां वा पिवालकं सुतं पर्यंके स्तनपायिनं॥ श्रीवत्स

वक्षसं शांतं नीलोत्पलदलच्छविमिति श्रीकृष्णं च ध्यात्वा नमो देव्यै श्रियै इति श्रियं देवकीसहितं वसुदेवं यशो
दासहितं नंदं॥ श्रीकृष्णसहितं बलदेवं चंडिकां च नमोंतैर्नाममंत्रैः पूजयेत्॥ तत्र मंत्राः योगेश्वराय देवाय यो
गानां पतये विभो॥ योगोद्भवाय नित्याय गोविंदाय नमोनमः॥ स्नाने॥ यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च॥ यज्ञा
नां पतये नाथ गोविंदाय नमोनमः॥ धूपदीपे॥ विश्वेश्वराय देवाय तथा विश्वोद्भवाय च॥ विश्वस्य पतये तुभ्यं गो
विंदाय नमोनमः॥ नैवेद्ये॥ गाहडेतु॥ यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसंभवाय गोविंदाय नमोनमः इत्य द्रसि वेध्या
यज्ञपदानं स्थाने योगपदान्युक्त्वा यमेव मंत्रः स्नाने विश्वाय विश्वेश्वराय इत्यादि धूपे नैवेद्ये धर्माय धर्मेश्वराय इत्या
दिः स्वाहांतस्तिलहोम॥ विश्वाय विश्वेश्वराय इत्यादिः शयने॥ सोमाय सोमेश्वराय इत्यादिभिर्द्वपूजा पाठमिति मंत्राउक्ताः॥
ततो गव्यघृतेनाज्ञो वसोर्धाराः कृत्वा दिदं घृतेनेति॥ ततो जातकर्मनालच्छेद षष्ठीपूजा नामकर्माणि स्वतंत्रेण ताक
यानि॥ ततश्चंद्रोदये रोहिणीयुतं चंद्रं स्थंडिले प्रतिमायां वा नाममंत्रेण संपूज्य शंखे तोयं समादाय पुष्पकुशचं
दनं॥ जानुभ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत्॥ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव॥ गृहाणार्घ्यं शशांके
मं रोहिण्या सहितो मम॥ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः॥ नमस्ते रोहिणीकांत सुधावा
स नमोस्तु ते॥ नमो मंडलदीपाय पापक्षितिरत्नाय धर्जटिः॥ कलानिधिर्वर्धमाय नमश्चंद्राय वारवरतिप्रतामेत॥ ततः अन
घं वामनं शौरिं वैकुंठं पुरुषोत्तमं॥ वासुदेवं हृषीकेशं माधवं मधुसूदनं॥ वाराहं पुंडरीकाक्षं नृसिंहं दैत्यसूदनं॥ दा

स०म० मोस्तं पद्मनाभं केशवं गरुडध्वजं॥ गोविंदमच्युतं कृष्णमनंतमपराजितं॥ अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारिणं॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमं॥ नारायणं चतुर्बाहुं शंखचक्रगदाधरं॥ पीतांबरधरं नित्यं वनमालावि
भूषितं॥ श्रीवत्सांकं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिं॥ शरणागतं प्रपद्येहं सर्वकामार्थसिद्धये॥ प्रणमामि सदा दे
वं वासुदेवं जगत्पतिमिति मंत्रैः प्रणम्य त्राहि मां सर्वलोकेश हरे संसारसागरात्॥ त्राहि मां सर्वपापघ्न दुःखशोकार्ण
वाद्धरे॥ दुर्गतिस्त्रायसे विष्णो ये स्मरंति सकृत्सकृत्॥ सोहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात्॥ पुष्कराक्ष निम
ग्नोहं मायाविज्ञानसागरे॥ त्राहि मां देवदेवेश त्वत्तो नान्योस्ति रक्षिता॥ यद्बाल्ये यच्च कौमारे यौवने यच्च वार्द्धके॥ त
त्पुण्यं वृद्धिमाप्नोतु पापं हर हलायुधेति मंत्रैः प्रार्थयेत॥ ततः स्तोत्रपठनपुरासरं वादित्रादिना जागरणं कुर्यात्॥ द्वि
तीयेह्नि प्रातःकालीनं नित्यं कृत्वा पूर्ववद्देवं पूजयित्वा ब्राह्मणान् भोजयित्वा तेभ्यः स्तुवर्णं धेनुवस्त्रादिकं श्रीम
द्भीयतामिति दानं दत्वा॥ यं देवं देवकी देवी वसुदेवादजीजनत्॥ भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः॥ सुजन्म
वासुदेवाय गोब्राह्मणहिताय च॥ शांतिरस्तु शिवं चास्त्विति मंत्रेणं प्रतिमामुद्वास्य तां ब्राह्मणाय दत्वा पारणं कृत्वा व्रतं
समापयेत॥ सर्वाय सर्वेश्वराय सर्वपतये सर्वसंभवाय गोविंदाय नमो नम इति पारणामंत्रः॥ भूताय भूतपतये तयर
त्यादिसमापने च मंत्रः॥ ० उद्यापनमकृत्वाप्यस्ति एवं यथोक्ततिथौ व्रतं कृत्वा परदिने पारणां कुर्यात्॥ ब्रह्मकैवर्ते॥ राम
२६

अष्टम्यामथ रोहिण्यां न कुर्यात्पारणां क्वचित्॥ हन्यात्पुराकृतं कर्म उपवासार्जितं फलं॥ तिथिरष्टगुणं हंति नक्षत्रं
च चतुर्गुणं॥ तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणामिति॥ तत्र दिवसे उभयांते पारणमिति मुख्यः कल्पः॥
एकतरांते तत्त्वनुकल्पः॥ तत्र यदि तिथिनक्षत्रयोरन्यतरस्य वांतो रात्रौ भवति तदा तदंते रात्रौ च न कुर्यात् किंतु दिवै
व॥ सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते॥ अन्यथा पुण्यहानिः स्याद्दते धारणपारणमिष्यते॥ अन्यथा पुण्य
हानिः स्यादृते धारणपारणामिति ब्रह्मकैवर्ते निषेधात्॥ अन्यतिथ्यागमो रात्रौ तामसस्ते तमो दिवा॥ तामसे पार
णां कुर्वन्तामसीं गतिमाप्नुयादिति गरुडपुराणाच्च॥ यत्तु केनचिदुक्तं तिथिनक्षत्रयोगादिर्वा पारणा स्यात्संभवा त्राव
पिकार्यं तदुक्तं माधवीये स्मृत्यंतरे॥ तिथ्यंते चोत्सवांते हा छेदेन नक्षत्रांतमथापि वा॥ अर्धरात्रेथवा कुर्यात्पारणां त्वप
रेह्नि तीति॥ ब्रह्मांडपुराणे तु यिनरात्रौ पारणां कुर्यादिति ते वै तेहि रात्रिव्रतानि॥ तत्र निषेधपि तत्कुर्यादिनत्ये पितामहा निशामि
ति पूर्वोदाहृतं तुसामान्यवाक्यद्वयं जन्माष्टमीपारणातिरिक्तपारणापरमिति तन्न ब्रह्मांडीयवचने तावदपि शब्द
श्रवणादपि वेदांतरंगरतादृतितु त्वार्थत्यागे नो भयं तादृशः प्रतीयते एवं वस्तुत्पपत्तिर्न भवति न सामान्यवचने
बाधकत्वमेतस्य युज्यते॥ यदपि तिथ्यंते चोत्सवांतेति वचनं तत्राप्येकं पदमेकत्रान्वितमन्यत्र विना बलवद
नुपपत्याना न्वेती तिन्यायाद्धारात्रे यदोभयांतत्तदावचनांतरबोधितेदिनएव पारणां कुर्यान्निवृत्तरात्रिपारणामि

स.म. त्विंवणं।।यापश्चायंतनी पि सिद्धः।।यथा वमसमन्यां श्रमसां श्रमस्तिनो मत्तयंति अथैतस्पहारियोननस्पसर्वदे
व लिप्संत इत्यत्र वमस्ति पदस्पहारियो जनानां च यानम्पुपगामात।।किंवा त्व यापि विपरेह नीत्पस्पा विवक्षां मीक्षिप
वए व।।अन्यथा ततीयदिनेपारणापत्तिः।।पदप्पत्र माधवेनोक्तं।।अर्द्धत्रएबदिनरात्रिमात्रं गत्वनरतितद
पिप्रमाणाभावेनेवापात्तं।पद्यविवज्ञानदादिनस्पैवग्रहणे बि त्यात।।तस्मादस्मदुक्त एवपक्षः श्रेयान्।तत्र शक्त
उभयांतेनेऽशक्तत्वन्पतरांतेउत्सवांतेवा।तिथ्यंतेवोत्सवांतेवान्नतीक्रीडीतपारणामितिकालादर्शादिनिबंधव
चनात।।इत्सवांते जागरणघुत्सवांते।। ।।भाद्रशुक्लाष्टमी दूर्वाष्टमीसर्वविद्धा।शुक्लाष्टमीतिथिर्यातुमासिभा
द्रपदेभवेत्।दूर्वाष्टमी नु सा ज्ञेया नोत्तरा सा विधीयतइति।।इयं च पूर्वविद्धा।।तदुक्तं बृहद्यमेन।।श्रावणी दुर्गनव
मी दूर्वा च कृताशनी।।पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति।।अत्र च स्त्रीणामेवाधिकारो न पुंसां।।यान
पूजयते दूर्वां मोहाद्याविधि।।जन्मानि त्रीणि विधवा लभते नात्र संशय।।तस्मात्संपूजनीयासा प्रतिवर्षं वधूज
नैरितिचंद्रप्रकाशे प्रजातायां प्रसूतायामुदुस्यांकरणे वैधव्यपानिषेधस्तेनेः।।अतएव नित्यमपीदं।।एतद्दं च व्रतम
द्रशुक्ले ऽगस्त्योदयसंभावनायां भाद्रकृष्णाष्टम्यां कार्य।।शुक्लेभाद्रपदेमासि दूर्वासिज्ञातथाष्टमी।।सिंहार्कए
व कर्तव्या न कन्यार्केकदाचन।।सिंहस्थे वोत्तमा सूर्ये नु दितेमुनिसत्तमेहतिगोविंदात विरक्तां दाता।।अत्र कन्यामुत्ते राम

मदरत्न त्वेम विष्णुपुराणे।।भुवो देशोप्रजातायां दूर्वायां ब्राह्मणोत्तम।।स्थाप्प लिंगं ततो गंधैः पुष्पैर्धूपैः समर्च
येत्।।दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दत्वा त्रिलोचने।।दूर्वाशमीभ्यां विधिवत्पूजयेच्छ्रद्धया पुता।।तत्रमंत्रः।।त्वं दूर्वेम
तजन्मासि वंदितासि सुरैरासुरैः।।सौभाग्यं संततिं देहि सर्वकार्यकरी भव।।यथा शाखाप्रशाखाभिर्विस्तृतासि म
हीतले।।तथा ममापि संतानं देहि त्वमजरामरमिति।।भ दपनियमोश्चिभविष्ये।अन्नमग्निपक्वमश्नीयाद्दन्तं दधि
फलं तथा।।अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनायुतमिति।।इयं च ज्येष्ठामूलयुक्ता रोहिणा मुहूर्तव्यापिनी ग्राह्या।।
मुहूर्तेति हिरण्यप्रापं दीवापदिवापरा।।दूर्वाष्टमीतु सा कार्या ज्येष्ठामूलं वर्जयित्वेति पुराणसमुच्चयात्।
दिनद्वये रोहिते ज्येष्ठामूलयोगे तदभावे वा पूर्वैवाश्रावणी दुर्गनवमीतिपूर्वोक्तिवाक्यात।।अत्रैव ज्येष्ठापूजन
लेगोक्न्याकेयाष्टमी शुक्ला ज्येष्ठक्षेत्रेमिहतीक्षिता।।अलक्ष्मी परिहारापऽस्पांत त्रप्रमुक्तपेत।।तथा।।मा
सिभाद्रपदे शुक्ले पक्षेज्येष्ठर्क्षसंयुते।।यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति।।केचिदेकैपं ज्येष्ठा
योगवशान्नग्राह्या न तत्रयोगाभावेतु परैव पूर्वेद्युरात्रौ नक्षत्रयोगे तु पूर्वैव।।तथा वमैत त्रैवानवमीसहिता
कार्याष्टमी नात्र संशयः।।मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते।।रात्रिर्यस्मिन्दिने कुर्यात्ज्येष्ठायाः पा
परिपूजनमिति।तत्रैव।यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः।।तस्मिन्विष्णुं पूजयेत्जावन्नूनावितूर्वबाम

स०म० रइतिा।शीर्षीत पूजादिनाम्पूर्वदिने नुराधायामावाहनमुत्तरदिनम् लेनविसर्जनं।तथा वसकांदोभैत्रे चावाहयेद्देवीं
ज्ये छायां तु प्रपूजयेत॥मूलेनविसर्जयेद्देवींत्रिदिनंव्रतमुत्तममिति।महालक्ष्मीयात्राप्यस्यामेवोक्ताकाशीखंडे॥
महालक्ष्म्यष्टमीप्राप्यतत्रयोत्राकृतानरेः॥संपूजितेहविधिवत्पक्षमासमनर्मुखतिरिति॥व्रतवंतस्तु एतदारभ्याश्वि
नकृष्णाष्टमीपर्यंतं षोडशदिनानिप्रत्यहं यात्रां कुर्युरितितिषिद्धाः॥अत्रव्रतमुक्तं पुराणसमुच्चये॥प्रियोर्वनं
भाद्रपदे सिताष्टमीप्रारभ्यकन्याममतेवसूर्येतमापयेत्तत्रतितिथिष्वयावत्सूर्यस्क्षपूर्वार्द्धगतोपुवत्याइति।कन्या
मगतेसिंहस्थेसूर्येप्रारंभः पुवत्यां कन्यायाः पूर्वार्द्धसूर्येवस्थितेसमाप्तिः॥त्यर्थः॥प्रथमारंभएवायंनिय
मः षोडशवार्षिके तत्प्रयोगातद्वितीयादिवर्षेतुननियमः॥एतच्चार्द्धरात्रातिक्रमवतीयामष्टम्याकार्यं।अर्द्ध
रात्रमतिक्रम्यवर्ततेयोत्तरातिथिः॥तत्रानुष्ठेयं धौकार्यमहालक्ष्मीव्रतंसदेति वंद्रप्रकाशेस्मृत्यंतरात्॥आश्वि
नशुक्लाष्टमीमहाष्टमीत्युच्यते॥तथाचब्रह्मपुराणे॥तत्राष्टम्यांभद्रकालीदक्षयज्ञविनाशिनी॥प्रादुर्भूतामहाघो
रायोगिनीकोटिभिर्वृता॥अं तत्राश्विनशुक्लपक्षे॥अतोत्रपूजनीयासातस्मिन्नहनिमानवैरित्याद्ययंचाष्टमीनव
मीयुक्ताग्राह्या।तथाचदेवीपुराणे॥सप्तमीवेधसंयुक्तायैःकृतातुमहाष्टमी॥पुत्रदारधनैर्हीनाभ्रमंतीहपि
शाचवदितिामदनरत्नेस्मृतिसंग्रहेपि।शरन्महाष्टमीपूज्यानवमीसंयुतांसदा॥सप्तमीसंयुतासदा॥सप्तमीसंयुता राम
२८
सदा॥सप्तमीसंयुतानित्यंशोकसंतापकारिणी॥जंभेनसप्तमीयुक्तापूजितावमहाष्टमी॥इंद्रेणनिहतोजंभ
स्तस्माद्दानवपुंगवः॥तस्मात्सर्वप्रयत्नेनसप्तमीसहिताष्टमी॥वर्जनीयाप्रयत्नेनसप्तमीसहिताष्टमी॥वर्जनी
याप्रयत्नेनमनुजैःशुभकांक्षिभिः॥सप्तमीकलयायत्रपरतश्चाष्टमीभवेत॥तेनशल्यमिदंप्रोक्तंपुत्रपौत्रक्षयप्रदं॥
तथापुत्रान्हंतिपशून्हंतिहंतिराष्ट्रंसराजकं॥हंतिजातानजातांश्चसप्तमीसहिताष्टमी।ति॥ब्रह्मवैवर्ते॥शुक्लपक्षे
ष्टमीचैवशुक्लपक्षेचतुर्दशी॥पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतेतिवचनं धृत्वेतिपुण्यमवचनंच॥अत्रनिर्मु
हूर्तन्यूनापिसप्तमीवर्ज्यनिर्णयोत्तिकानिर्मुहूर्तैवातथाचपुराणे॥सप्तमीशल्यसंयुक्तावर्जनीयासदाष्टमी॥स्तोका
पिसातिथिःपुण्यापस्यांसूर्योदयोभवेदिति॥स्तोकाकलाकाष्ठादिमात्रापीत्यर्थः॥इयमेवभौमयुक्ताति प्रश
स्ता॥अष्टम्यामुदितेसूर्येष्टदिनांतेनवमीभवेत॥कुजवारोभवेत्तत्रपूजनीयाप्रयत्नतइति।मदनोक्तस्मृत्यंतरात॥
नवमीयुक्तालाभेतुसप्तमीयुतैवकार्यानत्परा।तथैवसप्तम्यापियुताकार्यामूलेनापिविशेषतइत्यादीनिवच
नानि॥नवरात्राशक्तौत्रिरात्राद्युक्तंदेवीपुराणे॥नवंचात्रतिःशक्तस्त्रिरात्रंचैकरात्रकं॥व्रतंचरतियोभक्तस्त
म्मेयथास्थामिवांछितमिति॥केवलाष्टम्युपवासस्तुपुत्रवतानकार्यः॥उपवासंमहाष्टम्यांपुत्रवान्नसमाचरे
त॥यथातथावापूतात्मावतीदेवीप्रपूजयेदिति॥कालिकापुराणात॥मार्गशीर्षकृष्णाष्टम्यांकाशीखंडेकाशी

सम० वासनिर्विघ्नतार्थं कालभैरवपूजोक्ता ॥ कृत्वा च विविधां पूजां महासंभारविस्तरैः ॥ नरो मार्गसिताष्टम्यां वर्षविघ्नं वि
मुञ्चति ॥ तत्रैव तीर्थे कालोदके स्नात्वा कृत्वा तर्पणमव्ययम् ॥ विलोक्य कालराजानं निरयादुद्धरेत्पितॄन् ॥
तिं पोषरामप्युक्तं मस्यामिव काशीखंडे ॥ मार्गशीर्षसिताष्टम्यां कालभैरवसंनिधौ ॥ उपोष्य जागरं कुर्यात्स
र्वपापैः प्रमुच्यते इति ॥ अत्रोपोषणांगतया अर्घ्यदानमपि कार्यमिति शिवरहस्ये ॥ अत्रोपवासजागरण
योः प्रधानयोरहोरात्रसाध्यत्वेनाहोरात्रयुता पूर्वविद्धा ग्राह्या ॥ अहोरात्रव्रतपक्ष एकभक्तनियोगतः ॥ तस्या मु
ख्ययोगिन्याभावे तद्युतं व्रतमिति स्मृतेः ॥ यदा तु पूर्वदिने सायाह्नादुत्तरप्रदोषे तु स्यात्तदापि पूर्वैव ॥ रुद्रव्रतेषु स
र्वेषु कर्तव्या संमुखी तिथिरिति ब्रह्मवैवर्तात् ॥ यत्तु कश्चिदुपोषणोत्तरस्याङ्गभूतमर्घ्यदानमिति शिवरहस्यात् उपो
षणमेव प्रधानं न जागरणमिति । तत्तुच्छं अर्घ्यदानस्योपोषणांगत्वेपि जागरणे तदयोगात् ॥ यदपि मध्या
ह्नसंस्थितेरवाविष्ट्यपक्रम्य तदीयरूपादनयान्मन्त्रः श्रीकालभैरवः ॥ आविरासीत्ततो लोकान् भीषयन्नखि
लानपीति ॥ शिवरहस्ये मध्याह्ने कालभैरवाविर्भावात्तद्व्यापिनी ग्राह्येति कश्चित् ॥ तदपि तुच्छं शिवरहस्ये मध्या
ह्नोत्तरं कृत्तिवासेश्वरप्रादुर्देवा बिन्दाहिंसाध्वनाद्युत्पादिनाभूयः कर्मकालापमुक्ता भैरवाविर्भावं चोक्त्वानुप
दमेव सर्वाप्यस्तमुपागमदित्युक्तं ॥ तत्र मध्याह्ने पराह्ने सायाह्ने वा विर्भावानिश्चयात् ॥ अस्तु वा मध्या

ह्न आविर्भावस्तथापि तत्कालीनस्याव्रतार्यामानाभावः न त्याविर्भावकालीनस्याव्रतेति षा समस्ति किंचित् ॥ जन्माष्ट
म्यादेस्तु पूजाख्यकर्मकालत्वेन निशीथव्यापिनी ग्राह्येत्यर्कं ॥ नत्र न्मकान तयोति संक्षेपः ॥ माघशुक्लाष्टम्यां भीष्म
तर्पणं ॥ आह्निके हेमाद्रौ पाद्मे ॥ माघमासि सिताष्टम्यां सतिलं भीष्मतर्पणं ॥ आद्धं च ये नराः कुर्युस्ते स्युः संततिभा
गिन इति ॥ तर्पणमंत्रस्तु भारते ॥ भीष्मः शांतनवो वीरः सत्यवादी जितेंद्रियः ॥ आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियां ॥
वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च ॥ अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥ वसूनामवताराय शंतनोरात्म
जाय च ॥ अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिणे इति ॥ पाद्मे ब्राह्मणाद्याश्च ये वर्णाः दद्युर्भीष्माय नो जलं ॥ संव
त्सरकृतं तेषां पुण्यं नश्यति सत्तमेति ॥ इदं च जीवत्पितृकोपि कुर्यात् निषेधाभावात् ॥ यत्तु सपितुः पितृकृत्येषु ना
धिकारः कथंचनेति ॥ निषेधः स पित्र्यकर्मपर इति दिक् ॥ ॥ इत्यष्टमी ॥ ॥ अथ नवमी ॥ सा तु पूर्वा वसुरंध्रयोरिति यु
ग्मवचनात् ॥ ब्रह्मवैवर्तेपि ॥ अष्टम्या नवमी विद्धा कर्तव्या फलकांक्षिभिः ॥ न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति ॥
चैत्रशुक्ला नवमी रामनवमी सा परविद्धा मध्याह्नव्यापिनी ग्राह्या ॥ तदुक्तमगस्त्यसंहितायां ॥ चैत्रशुद्धा तु नवमी पुन
र्वसुयुता यदि ॥ सैव मध्याह्नयोगेन महापुण्यतमा भवेदिति ॥ नवमी चाष्टमी विद्धा त्याज्या विष्णुपरायणैः ॥ उपोष
णं नवम्यां वै दशम्यां पारणं भवेदिति वचनाच्च ॥ तत्रैव चैत्रमासि नवम्यां तु जातो रामः स्वयं हरिः ॥ पुनर्वस्वृक्षसंयुक्ता

सम॰ सातिथिः सर्वकामदा ॥ श्रीरामनवमीप्रोक्ता कोटिसूर्यग्रहाधिका ॥ तथा केवलापि सदोपोष्या नवमी शब्दसंग्रहात् ॥
तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतं ॥ उपोषणं जागरणं पितॄनुद्दिश्य तर्पणं ॥ तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्ति
मभीप्सुभिः ॥ अत्र पूर्वदिन एव मध्याह्नव्यापिनी चेत्पूर्वा ॥ दिनद्वये तद्व्याप्तावव्याप्तौ वैकदेशसमव्याप्तौ वसनत्ता
त्रावेत्पूर्वान्विघोत्तरेति ॥ अष्टमीविद्धा निषिद्धा दितिः ॥ तत्रैवागस्त्यः रामनवम्यां तु भुंक्ते मोहाद्धि मूढधीः ॥ कुंभी
पाकेषु घोरेषु पच्यते नात्र संशयः ॥ त्यकरणे प्रत्यवायश्रवणात् नित्यं फलश्रुतेश्च काम्यं रामनवमीव्रतं यत्तु तदुक्तानां
मेव नित्यमिति तन्न सर्वकोनिमानाभावात् ॥ जन्माष्टमी शिवरात्र्यादि व्रतेष्वपि तथात्वापत्तेः ॥ अथ व्रतपद्धतिः ॥ व्रतपू
र्वदिने सायंदंतधावनं व्रतदिने प्रातः सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपा ॥ पवनो दिक्पतिर्भूमिराकाशं
खचरा नराः ॥ ब्राह्मं शासनमास्थाय कल्पध्वमिह संनिधिं मितिउक्ता फलपुष्पाक्षतसहितजलपूर्णं ताम्रपात्रं
गृहीत्वा मासाद्युल्लिख्य पापक्षयकामो मुक्तफलकामो वा श्रीरामचंद्रप्रीतये श्रीरामनवमीव्रतमहं करिष्ये इत्युपो
ष्य नवमीत्वद्य यामेष्वष्टसु राघव तेन प्रीतो भव त्वं भोः संसारात्त्राहि मां हरे इत्युक्त्वा पात्रस्थं जलं क्षिपेत् ॥ ततः श
क्तितो हेमीं रामप्रतिमां कृत्वाग्न्युत्तारणपूर्वकं कपोलौ स्पृष्ट्वा मूलमंत्रं प्रणवादिचतुर्थ्यंतं नामरामायेद्येवत्व
संख्याये स्वाहेति वं मंत्रं पठन् प्राणप्रतिष्ठां कुर्यात् ॥ ततः कोमलांगं विशालाक्षमिंद्रनीलसमप्रभं ॥ दक्षिणां राम
३०

गे दशरथं पुत्रावेक्षणतत्परं ॥ पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभं ॥ पार्श्वे भरतशत्रुघ्नौ तालवृंतकरावु
भौ ॥ अग्रेऽव्ययं हनूमंतं रामानुग्रहकांक्षिणमिति ध्यात्वा षट्कोणमध्ये पूजयेत् ॥ श्रीरामप्रतिमासमीपे षट्को
णमध्ये कौशल्यां दशरथं च पूजयेत् षट्कोणेषु रां हृदयाय नमः ॥ रीं शिरसे स्वाहा ॥ रूं शिखायै वषट् ॥ रैं कवचा
य हुं ॥ रौं नेत्रत्रयाय वौषट् ॥ रः अस्त्राय फट् इति हृदयादीनि षट् ॥ षट्कोणाद्बाह्ये अष्टदलकमलदलेषु ह
नूमंतं सुग्रीवं भरतं बिभीषणं लक्ष्मणमंगदं शत्रुघ्नं जांबवंतं च दलमध्येषु धृष्टिं जयंतं विजयं सुराष्ट्रं राष्ट्र
वर्धनमकोपं धर्मपालं सुमंत्रं च दलाग्रेषु इंद्रमग्निं यमं निर्ऋतिं वरुणं वायुं कुबेरमीशानं चाष्टौ लो
कपालान् तदग्रे वज्रं शक्तिं दंडं खड्गं पाशमंकुशं गदां शूलं चेति तेषामायुधानि च पूजयेत् ॥ श्रीरामपूजायां
मूलमंत्रः वैदिको वा वेदवः प्रणवादिचतुर्थ्यंतं नमोऽंतं नाम चा मंत्रः ॥ इंद्रोग्निर्यमश्चैव नैर्ऋतो वरुणो
निलः ॥ कुबेर ईशो ब्रह्मा हि दिक्पालाः स्मृताः पंतु तर्पितस्तानि रामस्य जननी चासि रामात्मकमिदं जगत् ॥ अ
तस्त्वां पूजयाम्यद्य लोकमातर्नमोऽस्तु ते ॥ इति कौशल्यापूजायां ॥ ॐ नमो दशरथायेति दशरथपूजायां ॥ इत
रेषां मूलमंत्रः प्रणवादिचतुर्थ्यंतं नमोंतं नामानि वा ॥ उच्चस्थे ग्रहपंचके सुरगुरौ सिंहे नवम्यां तिथौ लग्ने क
र्कटके पुनर्वसुदिने मेषं गते पूषणि ॥ निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणेराविर्भूतमभूत

स०न० पूर्वविद्धैव यत्किंचिद्विद्धं महदिति मध्याह्ने जन्मभावना॥ वाद्यादिवादनं च पुष्पांजलेः पूर्वं फलपुष्पांबुसंपूर्णं गृ
हीत्वा शंखमुत्तमं॥ अर्घ्यं करतले कुसुमैर्युक्तं च तुलसीदलैः॥ दशाननवधार्थाय धर्मसंस्थापनाय च॥ दानवानां
विनाशाय दैत्यानां निधनाय च॥ परित्राणाय साधूनां जातो रामः स्वयं हरिः॥ गृहाणार्घ्यं मया दत्तं भ्रातृभिः
सहितो ममेति मंत्रेणार्घ्यं दद्यात्॥ पुष्पांजलिं पुनर्दत्वा क्षमापयेत्ततः॥ पूजयन् विधिवद्दत्वादिना
रात्रं नयेद्बुध इति ततः स्तोत्रपाठपुराणश्रवणादिभी रात्रौ जागरं कृत्वा द्वितीयेह्नि प्रातःकालीनं नित्यं कृत्वा
पूर्ववदेव श्रीरामं परिवारं स्वनाम्नाभ्यर्च्य संपूज्य विप्रान् संभोज्य श्रीरामो मे प्रीयतामिति तेभ्यः सुवर्णधेनुवस्त्रादि दत्वा
प्रतिमामुपास्य तां विप्राय दत्वा पारणां कृत्वा व्रतं समापयेत्॥ आश्विनशुक्लनवमी महानवमीत्युच्यते। तदुक्तं
प्रतापमार्तंडे लैंगे। दुर्गापूजासु नवमी मूलाधृ घनत्रयान्विता॥ महती कीर्तिता तस्यां दुर्गां महिषमर्दिनीमिति।
पूजयेदिति शेषः॥ तत्र पूर्वविद्धा ग्राह्या युग्मवाक्यात्॥ बृहद्धर्मेपि॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति। अस्यामेव दुर्गापूजनहोमबलिदानादिकार्यमिति तत्रमार्तंडे॥ नव
म्यां बलिपूजाहोमं समाप्य विधिवद्बलिमिति ब्रह्मवैवर्तेपि॥ अत्रापराह्णे के काले बलिदानं प्रशस्यते॥ दशमीव
र्जयित्वात्र नात्र कार्या विचारणेति॥ तेन नवम्यामुपक्रम्य नवम्यामेव समापयेत्। गौडनिबंधेप्येवं॥ केचिद्दशम्यां राम ३१

मारभ्य नवम्यां समापयंति। तत्र मूलं शिष्टाचार एव। अत्र यामलतंत्रे विशेषः॥ पायसं सर्पिषा युक्तं तिलैः शुक्लैः
समन्वितं मिश्रितं॥ होमयेद्विधिवत्तत्र दशांशेन नृपोत्तम॥ रुद्राध्याये पथ्यां होमं मंत्रेणानेन साधयेत्॥ रुद्रया
मलेपि प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा॥ किंशुकैः सर्षपैः पूगैर्नालिकेरैरपि॥ पंचबिल्वीफलैर्दा
डिमैर्नानाविधफलैरपि॥ रक्तचंदनखंडैश्च गुग्गुलैश्च मनोहरैः॥ प्रतिश्लोकं च जुहुयात् सर्वद्रव्याणि चक्रमादि
ति। परंतु केचित् अष्टम्यां जागरं कुर्यान्नवम्यां पारणं तथा॥ दशम्यां च विसर्गस्याद भिषेकः क्षमापनं चेति रुद्रया
मलात्॥ नवम्यां च विशालाक्ष कार्या होमादिका क्रिया॥ पारणं च प्रकुर्वीत देवीभक्तो न पूर्वके॥ दशम्यामि
श्रिता यत्र पारणं नवमी भवेत्॥ सद्यः जन्मकृतं पुण्यं नश्यत्येव न संशयः॥ तथा॥ यो मोहात्पारणं कुर्याद्दशमे
दिवसे विभो॥ तद्गृहं नाशमायाति द्रुमिश्यादि भयं भवेत्॥ नृपहीनं भवेद्राष्ट्रं दशम्यां पारणं कृते॥ तस्मा
त्पारयेद्देव नवम्यां भक्तितत्परः॥ नवम्यां पारिता देवी कुलवृद्धिप्रदा भवेत्। दशम्यां पारिता देवी कुलनाशकरी
तिदे॥ तस्मात्पारणं कुर्यान्नवम्यां विबुधाधिपेति देवीपुराणात्॥ दुर्गायां नवम्यामेव नवरात्रपारणमित्याहुः॥ त
त्र॥ एवं च विधिवत्वासिन्यां नवरात्रोपवासतः एकभक्तेन नक्तेन तथैवायाचितेन वा॥ अथवा नवनक्तैश्च नवरा
त्रं समापयेदिति भविष्यादिवचोभिरुपवासादिषु विहितस्य नवतिथ्यधिकरणताकस्य व्यवधानपत्तेः॥ अस्मि

स म० चाकःएकभक्तादिशब्दसमभिव्याहारितानवरात्रेसमापयेदितिनामधेयांतरसत्वाच्च नवतिविरूपगुणावि
धिरेवयुक्तोनवरात्रोपवासइतिननामधेयं।नवमीपारणाविधायकानिदशमीनिषेधकानिवपूर्वोक्तानिव
र्चानितुमहानिबंधादिष्वदर्शनात्प्रायोनिर्मूलान्येवसमूलत्वेपितेषांपूर्वेद्युरष्टमीविद्धत्वेननवमीप्रयुक्तउ
पवासेजातेपरेद्युरवशिष्टांकिंचिन्नवमीसत्वेनवम्यंतःपारणाविधायकत्वं॥नक्तंत्रोपवासबाधकत्वं।ए
वंचसर्वेषामुपवासानांप्रातरेवहिपारणामितिवचोवगतावशिष्टनवम्यंतःपारणाप्योपोष्यतिथ्यंतःपा
रणाविधिनाबाधितस्यप्रतिप्रसवविधित्वेनेषांलाघवं॥अन्यथाप्राप्तविधितयागौरवं।।अतश्चदशम्यां
पारणानकार्यमित्येतेषामनुवादकत्वमेवनविधायकत्वं।विस्तरस्त्वत्रतातचरणकृतेद्वैतनिर्णयेज्ञेयः॥
पारणांतुसूतकेपिकार्यं॥तदुक्तंरुद्रयामले॥सूतकेपारणांकुर्यान्नवम्यांहोमपूर्वकमिति॥एवंस्त्रीभिरपि
रजोदर्शनमध्येकार्यंतदाहसत्यव्रतः॥प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत्॥नतत्रापिव्रतस्यस्यादु
परोधःकदाचनेति॥एतच्चसधवापरंतेषांविधवायास्तुत्रिरात्रमध्येभोजननिषेधादितिकेचित्तन्न।निषेध
स्यरागप्राप्तभोजनगोचरत्वेनवैधपारणाविषयत्वायोगात्॥वस्तुतस्तुरजस्वलायाविधवायाअपित्रिरात्रम
ध्येभोजननिषेधएव।।तद्दुष्यापमानादितिदिक्॥ ॥इतिनवमीनिर्णयः॥ ॥अथदशमी॥सानुक्तत्वापूर्वा राम
३२

भुक्तोत्तरा॥संपूर्णादशमीकार्यापरयापूर्वयाथवा॥युक्तानदूषितायस्मादितिसासर्वतोमुखीतिअंगिरःस्मृ
तेः॥अत्रपंचविकल्पोव्यवस्थितः॥शुक्लपक्षेतिथिर्ग्राह्यायस्यामभ्युदितोरविः॥कृष्णपक्षेतिथिर्ग्राह्यायस्या
मस्तमितोरविरितिवचोंतरात्।माधवमतेप्येवं।पक्षेहेमाद्रिर्दिनद्वयेकर्मकालव्याप्त्यभावेऐच्छिकोविकल्प
इतन्न।शास्त्रतोव्यवस्थासंभवेऐच्छिकत्वायोगात्।उपवासेतुसर्वापिसवमतेपूर्वैवनागविद्धातुयाषष्ठीशिववि
द्धाचसप्तमी॥दशम्येकादशीविद्धानोपोष्यास्याकथंचनेतिशिवरहस्योक्तेः।पक्षेप्रेतापमार्तंडस्कांदेदशमीचैवक
र्तव्यासदुर्गाद्विजसत्तमेतितदप्युपवासपरं।ज्येष्ठशुक्लदशमीदशहरा।ज्येष्ठेमासिसितेपक्षेदशमीहस्तसंयु
ता॥हरतेदशपापानितस्माद्दशहरास्मृता॥तस्यांस्नानंप्रकुर्वीतदानंचैवविशेषतः।इतिहेमाद्रौब्राह्मोक्तेः॥दश
पापानिवाहमनुः॥पारुष्यमनृतंचैवपैशुन्यंचापिसर्वशः॥असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधं॥अदत्ता
नामुपादानंहिंसाचैवाविधानतः॥परदारोपसेवाचकायिकंत्रिविधंस्मृतं।परद्रव्येष्वभिध्यानंमनसानि
ष्टचिंतनं।वितथाभिनिवेशश्चत्रिविधंकर्ममानसमिति॥स्कांदेपिज्येष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः॥
व्यतीपातेगमेरानंदेकन्याचंद्रेवृषेरवौ॥दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यते॥इतिइयंचयोगविशेष
वशात्पूर्वापरावाग्राह्या॥काशीखंडेदशाश्वमेधिकेस्नात्वामुच्यतेसर्वपातकैः॥लिंगेदशाश्वमेधिकेघस्यदशह

राम

रादिषु दशजन्मार्जितैः पापैस्त्यक्तेनात्र संशयः ॥ स्कान्दे ॥ पाके विनिर्मितं प्राप्य दद्याद्धर्म्यं तिलोदकं ॥ मुच्यते द
शभिः पापैः समहापातकोपमैः ॥ यदाऽधिको मलमासो भवति तदा मलमास एव कार्या ॥ दशहरासु नोत्कर्ष इत्यु
क्तिपुत्रादिषु ॥ उपाकर्म महालय [illegible] इति हेमाद्रौ ऋष्यशृंगोक्तेः ॥ आश्विन शुक्ल दशमी विज
यदशमीत्युच्यते । सा तु शमीपूजायात्रादौ नवम्यां दशमी व्यापिनी ग्राह्या ॥ तदुक्तं रत्नकोशे ॥ ईषत्संध्यामति
क्रान्तः किंचिदुद्भिन्नतारकः । विजयो नाम कालोयं सर्वकार्यार्थसाधक इति ॥ चिंतामणावपि ॥ आश्विनस्य सिते पक्षे
दशम्यां तारकोदये ॥ स कालो विजयो ज्ञेयः सर्वकार्यार्थसिद्धये ॥ दिनद्वये तद्व्याप्तौ पूर्वैव ॥ या पूर्णा नवमीयुक्ता
तस्यां पूज्यापराजिता ॥ क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः ॥ नवमीशेषयुक्तायां दशम्यामपराजिता ॥ दद्या
ति विजयं देवी पूजिता जयवर्द्धिनी ॥ एकादश्यां न कुर्वीत पूजनं चापराजितमिति स्कांदोक्तेः ॥ तत्रैवा दशमीप
स्य मुहूर्तं घ्यप्रच्छन्न कुरुते नरः ॥ तस्य संवत्सरं राज्ये न क्वापि विजयो भवेदिति ॥ दिनद्वये तारकोदयकालव्या
प्तौ परदिने एकादशमुहूर्ते यात्रा कार्या आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु ॥ सायंकाले शुभा यात्रा दिवावा
विजयप्रदा ॥ एकादशो मुहूर्तोपि विजयः परिकीर्तितः ॥ तस्मिन्सर्वैर्विधातव्या यात्रा विजयकांक्षिभिरिति
भृगूक्तेः ॥ परदिने एकादशमुहूर्तव्याप्त्यभावे [illegible] तदेव यात्रा कार्या ॥ पूजा तु पूर्वदिन एव [illegible] दश

राम ३३

मी किंचित्तु पूर्वैकादशी यदि ॥ श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा इति मदनरत्ने ज्योतिः ॥ श्रवणर्क्षे तु पूर्णायां
कांकुत्स्थः प्रस्थितो यतः ॥ उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नरा इति भविष्योत्तरोक्तेश्च ॥ अत्र कृत्यं भविष्ये ॥ शमी
मूल [illegible] तोपेतां ईशानाशां प्रति स्थिताम् ॥ संप्राप्य तां वसं पूज्य त्वीशानी सुमुखो भवेत् ॥ शमी शमयते पा
पं शमी लोहितकंटका ॥ धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ करिष्यमाणयात्रायां यथाकालं सुखं
मम ॥ तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ॥ गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदं ॥ गीतवादित्रनिर्घो
षेणानयेत्स्वगृहं प्रति ॥ ततो भूषणवस्त्रादि धारयेत्स्वजनैः सह इति दिक् ॥ ॥ इति दशमीनिर्णयः ॥ ॥ अथैका
दशी ॥ ॥ तत्रोपवासो नित्यः काम्यश्च ॥ तत्राद्यमाह सनत्कुमारः ॥ न करोति हि यो [illegible] पो मूढ एकादश्य
मुपोषणं ॥ स नरो नरकं याति रौरवं तमसावृतमिति गारुडे । उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति ॥
काम्यस्तु कौर्मे [illegible] सुतायुष्यं [illegible] संततिमात्मनः ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपीति स्कांदे
पि । [illegible] भक्तिं वा [illegible] ॥ एकादश्यामुपवसेत् पक्षयोरुभयोरपीति ॥ अथाधिकारी कौ
त्यायनः ॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिर्न्यूनवत्सरः ॥ एकादश्यामुपवसेत् पक्षयोरुभयोरपीति ॥ अष्टव
र्षाधिकस्योपनयनोत्तरत्वसिद्धेः ॥ अपि [illegible] पितृमातृ [illegible]

सम० एतच्च गृहस्थव्यतिरिक्तपरं॥ तदुक्तं कौर्मे। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। वनस्थयतिधर्मोयं शुक्ला-
मेव सदा गृही इति। एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ ब्रह्मचारी च नारी च शुक्लामेव सदा गृही इति। नारी
विधवा। ब्रह्मचारिसाहचर्यात्॥ सधवायास्तु पक्षद्वयेपि निषेधः। पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्॥
आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेदिति विष्णूक्तेः॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितं। पतिं शुश्रू-
षते या तु तेन स्वर्गे महीयत इति मनूक्तेश्च। तथा। यद्देवेभ्यो यच्च पित्रादिकेभ्यः कुर्याद्भर्ताभ्यर्चनं सत्क्रियां वा।
तस्यार्धं सा फलं नान्यचित्ता नारी भुंक्ते भर्तृशुश्रूषयैवेति। भर्त्राज्ञया तु सधवा पाप्यधिकारोस्त्येव।
भार्या पत्यमतिर्नैव व्रतादीनाचरेत्सदेति कात्यायनोक्तेः। वानुमत्यां तु गतां तु कन्याऽपि गृहिता पोष्या॥ शय-
नीबोधनीमध्ये या कृष्णैकादशी भवेत्॥ सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति पाद्मात्। एतच्च पु-
त्रगृहिविषयं॥ पुत्रवतस्तत्रापि निषेधः॥ संक्रांत्यामुपवासं च कृष्णैकादशिवासरे। चंद्रसूर्यग्रहे चैव न कुर्यात्
पुत्रवान्गृहीति नारदोक्तेः॥ आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः॥ पारणं चोपवासं च न कुर्यात्पुत्रवान्
गृहीति तत्प्रयुक्तोपवासस्यैव निषेधो यमुदाहृतः॥ प्रयुक्तांतरयुक्तस्य न विधिर्न निषेध नीमितिने मिनिस्मृते
श्च॥ स्मृत्यंतरेपि। विधवायाश्च वनस्थस्य यतेश्चैकादशीद्वये। उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः इति हेमा- राम ३४

द्रिरप्येवं। काम्यायां कृष्णापवादमाह नारदः। पुत्रवांश्च सभार्यश्च स्वबंधुयुक्तस्तथैव च। उभयोः पक्षयोः काम्यव्रतं कु-
र्यात्तु वैष्णवमिति॥ वैष्णवैस्तु कृष्णाप्युपोष्येत्याह स एव। नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः॥ पक्षे पक्षे च
कर्तव्यमेकादश्यामुपोषणं॥ स पुत्रश्च सभार्यश्च स्वजनो भक्तिसंयुतः॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपी-
ति। तत्रैकादशी द्विधा। शुद्धा दशमीविद्धा च॥ आद्या गारुडे। उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता॥ संपूर्णैकादशी
ज्ञेया तत्रैवोपवसेद्गृहीति। गृही वैष्णवः। स्मार्तविषये तु तत्रैव। आदित्योदयवेलायां आरभ्य षष्टिनाडिका॥ संपूर्णै-
कादशी नाम कार्या धर्मफलेप्सुभिरिति। दशमीविद्धापि द्विधा। अरुणोदये सूर्योदये च दशमीसत्त्वेन। तत्राद्यो भविष्यपुरा-
णे॥ अरुणोदयकाले तु दशमी यदि दृश्यते॥ सा विद्धैकादशी तत्र पापमूलमुपोषितं॥ तथा॥ अरुणोदयवेलायां द-
शागंधो भवेद्यदि। तत्तु प्रयत्नेन वर्जनीयं नराधिप॥ दिशादनशमी दशमीशेषसंयुक्तो यदि स्यादरुणोदयः। नै-
वोपोष्यं वैष्णवेन तद्दिने एकादशीव्रतं॥ इत्यादिभिर्वाक्यैररुणोदये दशमीसत्त्वे एकादशी विद्धा। यदपि सौरधर्मे॥ आ-
दित्योदयवेलायां या मुहूर्तद्वयान्विता। सैकादशी तु संपूर्णा विद्धान्या परिकीर्तितेति। तदप्यरुणोदयवेलायां दशमीस-
त्त्वे एकादश्यादिकृत्वपरमुहूर्तद्वयस्यारुणोदयपरिमाणत्वात् अत एव हेमाद्रेः सम्मतिः॥ निशि प्रान्ते तु यामार्धे देववादि-
त्रवादने॥ सारथ्येनाध्यधर्ते वारुणोदय उच्यते इति। यामार्धं मत्र मुहूर्तद्वयमेव। यत्तु उदयात्प्राक्तनस्तु नादिकाग्र-

स॰म॰ णोदयः इति तदपि द्वात्रिंशद्घटिकारात्रिमानपक्षे मुहूर्त्तद्वयस्य तावत्परिमाणत्वादुक्तमिति तात्पर्यतः॥ यदपि ब्र
ह्मवैवर्त्तीयं॥ चतस्रो घटिकाः प्रातररुणोदयनिश्चयः। चतुष्टयविभागोऽत्र वेधादीनां किलोदितः॥ अरुणोदयवेधः सा
र्द्धं तु घटिकात्रयं॥ अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः। महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते। तुरीये तत्र वि
हितो योगः सूर्योदये स इत्यरुणोदयवेधातिवेधमहावेधयोगास्तत्र करताम वर्ज्यदोषातिशयार्थं। सार्द्धं तु घटिकात्र
यं चतस्रो घटिका इति वद्द्विमुहूर्त्तत्वानुगतया व्याख्यातव्यं तो वस्तुतस्तस्यापि मुहूर्त्तद्वयस्य रात्रिमानवशेन कदाचित्सम
वान्मुहूर्त्तद्वयात्मारुणोदयपरमेवापत्तु ब्रह्मवैवर्ते॥ अर्द्धरात्रेस्तु केषांचिद्दशम्यां वेध इष्यते। कपालवेध इत्याहुराचा
र्या ये हरिप्रियाः इति तत्त्वे मुक्तिकरीत्या अरुणोदयवेधनिषिद्धमिति माधवः तत्त्वं तु पूर्वं चतुर्यामिषु व्रतसंकल्पप्रनाव
र्त्तनार्थमित्यनुपदमेव वक्ष्यते। यदपि नागो द्वादशनाडीभिर्दिक्संवदशभिस्तथा। भूतो द्वादशनाडीभिर्दूषयत्युत्तरां ति
थिमिति स्कांदं तत्सप्तवस्त्री क्तानिगमे॥ सर्वप्रकारवेधोऽयमुपवासस्य दूषकः। सार्द्धसप्तमुहूर्त्तैस्तु योगो यं बाधते व्रतमिति। व्र
तमुपवासभिन्नमिति माधवः। तत्रारुणोदयवेधो वैष्णवपरः। तद्वानेवैष्णवपरहतात्। परिशेषात्सूर्योदयवेधो वैष्णवभि
न्नपरः॥ तदेवस्मार्त्तदिनव्यवहृपं तेरग्रं येषु। वैष्णवत्वं तु तांस्तु गारुडे। वैष्णवा न स्मार्त्तागमोक्ता दीक्षां प्राप्तो हि वैष्णवः॥ मा
धवीयस्कांदेऽपि। परमापदमापन्नो हर्षे वा समुपस्थिते। नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ अन्यत्र॥ विष्णुर् राम
३५

ताविलावारः स हि वैष्णव उच्यते॥ भविष्येऽपि। यथाभुक्ता तथाकृत्वा मायया कृत्वा तथोत्तरा॥ तुल्ये ते मन्यते यस्तु स हि
वैष्णव उच्यते॥ तत्र शुद्धैकादशी चतुर्द्धा। अधिकैकादशिका॥ अधिकद्वादशिका॥ उभयाधिका॥ अनुभयाधिका वेति॥
एवं विद्धापि॥ शुद्धायामेकादश्याधिक्ये बृहद्यमः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ लुप्यते द्वादशी तत्र उपवा
सः कथं भवेत्॥ उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति॥ विष्णुप्रीणनतत्परा वैष्णवाः॥ नदितरस्मार्त्तास्त्रितु स्कांदे
॥ प्रथमेऽहनि संपूर्णा व्याप्याहोरात्रसंयुता॥ द्वादश्यां तु तथा तात दृश्यते पुनरेव च॥ पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा
विभो इति। एतच्च परेद्युर्द्वादश्यभावपरं॥ गारुडेऽपि॥ पुनः प्रभातसमये घटिकैका यदा भवेत्॥ तत्रोपवासो विहितो व
नस्थस्य यतेस्तथा॥ विधवायाश्च तत्रैव परतो द्वादशी न चेदिति॥ शुद्धायां द्वादशीमात्राधिक्ये तु मानावदः॥ नवैदेका
दशी विद्धा द्वादशी परतः स्थिता॥ उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति। विष्णोर्द्वादश्यां। उभयाधिक्ये तु शुद्धा
विद्धा वस्तवैः परैव कार्या॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति गारुडात्॥
यत्तु हेमाद्रौ पाद्मे। विद्धाप्यविद्धा वितिथा परतो द्वादशी न चेत्॥ अविद्धापि च विद्धा स्यात्परतो द्वादशी यदीति॥
तदप्युभयवद्धौतेयं॥ अनुभयाधिक्ये त्वसंदेह एव॥ विद्धैकादश्याधिक्ये तु प्रचेताः॥ एकादशी विद्धा चेद्धु
के कल्पे विशेषतः॥ उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृहीति॥ अरुणोदयविद्धायां द्वादशीमात्राधिक्ये तु परेद्यु

स.म.

त्युपवासः॥ तदाह व्यासः॥ एकादशी यदा लुप्ता परतो द्वादशी भवेत्। उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमि
ति माधवः। तत्रालोपपदस्य सूर्योदयास्पर्श एवमेव प्रसिद्धाः सूर्योदयगतं दशमीविद्धा यामेन द्ववनप्रवर्त्तेः॥ अ
तोनेदं शुद्धन्यूनाधिकद्वादशिकायामुत्तरदिनउपवासविधायकं। यदपि केचिदलुप्तेति छित्त्वेदमेतत्परतयापि
जितं तच्चिंत्यं॥ अकारप्रश्लेषमानाभावात्। दिनत्रयेपि पुत्रवद्गृहस्थेनोपवासो न कार्यः। तदाह पितामहः॥ एकाद
श्यां दिनत्रये उपवासं करोति यः॥ तस्य पुत्रा विनश्यंति मघायां पिंडतो यथेति। दिनत्रयस्तु पाद्मे द्वौ तिथ्यंताव
कवारे यस्मिन्सस्यादिनत्रयं इति। दिनत्रये च य उपवासस्तस्य निषेधः स निराहारस्यैव न धाववाय वीयेउ
पवासनिषिद्धे तु भक्ष्यं किं विल्प कल्प्येत॥ ननु ष्यत्फ उपवासे न उपवासफलं लभेत एवं केकोहैकादश्यादावपि
गृहस्थस्य। तत्रैवानक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथांबु वाज्यं यत्पंचगव्यं यदि वापि वायुः प्रशस्तम
त्रोत्तरमुत्तरं चेति॥ व्रतविशेषः स्मृत्यंतरे॥ दशम्यादि महीपालस्त्रीणि नपरिवर्जयेत्। गंधतांबूलपुष्पादि
स्त्रीसंभोगं महायशाः॥ स्त्रीसंभोगनिषेधस्तु ऋतुकालोवन्यत्रेति श्राद्धिकातिके॥ स्कांदे॥ कांस्यं मांसं म
सूरं च क्षौद्रं वानृतभाषणं॥ पुनर्भोजनमायासं दशम्यां परिवर्जयेत्॥ कौर्मे॥ कांस्यं मांसं मसूरं च चणकान्
कोरदूषकान्॥ शाकं मधु परान्नं च वर्जयेदुपवसन्स्त्रियं॥ मात्स्ये। कांस्यं मांसं सुरा क्षौद्रं तैलं वितथभाषणं॥ व्यायामं च प्र

स.म.
३६

वासं च दिवास्वापं च मैथुनं। तिलपिष्टं मसूरं च दशम्यादिषु वर्जयेत्॥ दशमीप्रकल्पनारदीये॥ अक्षारलवणाः स
र्वे हविष्यान्ननिषेविताः॥ अवनीतल्पशयनाः प्रियासंगविवर्जिताः॥ अन्यत्रापि। दशम्यामेकभक्तं तु कुर्वीत नि
यतेंद्रियः॥ आचम्य दंतकाष्ठं तु खादेत तदनंतरं। ततः स्नानंतरं विप्र ब्रह्मचारी जितेंद्रियः॥ रात्रिं नयेत्ततः पश्चात्प्रातः
स्नात्वा समाहितः॥ उपवासं तु संकल्प्य मंत्रपूतं जलं पिबेत्॥ दशम्यामेकभक्तं कां प्येकादशीपरे॥ सायमाद्यं तयो
रह्नोः सायंप्रातश्च मध्यमे। उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयं॥ अथ नित्योपवासी वेलायां प्रातर्भुक्तिक्रियां॥ व
र्जयेन्मतिमान्विप्रः संप्राप्ते हरिवासरे इति भृगुविष्णूक्तेः॥ दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः॥ एकादशीमुपव
सेत्पक्षयोरुभयोरपि॥ देवतास्तस्य तुष्यंति कामितं चास्य सिध्यतीति देवलोक्तेश्च॥ अन्येपि दिनत्रयनियमाः नि
त्यव्रतेनावश्यकाः॥ तथा च ब्रह्मवैवर्ते॥ इति श्री विष्णा यः कुर्वीतावश्यमेकादशीव्रतं॥ विशेषनियमाशक्तो हो
रात्रं भुक्तिवर्जितः इति कात्यायनोपि॥ शाकं मांसं तु पुनः कुर्यान्नियमं सविशेषतः मिति॥ ब्रह्मवैवर्ते॥ प्राप्ते हरि
दिने सम्यग्विधाय नियमं निशि॥ दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतं॥ देवलः॥ गृहीत्वौदुंबरं पात्रं वारि
पूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्यथासंकल्पयेद्बुधः॥ यो औदुंबरं ताम्रमयं वा पात्रं कल्पयेद्यथाकामं
फलमुद्दिश्य दिश्य धः॥ वाराहे॥ इत्येवमुच्चार्य ततो विद्वान्पुष्पांजलिं मया पति॥ इत्येवाप्य संकल्पेत्यर्थः॥ कात्य

राम

यनः॥ अथान्तरे ताम्रं रात्रिजागरणनामिमं व्रतंउपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलं॥ पूर्वोक्तकपालवेधेतु
विशेषो नारदीये। दशम्याः संगदोषेण ताम्र इति तत्परेणानुव जयेद्वनुरोयामा नसंकल्पार्चनयोस्तदा॥ विद्धोप
वासेऽनश्नंस्तु दिनं तत्र समासमाहितः॥ रात्रौ संपूजयेद्विष्णुं संकल्पं च तदाचरेत्। पूजाप्रकारश्च ब्राह्मे॥ एकादश्यां
शुभे पक्षे निराहारः समाहितः॥ नानापुष्पैर्मुनिश्रेष्ठ विचित्रं मंडपं शुभं॥ कृत्वेति शेषः। स्नात्वा सम्यग्विधानेन सो
पवासो जितेंद्रियः॥ संपूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः॥ पुष्पैर्गंधैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः॥ उपचारै
र्बहुविधैर्जपहोमैः प्रदक्षिणैः॥ स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यैर्मनोहरैः॥ दंडवत्प्रणिपातैश्च जयशब्दैस्तथो
त्तमैः॥ एवं संपूज्य विधिवद्रात्रौ कृत्वा प्रजागरं॥ याति विष्णोः परं स्थानं नरो नास्त्यत्र संशय इति॥ विशेषो बृह
न्नारदीये। पंचामृतेन संस्नाप्य एकादश्यां जनार्दनं॥ द्वादश्यां पयसा स्नाप्य हरिसारूप्यमश्नुत इति॥ सूतकादौ तु
वाराहे। सूतके च नरः स्नात्वा प्रणम्य मनसा हरिं। एकादश्यां न भुंजीत व्रतमेवं न लुप्यते॥ मृतके पि न भुंजीत ए
कादश्यां सदा नर इति॥ स्त्रीणां रजोदर्शने तु हेमाद्रौ माधवीये च पृथ्वीमंगः॥ संप्रवृत्तेपि रजसि न त्याज्यं द्वादशीव्रत
मिति॥ एकादश्यां श्राद्धप्राप्तौ तु हेमाद्रौ माधवीये स्कांदे एव। उपवासो यदा नित्यः श्राद्धं नैमित्तिकं यदा॥ उपवासं तदा
कुर्यादाघ्राय पितृसेवितमिति। उपवासासमर्थस्तु हेमाद्रौ माधवीये मार्कंडेयः। एकभक्तेन नक्तेन तथैवायाचितेन च। राम
३७

उपवासेन दानेन न निर्द्वादशिको भवेत्॥ हेमाद्रौ पुराणांतरे। उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत्। तावद्धनानि वा द
द्याद्यद्भुक्ताद्द्विगुणं भवेत्॥ सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्। कुर्याद्द्वादशसंख्याकान्यथाशक्त्यानुशोन
र इति। व्रताकरे तु प्रायश्चित्तं स्मृत्यंतरे॥ अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा॥ एकादश्यामहोरात्रं भुक्त्वा चा
न्द्रायणं चरेदिति॥ ज्येष्ठशुक्लैकादशी निर्जला॥ ज्येष्ठमासि तु पक्षे च शुक्ले एकादशी भवेत्। निर्जलं समुपोष्या
त्र जलकुंभान्सशर्करान्। प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसंनिधौ॥ इति स्कांदोक्तेः॥ आषाढशुक्लैकादश्यां विष्णु
शयनं ब्राह्मे। एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः॥ भुजंगशयने शेते क्षीरार्णवजले सदा॥ स्वापविधि
र्भविष्ये। महापूजां ततः कुर्यात्स्वदेवस्य च क्रियाः। जातीकुसुममालाभिर्मंत्रेणानेन पूजयेत्॥ सुप्ते त्वयि जगन्ना
थ जगत्सुप्तं भवेदिदं। विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युतेति॥ अत्रैव चातुर्मास्यव्रतारंभ उक्तो महाभारते। आषा
ढे तु सिते पक्षे एकादश्यामुपोषितः। चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नर इति॥ व्रतानि तु चातुर्मास्यप्रक
रणे वक्ष्यंते॥ चातुर्मास्यप्रवृत्तारंभस्य कालांतरमपि ब्राह्मे एव। एकादश्यां तु गृह्णीयात्संक्रांतौ कर्कटस्य वा। आ
षाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रियामिति॥ व्रतग्रहणप्रकारो भविष्ये। विष्णोरग्रे ततो विष्णोः कृतांजलि
पुटस्तथा॥ चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत। इदं व्रतं मया देव

सम·

गृहीतं पुरतस्तव । निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव । गृहीते स्मिन्व्रते देव पंचत्वं यदि मे भवेत् । तदा भवतु सं
पूर्णं त्वत्प्रसादाज्जनार्दन इति ॥ गार्ग्यः ॥ न शैशवं नमौढ्यं वध्नुकं गुर्वौ नैवाति थे ॥ खंड त्वं विंतये व्रातुर्मास्य व्रतविधौ नर
इति । एतद्द्वितीयाद्यारंभे प्रथमारंभस्तु न भवतीति कश्चित् । तन्तुच्छं । प्रवत्स्यायांमानां भावात् । पादपि हेमाद्रौ चा
तुर्मास्य व्रतप्रकरणे भविष्ये । असंक्रांतं च यो मासं दैवे पित्र्ये च कर्म ति । मलमासम शेषं च वर्जयेन्मतिमान्नर इति
तदारंभस मा प्योरं तरा मलमासे व्रतानानु वृत्तिविश्य षमिति केचित् ॥ श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा दुग्ध
माश्वयुजे मासि कार्तिके द्विदलं त्यजेदिति श्रावणादि मासविशेषव्रतानानुवृत्य धर्त्वं ॥ स्पष्ट मासविशे
षाख्या विहितं वर्जयेन्मल इति वचनात् । चातुर्मास्य व्रतानि त्वंतरा मलमासे प्यनुवर्तन्त एवेति परे ॥ नित्यानामारंभः
काम्यानां वर्जनमिति तु युक्तं ॥ एकादश्यामाषाढ्यां पूर्णिमायां कर्कसंक्रांतौ वारंभे तासु नियम तत्र प्राप्ताशौचेनारंभ एवा
आरब्धे तु तत्कर्तव्यं स्यादनारब्धे तु सूतकमिति त्रिविक्रमः ॥ पत्रवनदीपिकायां संक्रांतौ अभ्युविवर्दि विवापि पद्दिस्त्रीय
दिना पुमान् ॥ व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैरिति तदारंभो नरं बोध्यं । भाद्रशुक्लैकादश्यां विष्णोरंगपरिव
र्तनं कुर्यात् भविष्योत्तरे । प्राप्ते भाद्रपदे मासि एकादश्यां दिने सिते ॥ कटिदानं भवेद्विष्णोर्महापातकनाशनमिति ।
कटिदानमंगपरिवर्तनं ॥ कार्तिकशुक्लैकादश्यां देवस्योत्थापनमुक्तं हेमाद्रौ पाद्मे । एकादश्यां तु शुक्लायां कार्ति

राम
३८

के मासि केशवं । प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वित इति । उत्थापनविधिर्भविष्योत्तरे । वेदवेदैर्वस्पस्नानं पू
र्वमहस्त्वेनाम हापूजां ततः कृत्वा देवमुत्थापयेत्सुधीः ॥ तामावनिवेदिकायो इदं विष्णुरनेनांबुतत्वादुत्थापयेत्प्र
भुं ॥ पौराणमंत्राः ॥ ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय ॥ बुध्यस्व देवेश जगन्निवास मंत्रप्रभा
वेन सुखेन देव ॥ इयं तु द्वादशी देव प्रबोधाय विनिर्मिता ॥ त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥ उत्तिष्ठोत्ति
ष्ठ गोविंद त्यज निद्रां जगत्पते । त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं ॥ उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव ॥ गत
ता मेघा वियच्चैव निर्मलं निर्मला दिशः ॥ शारदानि च पुष्पाणि गृहाण मम केशव इति । ततस्तस्यैव व्रतं समापये
त् ॥ मंत्रस्तु नित्यया मते ॥ इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो । न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दनेति ॥
पत्रवाराहो आषाढमासे द्वादश्यां सर्वशांतिकरं भुवमित्यादिना द्वादश्यां शयनादिकमुक्तं तत्र मिथुनार्के
एव ॥ आभाकाद्येषु मासेषु मिथुने माधवस्य च ॥ द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवाः इति भविष्योक्तेः ।
तत्रैव ॥ आभाकासितपक्षेषु मैत्रश्रवणरेवती ॥ आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवा इति रेवत्यन्त
मीलोपः ॥ उत्सवो जागरः ॥ मात्स्ये निद्रिस्वापोत्थितो च्छानं संध्यायां परे वर्तनं । निशादौ न तत्र पादयोगानाम
भावेन तन्मात्रयोगो पि ग्राह्यः । पादयोगो यदा न स्याद्दृष्टे तत्रापि तदा भवेत् ॥ इति वाराहपुराणात् ॥ द्वादश्यामुत्त

सम० संयोगे पारणयोगेन कारयन्मीति विष्णुधर्मोत्तरात् द्वादश्यामेकदेशेनापि न तत्र योगाभावे एकादश्यां त्रयोद
श्यां वा प्रस्वापादिकार्यं अप्राप्तौ द्वादशीमात्रे ऽन्यत्र न शयने हरेः॥ पादयोगेन कर्त्तव्यं नाहोरात्रं विचिंतयेदिति
जीमूतवाहनोदाहृतवचनात्। एवं च द्वादश्यां निशाद्यादेरन्यतिथौ च न तत्र पादयोगादेरेनिपतेस्तिथि द्वाद्वा
दशीषु निशादेरन्यत्र न तत्र दत्तभागयोगोऽन्यतिथौ च नदितरन तत्रस्यैव योगः तदा द्वादशीषु संध्यायां प्रस्वा
पः क्षि द्वादश्यां संधिसमये न तत्रा तामसंभवे। आभाकार्त्तितपत्ते षुभ्रायनावर्त्तनादिकमिति वराहवचनात्॥
संधिसमपरतिशयनादावन्येति। संधिसमयश्च सायंसंध्येवारे वर्ण्यंतो पदारात्रौ द्वादश्यां वसमागनशात
दा विबुध्यति विष्णुर्दिनांते शापरेवतीमिति जीमूतवाहनोदाहृतवचनात्॥ आषाढकार्त्तिकयो तमिस्रायोर
पि चापप्रबोधावाहयमः। क्षीराब्धौ शेषपर्यंके आषाढ्यां संविशेद्धरिः। निद्रां त्यजति कार्त्तिक्यां तयोः संपूजये
द्धरिं ब्रह्महत्यादिकं पापं क्षिप्रमेव व्यपोहतीति। यत्त्वाषाढस्यैपकार्त्तिकस्यैयं मितिक विषयेप्योत्सर्गिकाएकेरतो
नौषाढीकार्त्तिकीपदे एकादशीपरे एवेति तदप्युक्तं आषाढशुक्लपक्षांते भगवान्मधुसूदनः। भोगिभोगिभो
मा गेनिजांसौ पायोगनिद्रांसमामुपादिति विष्णुधर्मोत्तरात् यदपि द्वादशीपदमेकादशीपरमिति तदपिनाप्रम सम
तां भावात्। एते षोवपत्ता तांयथासंप्रदायं व्यवस्था॥ श्रीरामस्य तु पारणोत्तरं द्वादशीमध्ये त्रयोदशीमध्ये ३९

वा पूर्वरात्रौ त्वापोत्सवः। पारणाहे पूर्वरात्रौ घंटादीन्वादयन्मुहुः॥ विधाय महतीं पूजां विष्णुमभ्यर्च्य विसर्जयन्निति
रामार्चनचंद्रिकोक्तेः॥ मिथुनस्थः सदेवानामपि पारणोत्तरमेव रात्रौ कुर्वंति॥ यत्तु मोहचूडोत्तरे। मिथुनस्थोपदा
मानुरमावास्याद्वयं स्पृशेत्॥ द्विराषाढः सविज्ञेयो विष्णुः स्वपिति कर्कटे॥ इतिदुत्तरवर्षगतकर्कसिद्धापपतमिति
माधवः। मेषादिमिथुनांतेषु पदादशद्वयं भवेत्॥ अब्दांतरे तदा वर्षपतत्कर्कटादित्रिके वापिपदादशद्वयं भवे
तान्त्राब्दांतरे तदवश्यं मिथुनार्के हरिः स्वपिक कर्कटार्के हरिः स्वपेदिति वराहमिहिरोक्तेः॥ भविष्ये। श्रावणे वर्ज
येच्छाकं दधि भाद्रपदे तथा। दुग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेत्॥ इत्ति निषिद्धे। मूलपत्रकरीराग्रफल
कांडविरूढकाः। त्वक्पुष्पं कवर्कं चेति शाकं दशविधं स्मृतमिति। करीरं वंशांकुरः। विरूढकास्तिनिष्पन्नाः कव
चकाः॥ निष्पावाराजमाषाश्च माढक्यो द्विदलं स्मृतमिति॥ ॥ इत्येकादशीनिर्णयः॥ ॥ अथ द्वादशीव पूर्वा
सा हृदेताद्वादशीयुक्ते तियुग्मवचनात्। माधवीये स्कांदेपि॥ द्वादशीच प्रकर्त्तव्या एकादश्यायुता प्रभो इति। एका
दशीपारणाविषये माधवीये स्मृत्यंतरे। कलाद्ध्यं त्रयं वापि द्वादशीनत्वति क्रमेत्॥ पारणे मरणे नृणां तिथि
स्तात्कालिकी स्मृतेति। अल्पद्वादश्यां विशेषः स्कांदे। पद्मे दामवेद्रतीवाल्पा द्वादशी पारणा दिने। उषःकाले द्व
यं कुर्यात्प्रातर्माध्याह्निकं च तदिति॥ तत्र कथं विशारदानां भवेत्ताह देवलः॥ संकटे विषमे प्राप्ते द्वादश्यां पा

सम० रयेत्कर्म॥ अद्भिस्तु पारणां कुर्यात्पुनर्भुक्तं न दोषकृदिति॥ संकटे त्रयोदशीनिमित्तकं श्राद्धस्नानदीनादिकमप्युद्धा
र्किंचित्। द्वादश्यामल्पायामिति विशेषः॥ सर्वथा द्वादश्यभावे तूक्तं नारदीये। त्रयोदश्यां तु शुद्धायां पारणं पृथिवी
फलं। शतयज्ञाधिकं वापि नरः प्राप्नोत्यसंशयमिति॥ अत्र हरिवासरस्वरूपं तद्वर्जनं चोक्तं निर्णयामृते। वि
ष्णुधर्मोत्तरे॥ द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः॥ अतिक्रम्य तु कर्तव्यं पारणं विष्णुतत्परैरिति॥ चैत्र
शुक्लद्वादश्यां दमनकार्पणमुक्तं मदनरत्ने संहितायां॥ द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः॥ बौधा
यनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरं॥ तत्र प्रथमं देवप्रार्थना॥ क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो
॥ न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि॥ सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः॥ उपवासेन त्वां देव तोष
यामि जगत्पते॥ कामक्रोधादयो येन मे स्युर्व्रतविघातकाः॥ अद्यप्रभृति देवेश यावद्वैशेषिकं दिनं॥ तावद्र
क्षा त्वया कार्या सर्वस्यास्य नमोऽस्तु ते॥ एवं विज्ञाप्य देवेशं गुरुपादौ प्रणम्य च॥ प्रातः स्नात्वा समभ्यर्च्य देवेशं
विधिवन्नरः॥ गत्वा दमनकारामं मेकादश्यां सुशोभितं॥ रूपयेत्तद्यथा तत्रैव पूजयेद्वंदनादिना॥ नेष्यामि राजपू
जार्थमिति संप्रार्थ्य तं नमेत्॥ उत्पाद्य पंचगव्येन प्रोक्ष्य प्रक्षाल्य वारिणा॥ धौतेन वाससा छाद्य निधाय पटलेन
वा॥ पटले वंशादिपात्रे॥ घंटापुरुषसूक्तादिध्वनिभिः स्वगृहमानयेत्॥ ततो गृहमागत्य देवमर्चयेत्॥ आमंत्रितो राम

४०

ऽसि देवेश पुराणपुरुषोत्तम॥ प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव॥ क्षीरोदधिमहानागशय्यासंस्थितवि
ग्रह॥ प्रातस्त्वां पूजयिष्यामि संनिधो भव ते नमः॥ निवेदयाम्यहं तुभ्यं प्रातर्दमनकं प्रभो॥ सर्वथा सर्वदा विष्णो
नमस्ते तु प्रसीद मे॥ इत्यामंत्र्य दत्त्वाथ तस्मै पुष्पांजलिं पुनः॥ पूजितं तं दमनकं कुंभस्योपरि संस्थितं॥ अर्चितास
चतीरेणैकवचेन वगुंठयेत्॥ रात्रौ द्वादशाक्षमंत्रेण हरेर्मनुनाथवा॥ ततो ब्राह्मणान्गुरुं च संपूज्य गीतवाद्या
दिभी रात्रौ जागरणं कुर्यात्॥ ततः प्रातरुत्थाय स्नानाद्याह्निकं कृत्वा नैमित्तिकीं कुर्यात्॥ तद्यथा॥ पू
र्वदिनाधिवासितं दमनकं दूर्वादलसहितं गृहीत्वा॥ देवदेव जगन्नाथ वांछितार्थप्रदायक॥ हृत्स्थान्पूरय मे का
मान्मम कामेश्वरीप्रिय॥ इदं दमनकं देव गृहाण मदनुग्रहात्॥ इमां सांवत्सरीं पूजां भगवन्परिपूरय॥ इति मू
लमंत्रसंपुटितेन मंत्रेण देवाय दमनकमर्पयेत्॥ तत उत्तरप्रार्थना॥ मणिविद्रुममालाभिर्मंदारकुसुमादिभिः
॥ इयं सांवत्सरी पूजा तवास्तु गरुडध्वज॥ वनमालां यथा देव कौस्तुभं सततं हृदि॥ तद्वद्दामनकीं पूजां मालां वहस्व
ह॥ जानता जानता वापि न कृतं यत्त्वयार्चनं॥ तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते॥ जितं ते पुंडरीकाक्ष नम
स्ते विश्वभावन॥ नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन॥ यत्पूजितं मया दे
व परिपूर्णं तदस्तु मे॥ इति देवं प्रार्थयित्वा दंडवन्नत्वा भूषणाद्यैर्गुरुं संपूज्य नत्वा ब्राह्मणान्भोजयेत्त्व

स०म० यं च पारणां कुर्यात्॥ ॥इति दमनकारोपणं॥ ॥पारणाहे द्वादश्यलाभे तत्रैव॥ पारणाहे न लभ्येत द्वादशी घटि
कापि वा॥ तदा त्रयोदशी श्राद्धापवित्रदमनार्पणं॥ तथा॥ माधवे दमनारोपस्यान्मधो विघ्नितो यदि॥ वैशाख्यां श्रा
वण्यां वा ऽगे कर्तव्यं दमनार्पणमिति॥ माधवे वैशाखे॥ तद्वादश्यामित्यर्थः॥ नागे पंचम्यां॥ त्रि छ शुक्लद्वादश्यां वदस
वित्री व्रतारंभ उक्तो भविष्ये॥ त्रिद्धिमासिसितेपक्षे द्वादश्यां रजनीमुखे॥ व्रतं नित्यं तत्र मुद्दिश्य दिवा रात्रि स्थिरा भवेदिति॥
आषाढशुक्लद्वादश्यां तप्तमुद्राधारणमाथर्वणश्रुतौ॥ तद्विष्णोः परमं पदं येन गच्छंति हि लांछिता इति॥ नारदीयेपि॥
अग्निनैव तु संयुक्तं चक्रमादाय वैष्णवः॥ धारयेत्सर्वगात्रेषु तत्तद्विष्णुसायुज्यमश्नुते इति॥ तद्वद्द्विपयां न ब्राह्मणा॥
॥यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु॥ तथा चक्रांकितो विप्रः सर्वकर्मसु गर्हितः इति आश्वलायनोक्तेः॥ द्विज
स्तप्तमुद्रादिलिंगांकिततनुं नरः॥ संभाष्य रौरवं याति यावदिंद्राश्चतुर्दश इति नारदीयात्॥ तथा शंखचक्रेमदापस्त
कुर्यात्तप्तायसेन वा॥ स शूद्रवद्बहिःकार्यः सर्वस्माद्द्विजकर्मतः इति॥ शैवपुराणेपि॥ शंखचक्राद्यंकनं च गीतनं
त्यादिकं तथा॥ एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः इति॥ एते चांचविधिनिषेधानां वैष्णवावैष्णवपरतया व्यव
स्थेति केचित्॥ बहुवस्तु द्विविधानामपि निर्मूलतामाहुः॥ श्रावणशुक्लद्वादश्यां पवित्रारोपणमुक्तं तामाधवनिबंधे
कार्यां श्रावणतास्पसितेपक्षे द्वादश्यां शौनकादिभिः॥ उक्तः संप्रकर्तव्यः पवित्रारोपणोत्सवः॥ पाद्मे पुनि... राम ४१

येन लाभ इतीतं नु पूजनं॥ चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः॥ पवित्रारोपणं विघ्नाच्छ्रावणे न भवेद्यदि॥ कार्त्ति
क्यां ... कर्तव्यमिति नारदः॥ भुक्ता कल्पिता द्वादशी॥ हैमरूप्यमयैः सूत्रैस्ताम्रैर्वा कौशेयपट्टजैः॥ कुशैः का
शैः कार्पासैः ब्राह्मण्या कर्त्तितैः शुभैः॥ कन्यया वा पवित्रं स्याद्यत्नपौष्ठल्यादिभिः कृतैः॥ स्नात्वा त्रिगुणितं सूत्रं त्रि
गुणीकृत्य शोधयेत्॥ पृथक् पृथक् पंचगव्येन रद्भिः प्रक्षाल्य चैव ततः॥ मूलेनाष्टोत्तरशतं गायत्र्या रामसंज्ञया॥ शो
धयेत्केनाभिमंत्र्य पवित्राणि विनिर्ममेत्॥ तत्रोत्तमं पवित्रं तु षट्शतसहस्रतंतुभिः॥ सप्तत्या सहितं द्वाभ्यां पवि
त्रं मध्यमं स्मृतं॥ अशीतिना शतेनैव कनिष्ठं तत्समाचरेत्॥ अष्टोत्तरशतं वीरं नवसूत्रीकृतेन च वा॥ जानूरुनाभि
पर्यंतिमुत्तमादित्रयं भवेत्॥ अष्टोत्तरसहस्रेण शतेनाविंशोत्तरपुतसहशतेन सप्तत्या वा वनमाला॥ शतपर्वाणात्
षट्त्रिंशत्क्रमादिः षट्त्रिंशच्चतुर्दश द्वादशाभिरिति केचन॥ चतुर्विंशद्वादशाष्टाभिरित्यपेके॥ अंगुष्ठपर्वतद्
द्वितद्द्विपरिमितो ग्रंथिः क्रमादिः॥ स्नात्वा विज्ञापयेद्देवं॥ क्रियालोपविधानार्थं यत्त्वया विहितं विभो॥ मयैतत्क्रियते
देव तव तुष्ट्यै पवित्रकं॥ न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि॥ सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः॥ उपवासेन
त्वां देव तोषयामि जगत्पते॥ कामक्रोधादयो येते न मे स्युर्व्रतघातकाः॥ अद्य प्रभृति देवेश यावद्वैशेषिकं दिनं॥
तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोस्तु ते॥ कुंभं पुरतो बुनापूर्वं सर्वतोभद्रके शुभे॥ स्थापयेत्पुरतो विष्णोस्तत्रस्

त्राति पूजयेत्तासां वत्सरस्य यागस्य पवित्रीकरणाय भो ॥ विष्णुलोकात्पवित्राय आगच्छेह नमोस्तुते ॥ सर्वाभरण
स॰म॰ विष्णोंगसर्वदेवनमस्कृत ॥ लावण्यरूपसंपन्न सर्वकर्तः प्रजापते ॥ सर्वमात्मेश सूत्रेस्मिन्सांनिध्यंकुरुतेन
मः ॥ सर्वरत्नोज्वलाकार ब्रह्मांड ब्रह्मरो विषः ॥ मुकुटोत्तम सर्वांगिशिरः सूत्रेहेहिभो ॥ इहतेनगतः कीर्तिः
सर्वलावण्यप्रदायिनी श्रीसूत्रे नित्यकल्पान्ति सांनिध्यंकुरुतेनमः ॥ मनुभिर्मंत्रयेदेतैः पूजयेन्मूलमंत्रतः ॥
अथदेवकरे विद्यानगंधसूत्रसमुद्भवं ॥ वितस्तिमानकं दोरं बध्नीयान्मंगलात्मकं ॥ संवत्सरकृतायार्चासं
पूर्तिफलदा शुभे ॥ पवित्रारोपणे देव सांनिध्यंकुरुतेनमः ॥ विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनं ॥ सर्वका
मप्रदं देवतवांगे धारयाम्यहं ॥ इतिमंत्रः ॥ नीराजयेत्ततोदेवं मंगलाघोषपूर्वकं ॥ मंत्रेणानेन सुरेशानं देवदे
वं तु मंत्रयेत ॥ आमंत्रितोसि देवेश पुराणपुरुषोत्तम ॥ प्रातस्त्वां पूजयिष्यामि सांनिध्यंकुरु केशव ॥ क्षीरो
दधिमहानागशय्यावस्थितविग्रह ॥ प्रातस्त्वां पूजयिष्यामि संनिधौ भवतेनमः ॥ निवेदयाम्यहं तुभ्यं प्रात
रितपवित्रकं ॥ सर्वपापर्वदा विष्णो नमस्तेस्तु प्रसीदमे ॥ पिपते इंद्रवन्मो जित्वा पुष्पांजलिं ततः ॥ ब्राह्मणा
न्पो नमस्कृत्य गुरुपादौ प्रणम्यच ॥ गीतमंगलनिर्घोषैः कुर्याज्जागरणं ततः ॥ ॥ इत्यधिवासनं ॥ ॥ अ
परेद्युर्नित्यपूजां विधाय ततो मंगलनिर्घोषैः शंखतूर्यादिनिस्वनैः ॥ गंधदूर्वाक्षतायुक्तं दद्याद्देवायसूत्रकं ॥ राम
४२

रामरामनमस्कार्यं गृहाणेदं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं ॥ पवित्रं वकुरुष्वाद्य यन्मया दुष्कृतं कृतं
शुद्धोभवाम्यहं देवत्वत्प्रसादात्सुरेश्वर ॥ मूलसंपुटितो घोषपवित्रारोपणे मनुः ॥ अंगाद्यावरणेभ्यस्तु
दद्यात्स्वनामभिः ॥ नैवेद्यं तु महापूर्वं ततो दद्याद्भक्तितः ॥ नीराजयेत्ततोदेवं रमाकांतं समंगलं ॥ सर्वतीर्थमयं रे
पुरोदर्पितं दर्शयेत्ततः ॥ प्रार्थयेद्देवदेवेशं मंत्रैरेभिर्यथाविधि ॥ मणिविद्रुममालाभिर्मंदारकुसुमादिभिः ॥
इयं सांवत्सरीपूजा तवास्तु गरुडध्वज ॥ वनमालां यथादेव कौस्तुभं सततं हृदि ॥ तद्वत्पवित्रपूजां वहृदयेवहकेश
व ॥ जानताजानतावापि यत्कृतं न तवार्चनं ॥ केनविघ्नेन देवेश तत्संपूर्णं तदस्तु मे ॥ मंत्रहीनं क्रियाहीनं भ
क्तिहीनं जनार्दन ॥ यत्पूजितं मयादेव परिपूर्णं तदस्तु मे ॥ अपराधसहस्राणि क्रियंतेहर्निशं मया ॥ दासोयं
इति मां मत्वा क्षमस्व मधुसूदन ॥ ततः पवित्रं गुरवे दद्यात् आदिपूर्वकं ॥ अथैनं पूजयेद्भक्त्या वस्त्रानुलेपनैः ॥
ब्राह्मणांश्चैव गंधपुष्पादिनार्चयेत ॥ मासपक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ॥ देवे तं सूत्रमर्पयेद् गृहा
त विद्यथा ॥ अस्य ह स्नानकाये दोसूत्राणाम् परिकारयेत ॥ अर्पयेद्देवमध्ये [illegible] ततः सूत्रं विसर्जयेत्ताना
व [illegible] पूजासंपाद्य विधिवन्नमः ॥ व्रजेदानीं पवित्रत्वं विष्णुलोकं विसर्जितं ॥ यावद्दिवे पवित्राणि तावत्तिष्ठे
त्समाहितः ॥ ब्रह्मचारी हविष्याशी देवपूजापरायणः ॥ [illegible] द्वादशी श्रावण [illegible] द्वादशी सावेकादशी पुनेवात

क्रंमात्स्ये। द्वादशीश्रवणास्पृष्टा स्पृशेदेकादशीं यदि। स एव वैष्णवो योगो विष्णुश्रृंखलसंज्ञितः॥ तस्मिन्नुपोष्य
विधिवन्नरः संक्षीणकल्मषः। प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम्॥ इति। द्वादश्यामेव श्रवणयोगे तु मत्स्ये
एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्॥ न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः॥ इति। विधिलोप एकादशीपा
रणाहानिकृतः॥ अशक्तो तु मात्स्ये। द्वादश्यां तु कृपणेतु न तत्र श्रवणं यदि॥ उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिं
मि॥ अत्र कल्पमुक्तं भविष्योत्तरे॥ मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता॥ सर्वकामप्रदा पुण्या उपवासे म
हाफला॥ संगमे सरितां स्नात्वा द्वादशीं समुपोषितः॥ समग्रं समवाप्नोति द्वादशीफलं॥ विष्णुधर्मोत्तरे॥ पाराम
रुलिपिता द्वादशी महती तु सा॥ तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनं॥ प्राप्नोत्ययत्नाद्धर्मज्ञ द्वादशद्वाद
शीफलं। दध्योदनयुतं तस्यां जलपूर्णं घटं द्विज। वस्त्रसंवेष्टितं दत्वा छत्रोपानहमेव च। न दुर्गतिमवाप्नोति गतिम
ग्र्यां च विंदति। अत्र तच्छस्थानमाप्नोति नात्र कार्या विचारणा इति। पारणं तु विशेषो नारदीये। तिथिनक्षत्रयोगे तु उपवा
सो यदा भवेत्। पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः इति। अत्र वरणासंगमस्नानमुक्तं लिंगे। अतः परं तु संसे
वेद् गांगवरणासंगमः। श्रवणद्वादशीयोगे बुधवारो यदा भवेत्॥ तदा तस्मिन्नरः स्नात्वा संनिहत्य फलं लभेदिति।
कार्तिककृष्णावत्सद्वादशी। सा पूर्वविद्धा। रुद्रेण द्वादशीयुक्ते इति युग्मवाक्यात। वत्सपूजा वत्सश्चैव कर्तव्या प्रथ राम ४५

मेहनी तिस्मयं तरात्रा। भविष्यत्पुराणे। सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीं। चंदनादिभिरालिप्य पुष्पमाल
भिरर्चयेत्॥ अर्घं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः॥ पादमूले तु दद्याद्वै मंत्रेणानेन पांडव॥ क्षीरोदार्णवसंभू
ते सुरासुरनमस्कृते। सर्वदेवमये मातर्गृहाणार्घं नमो नमः॥ ततो माषादिसंसिद्धान्वटकान्विनिवेदयेत्॥ सु
रभि त्वं जगन्मातर्देवि विष्णुपदे स्थिता॥ सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस। ततः सर्वमये देवि सर्वदेवैरलंकृते॥
मातर्ममाभिलषितं सफलं कुरु नंदिनि॥ इति प्रार्थयेत्। तत्र वातद्दिने तैलपक्वं स्थालीपक्वं युधिष्ठिर गोक्षी
रं गोघृतं चैव दधि तक्रं च वर्जयेदिति। अत्रैव द्वादश्यादिषु विशेषो नारदीये। आश्विने कृष्णपक्षे तु द्वादश्यादिषु पं
चसु। तिथिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः॥ नीराजयेयुर्देवांस्तु विप्रान्गाश्च तुरंगमान्। ज्येष्ठान्श्रेष्ठान् जघ
न्यांश्च मातृमुख्याश्च योषित इति। अथ चाश्विनेमावास्यांतः॥ कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेदिति। मंत्र
कः। इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो। न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन इति॥ ॥ अथ सर्वद्वादशीकृत्य
तद्विषमाध्व। कात्यायनः। प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत्। अज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसाद सु
मुखो नाथ ज्ञानदृष्टिप्रदो भव इति। पारणं तु ततः कुर्याद्यथासंभवमार्गत इति ब्रह्मनारदीये। ब्राह्मणान्भोजयित्वा
च प्रदद्याद्दक्षिणां तथा॥ ततः स्वबंधुभिः सार्द्धं नारायणपरायणः॥ कृतपंचमहायज्ञः स्वयं भुंजीत वाग्यत इति॥

स॰म॰ भोजनेतु विशेषः स्कांदे। कृत्वावैवोपवासं तु यो भ्राति द्वादशीदिने। नैवेद्यतुलसीमिश्रं हत्याकोटिविनाशनमिति॥
तत्र वर्ज्यानि ब्रह्मांडे। कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणं। व्यायामं च प्रवासं च दिवास्वप्नमथांजनं। तिल
पिष्टं मसूरं च द्वादशैतानि वैष्णवः। द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते। तथा। कांस्यं मांसं सुरां घूतं व्यायामं
क्रोधमैथुने। हिंसामयं तल्लोल्यं च तैलं निर्माल्यलंघनं। द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत्। बृहस्पतिः।
दिवानिद्रां परान्नं च पुनर्भोजनमैथुने। क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्। कात्यायनः। द्वादश्यां पारणं
कुर्याद्वर्जयित्वा त्रयोदशीमित्यादि सर्वं चैतत्काम्यव्रतपरं। पुनर्भोजनमध्वानं भारमायासमैथुने। उपवासफ
लं हन्युर्दिवानिद्रा च पंचमी। तथा। कांस्यं मांसं मसूरं च चणकं कोरदूषकाः॥ शाकं मधुपरान्नं च हन्युरष्टा विमेफ
नमित्यादोफलग्रहणात्। स्कांदे। कलाद्धपंत्रपर्णं वापि द्वादशीपत्रे दृश्यते॥ स्नानार्चनादिकं कर्म तत्तदा तत्त्रोद्वि
धीयते। अरुणोदयपरश्चात्रारात्रिशब्दः। तथा च नारदीये। अल्पायामथ विप्रेंद्र द्वादश्यामरुणोदये। स्नानार्चन
क्रियाः कार्या दानं होमादिसंयुताः इति। होमादिशब्देन वा अस्मात् नित्यकर्मणो त्यतेन तुअो तां स्मत्याप्रोतका लबा
धापोगात॥ पाद्मेपि। यदा भवति अल्पातु द्वादशी पारणादिने। उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदेतिमा
हाहानिकरी ह्येषा द्वादशी लंघिता नरैः॥ करोति धर्महरणं भस्मातिवसरस्वतीति। अयस्यामपि द्वादश्यां माध्या राम ४४

ह्निकापकर्षमिच्छत्येव। सर्वेषामुपवासानां प्रातरेव हि पारणमिति फलके:। भोजनमाध्याह्निकयोश्चावानिकक्रमस
ङ्गावात्॥ एवमुक्तमंपमनिपमलोपोपमः। मानसेनियमे लुप्ते स्मरेद्विष्णुमनामयमिति। याज्ञवल्क्यः। यदि वाग्य
मलोपः स्यात्स्नानदानादिकर्मसु। व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययमिति। विष्णुधर्मोत्तरे। असंभाष्या
न् हि संभाष्य तुलस्यं तसिकादलं॥ आमलक्याः फलं वापि पारणे प्राश्य शुद्ध्यति। इदं चोदाहरेत्सम्यकृकृत्वा तत्र
वर्त्तमनः॥ शारीरमंत्र। करणोपघातं चावश्च विष्णुर्भगवानशेषः। शमं नयत्वस्तु ममेह शर्म यथा पादनं ते हृदि संनि
विष्टे। अंतःशुद्धिं बहिःशुद्धिं शुद्धो धर्ममयो च्युतः॥ स करोतु ममेतस्मिन्नशु विरिवासिस वदृता॥ बाह्योपघात
ननघान्यो द्रष्टुश्च भगवानजः॥ शमं नयत्वनंतात्मा विष्णुश्चेतसि संस्थितः। एतत्संभाष्य तत्सर्वं पारवदिभिरूपोष्टितैरि
ति विष्णवे॥ तस्यावलोकनात्सूर्यं पश्येन्मतिमान्नरः। नमः भुवि बदेत्फलके ति। तस्य पारवद्याद्यदेः। तत्स्पर्शे पितत्रिव
संस्पर्शे तु बुधः स्नात्वाभुविरादित्यदर्शनादिति। विष्णुरहस्ये। श्राद्धोपवासदिवसे खादित्वाद्दंतधावनं॥ गायत्र्या
शतसंपूतं अंबु प्राश्य विशुद्ध्यतीति॥ रजस्वलां च चंडालं महापातकिनं तथा॥ सूतिकां पतितं चैव उच्छिष्टं रजका
दिकं। मित्यपक्रम्य ब्रह्मारदीपिप्रतादिमध्येक्षतु पाद्यद्येषां ध्वनिमुत्तमः॥ अघोरसहस्रं तु जपेद्वै वेदमातरं॥
वेदमातागायत्री॥ कात्यायनः। मिथ्यावादे दिवास्वापे बहुशो बुनिसेवते॥ अष्टाक्षरं तीनहस्रशतमष्टोत्तरंश्च विरि

स॰म॰ ति॥ अधा त्तरमोनमो नारा यणायेति शंखः॥ कृत्वात्ति पंप्राता हिंसायघाहं शाकवो दितं॥ प्रायश्चित्तं प्रती कुर्यज्जिपे
त्सहांश तत्रय मिति पैठीनसिः॥ तांबूलवर्वत्तिस्त्रीरात्मांभोगेमांस निषि वर्तो व्रतलोपोभवेत्कुपदिष्टा त्तरमनोजपमिति।
कात्याय नः।एतेः संक्रमता स्त्रीभोगोन्यत्र त्तुयः स्मृतः॥ जपोद्या त्तरमंत्रस्पनाम्नांशतत्र यस्यवेतिरितः संक्रमाताम
नुकाल्यगमनं। तदात्मका स्त्रीसंभोगादन्यत्र संभोगेव्रतस्य त्तपइत्यर्थः॥ देवलोपिन दरेद्धुतुमगमादिति॥ ॥ इति द्वा
दशी॥॥ अथ त्रयोदशी॥ सातुभ्रुक्लापूर्वविद्धोत्त॥॥ग्राह्या॥ शुक्लत्रयोदशी पूर्वपराकृष्णात्रयोदशीतिमाधवीये
ही पिकापि त्रयोदशी तिथिः पूर्वाश्चितेत्याशि तेपश्चा त्तिदिति॥ अत्र प्रदोषव्रत ब्रह्मोत्तरखंडे। पक्षद्वये त्रयोदश्यां निरा
हारोभवेद्दिवा घटिकात्रिरस्तमयात्पूर्वं स्नानं समाचरेत॥ शुक्लांबरधरोभूत्वावाग्यतोनियमान्वितः॥ कृतसंध्या
जपविधिः शिवपूजांसमारभेदिति। अत्रप्रदोषव्यापिनीग्राह्या॥ तत्रैवपूजाविधानात्॥ दिनद्वयेप्रदोषव्याप्तिर्व्या
प्तिर्वापूर्वैव॥ तथाचसुमंतुः॥ त्रयोदशीतुकर्तव्याद्वादशीसहितामुनइति॥ इदंचकृष्णपक्षेमंदवासरेप्रशस्तं॥ मंदवा
रेप्रदोषोयं दुर्लभः सर्वदेहिनां॥ तत्रापि दुर्लभस्तस्मिन्कृष्णपक्षेसमागतइतितत्रैवोक्तत्वात्॥ कार्तिककृष्णत्रयोदश्यां
दीपदानमुक्तं चंद्रप्रकाशेस्कांदे॥ कार्तिकस्यासितेपक्षेत्रयोदश्यां निशामुखे। यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति॥ राम
तिबहिर्यमाद्धहिरितिके चित्तान्नहाद्धहिरित्यपरे॥ मंत्रस्तु॥ मृत्युनापाशदंडाभ्यांकालेनश्यामयासह॥ त्रयोदशीदीपदा ४५

नात्सूर्यजः प्रीयतांममेतिदिक्॥ ॥ इतित्रयोदशी॥ अथचतुर्दशी॥ सातुकृष्णापूर्वशुक्लोत्तराग्राह्याचतुर्द
श्याच पूर्विर्मितियुग्मवाक्यात्॥ तृतीयैकादशीषष्ठीशुक्लपक्षेचतुर्दशी॥ पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतेति॥ ना
रदीयात्॥ कृष्णपक्षेऽष्टमीचैवकृष्णपक्षेचतुर्दशी॥ पूर्वविद्धातुकर्तव्यापरविद्धानकर्हिचित्इतिआपस्तंबोक्तेश्च॥ तत्र
सर्वासुचतुर्दशीषुवीरेश्वरपूजोक्तास्कांदे॥ विधायवैनागरत्नानरोवीरेशमर्चयेत्॥ भूतायांचैवगत्वातिशरीरं पा
वमौतिकं॥ चैत्रकृष्णचतुर्दश्यां केदारकुंडोदकपानमुक्तं तत्रैव॥ चैत्रकृष्णचतुर्दश्यांतु उपवासं विधायवै॥ केदारोद
कपानेनयथा तत्रफलंलभेदिति॥ चैत्रशुक्लचतुर्दशी॥ रात्रिव्यापिनीग्राह्येतिकेचित॥ मधोः श्रावणमासस्यच
तुर्दशीशुक्लाचतुर्दशी॥ सारात्रिव्यापिनीग्राह्यापरापूर्वाह्णगामिनीतिबोधायनवचनात॥ निशिभ्रमंतिभूतानिशक्त
यःशूलभृद्यतः॥ अतस्तत्रचतुर्दश्यांसत्यांतत्पूजनंभवेदितिब्रह्मवैवर्ताच्च॥ तानवरगात्तु॥ तृतीयैकादशीषष्ठीशु
क्लपक्षेचतुर्दशी॥ पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतेतिनारदेनशुक्लचतुर्दशीपरविद्धोक्ता॥ कृष्णपक्षेऽष्टमीचै
वकृष्णपक्षेचतुर्दशी॥ पूर्वविद्धातुकर्तव्यापरविद्धानकर्हिचिदितिआपस्तंबेनचकृष्णापूर्वोक्ता॥ अपराह्णव्यापित्वेत
मिश्रापिपूर्वविद्धैव॥ चतुर्दशीतुकर्तव्यात्रयोदश्यायुताविभो॥ ममभक्तैर्महाबाहोभवेद्यावापराह्णिकीतिदशरथ
द्वानकर्तव्याराकाविद्धाकदाचनेतिस्कांदोक्तेः॥ मधोःश्रावणमास्यितिबोधायनीयेतुपरापूर्वाह्णगामिनीत्येवविधी

स.म. यतोऽत्र रात्रिव्याप्त्यभावात्स्वल्पमपि उभयविधो वा समभेदप्रसंगात् । किंतु उक्तोदवाक्यप्राप्तं पूर्वविद्धत्वमनूद्यते तद्धि रात्रि
व्यापित्व एव भवति । रात्रिव्यापिनीति विधिः पूर्वाह्णगामिनीत्यनुवाद इति विज्ञाम धुश्रावणशुक्लचतुर्दशी भिन्नानां
पूर्वाह्णव्यापिनीनां ग्रहणस्याप्राप्तेः । अतो नन्वायाता रात्रिव्यापिनीत्यनेन पूर्वविद्धत्वमनूद्यत इत्याहुः ॥ रात्रिव्यापि
नीत्येन पूर्वविद्धत्वे परविद्धत्वे वा प्राप्ते मधोः श्रावणमासस्येति वचो नियमविधिर्भवति पूर्वविद्धत्वाभावे केवलरा
त्रिमात्रव्याप्तित्वे पूर्वविधित्वस्यानवच्छिन्नियमविधेर्गुर्विति शास्त्रसिद्धं सारा रात्रिव्यापिनीत्येतत्पूर्वविद्धापरमिति तु
मम प्रतिभाति । अस्यामेव पशुपतीश्वरपूजोक्ता तत्रैव वा चैत्रशुक्लचतुर्दश्यामुपोषणपरायणाः । पूजयित्वा पशुपतिं
रात्रौ जागरणं तथेति ॥ वैशाखशुक्लचतुर्दशी नृसिंहजयंती तदुक्तं गोविंदार्णवे ब्राह्मे । शुक्लपक्षे चतुर्दश्यां मासि मा
धवसंज्ञके ॥ प्रादुर्भूतो नपंचास्यस्तस्मात्तां समुपोषयेत्तरां ॥ माधवो वैशाखः ॥ नपंचास्यो नसिंहः ॥ इयं च प्रदो
षव्यापिनी ग्राह्या । वैशाखस्य चतुर्दश्यां सोमवारे निलर्क्षके ॥ अवतीर्णो नसिंहस्य प्रदोषसमये द्विजा इति स्कांदो
क्तेः ॥ अनिलर्क्षयुक्ता ती । दिनद्वये प्रदोषव्याप्त्यव्याप्त्योर्विकदेशसमव्याप्तौ वा परा ॥ अनंगेन समायुक्ता न सा पोष्या च
तुर्दशी । धनायत्यैर्वियुज्येत तस्मात्तां परिवर्जयेदिति ॥ तत्रैव निषेधात् ॥ ध्येवे चम्पेरोतो कदशयोगे आधिक
मती ॥ अत्रैवोंकारेश्वरयात्राद्युक्तं काशीखंडे । राधशुक्लचतुर्दश्यां माद्यापि तेवकाशिनः तत्र यात्रां प्रकुर्वंति महो राम
४६

सवं पुरस्स्ताः ॥ तत्र जागरणं कृत्वा चतुर्दश्यामुपोषितः ॥ प्राप्नुवंति परं स्थानं यत्र कुत्रापि ते मताः ॥ ब्रह्मांडोदरम
ध्ये तु यानि तीर्थानि संवति । तानि वैशाखभूतायामागत्यो कारदर्शन इति ॥ भाद्रशुक्लचतुर्दश्यामनंतव्रतं तत्रोदय
व्यापिनी ग्राह्या । तथा भाद्रपदस्यांते चतुर्दश्यां द्विजोत्तम । पौर्णमास्याः समायोगे व्रतं चानंतकं चरेदिति गोविंदार्ण
वे भविष्योक्तेः । मुहूर्तमपि चेद्भाद्रे पौर्णमास्यां चतुर्दशी । संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमिति स्कांदाच्च मुहूर्त
मपीति त्रिमुहूर्तप्रशंसापरं ॥ माधवोऽप्येवं । दिनद्वये उदयव्याप्तित्वे संपूर्णत्वात्पूर्वैव । कार्तिककृष्णचतुर्दशी न
रकचतुर्दशी ॥ तत्र चंद्रोदये अभ्यंगः कार्यः । तदुक्तं हेमाद्रौ भविष्ये । अश्वयुक्कृष्णपक्षस्य चतुर्दश्यां विधूदये । ति
लतैलेन कर्तव्यं स्नानं नरकभीरुणेति । अश्वयुक्तं चामावास्यांतमासाभिप्रायेण अत एव हेमाद्रौ भविष्ये कार्ति
के कृष्णपक्षे तु चतुर्दश्यामिनोदये । अवश्यमेव कर्तव्यं स्नानं नरकभीरुणेति । इनः सूर्यः । इनक्षयं इति व्यावत्ताराणा
मंतएवा अतएव चतुर्दश्यां दिनोदये इति प्रावां पुस्तकेषु पाठः । अत्र च यथा वारं व्येवस्थेति केचित् । परे दिनेन पद
योश्चंद्रे लक्ष्यते माहुः । पूर्वविद्धचतुर्दश्यां कार्तिकस्यासितेतरे । पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः इति स्कांदा
दावाराद्ववस्तुतस्तु चंद्रोदयो मुख्यः कालः सूर्योदयो गौणः । उत्तरभावित्वात् । अत एव मदनः ॥ स्वकालादुत्तरो गौ
णः कालः सर्वस्य कर्मण इति । एवं च दाक्षिणात्यशिष्टाचारोऽप्यनुगृहीतो भवति । एवं चाभ्यंगे मुख्यश्चंद्रोदय

स.म. व्यापिनी दिनद्वये तद्व्याप्तौ पूर्वा। पूर्वोक्तिश्चंद्रोदये। दिनद्वये व्याप्त्यभावे पि पूर्वैव गौणकालसत्त्वात् तत्राप्यभावे पि पू-
र्वैव॥ तिथ्यादौ तु भवेद्यावान्ह्रासो वृद्धिः परेहनि॥ तावान्ग्राह्यः स पूर्वेद्युरदृष्टोपि स्वकर्मणीति वाक्येन त्रयोदश्यां
ते चतुर्दशीत्वात्सप्रसंगेपि तावद्भोदये मासिकचतुर्दशीसत्त्वात्। अत एव चंद्रप्रकाशे॥ त्रयोदशी यदा प्रातः क्षयं या-
ति चतुर्दशी॥ रात्रिशेषे त्वमावास्या तदाभ्यंगे त्रयोदशीति॥ ब्राह्मे तैले लक्ष्मीर्जले गंगा दीपावल्याश्चतुर्दशी। प्रातः
स्नानं तु यः कुर्याद्यमलोकं न पश्यतीति। पाद्मे अपामार्गमथो तुंबी प्रपुन्नाटमथापरं। भ्रामयेत्स्नानमध्ये तु नरकस्य क्ष-
याय वै॥ मंत्रस्तु सीतालोष्ठसमायुक्त सकंटकदलान्वित॥ हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति॥ तर्पणमुक्तं
मदनरत्ने भविष्ये ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः॥ यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय का-
लाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय ते नम इति॥ यज्ञोपवी-
तिना कार्यं प्राचीनावीतिनाथवा॥ देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपतेति। जीवत्पितापि कुर्वीत तर्पणं यमभीष्म-
योरिति पाद्मोक्तेर्जीवत्पितुरप्यत्राधिकारः॥ ततः प्रदोषसमये दीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भ-
वनेषु मठेषु च॥ प्राकारोद्यानवापीषु प्रतोलीष्कूटजेषु च। मंदुरासु विविक्तासु हस्तिशालासु चैव हीति॥ लैंगे। ततः प्रे- राम
तचतुर्दश्यां भोजयित्वा तपोधनान्॥ शैवान्विप्रान्स्वयं परां शिवलोके महीयते। दानं दत्वा तु तेभ्यश्च यमलोकं ४१

न गच्छति॥ माघपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः। प्रेतचतुर्दशीकाले सर्वपापैः प्रमुच्यत इति॥ कार्तिके शुक्ले वैकुंठ-
चतुर्दशी॥ वर्षे वै हेमलंबाख्ये मासि श्रीमति कार्तिके॥ शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति व्रताख्यं तदाकरोत्॥ मणि-
कर्णे च स्वमात्मानं चरन्पाशुपतव्रतमिति॥ तथा। ततः प्रभाते विमले कृत्वा पूजां महाद्भुतां॥ दंडपाणौ महानाम्नि दिने स्मिंश्च
व्रतपारणा॥ श्रीमद्भवानीसदनं प्रविवेश ह सत्तममिति सनत्कुमारसंहितोक्तेः। तत्र परकृतिस्वरूपेण तत्त्वेनार्थवादे-
न स्नात्वा विश्वेश्वरः पूज्य इति विधिः कल्प्यते। ततः प्राभातिकपारणा। विधेश्च पूर्वदिन उपवासः॥ स च चतुर्दशीयुक्तारुणो-
दयवत्यहोरात्रे कार्यः॥ काशीखंडे। कार्तिकस्य चतुर्दश्यां विश्वेशं यो विलोकयेत्॥ स्नात्वा वोत्तरवाहिन्यां न तस्य पु-
नरागतिरिति। मार्गशुक्लचतुर्दश्यां पिशाचमोचने पानोक्ता तत्रैव॥ मार्गशुक्लचतुर्दश्यां कपर्दीश्वरसंनिधौ। स्ना-
त्वान्नं तत्रापि मरणान्ने पैशाच्यमवाप्नुयुः॥ इमां सांवत्सरीं यात्रां ये करिष्यंति मानवाः॥ तीर्थप्रतिग्रहात्पापान्निस्
तरिष्यंति ते नरा इति॥ ॥ अथ शिवरात्रिः॥ स्कांदे। माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी॥ शिवरात्रिस्तु सा ख्याता
सर्वपापनिषूदनी॥ तत्र शिवरात्रिव्रतं नित्यं काम्यं च। परात्परतरं नास्ति शिवरात्रिः परात्परा। न पूजयति भक्त्येशं
रुद्रं त्रिभुवनेश्वरं। जंतुर्जन्मसहस्रेषु भ्रमते नात्र संशय इति तत्रैवाकरणे निषेधश्रवणेन नित्यत्वं। शिवं च पूजयित्वा यो
जागर्ति च चतुर्दशीं॥ मातुः पयोधररसं न पिबेत्स कदाचन॥ ममाभक्तस्तु यो देवि शिवरात्रिमुपोषकः॥ गणत्वमक्षयं दि-

स.म यंअतप्यंशिवशासनं॥सर्वरिभुक्त्वाकामहाभोगानमर्त्येभूयोननापतहति॥तत्रैवफल्गुनेःकाम्पेशिवरात्रिव्रतंनाम
सर्वपापप्रणाशनं॥आचंडालमनुष्याणांभुक्तिमुक्तिप्रदायकमितिशानसंहितोक्तेः।तथा।उपवासप्रभावेनबला
दपिचजागरात्।शिवरात्रेस्तथातस्यलिंगस्यापिप्रपूजया॥अक्षय्यांल्लभतेलोकाञ्छिवसायुज्यमाप्नुयादितिनागरखं
डोक्तेरुपवासजागरणपूजाःप्रधानानि।यत्तुसत्वाद्रिखंडेस्वयंचलिंगमभ्यर्च्योपवासःसनागरः॥अज्ञानतोपिनि
ष्पापोनिषादोगतवान्गणतांतदुपवासजागरणयोःकर्तृत्वात्प्रवाप्तातद्धर्मवादगतत्वेननतयोःप्राधान्यंवि
हंति।तत्रचतुर्दशीनिशीथव्यापिनीग्राह्या॥माघकृष्णचतुर्दश्यामादिदेवोमहानिशि॥शिवलिंगतयोद्भूतःकोटि
सूर्यसमप्रभः॥तत्कालव्यापिनीग्राह्याशिवरात्रिव्रतेतिथिरितीशानसंहितोक्तेः।नारदीयसंहितायामपि।अर्द्ध
रात्रेयुतायत्रमाघकृष्णचतुर्दशी॥शिवरात्रिव्रतंतत्रसोश्वमेधफलंलभेत॥स्कांदेपि॥महतामपिपापानांदृष्ट्वैवेनि
हंतिःपुरा॥नदृष्ट्वाकुर्वतांपुंसांकुहूयुक्तांतिथिंशिवामितिदर्शयोगस्यनिंदितत्वाद्ग्रंथांतरेपि॥भवेद्यत्रत्रयोद
श्यांभूतव्याप्तामहानिशा॥शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति॥ईशानसंहितायामपि।व्याप्यार्द्धरात्रंयस्यां
तुलभ्यतेयाचतुर्दशी॥तस्यामेवव्रतंकार्यंमत्प्रसादार्थिभिर्नरैः॥पूर्वेद्युर्वापरेद्युर्वामहानिशिचतुर्दशीव्या
प्तासादृश्यतेयस्यांतस्यांकुर्याद्व्रतंनरः॥लिंगाविर्भावकालेतुव्याप्ताग्राह्याचतुर्दशी।तद्धीधीनि[illegible]तासाका राम

५८

यमितिथिःसदा॥ममप्रियकरीह्येषामाघकृष्णचतुर्दशी॥महानिशान्वितायातुतत्रकुर्यादिदंव्रतमिति॥दि
नद्वयेनिशीथव्याप्तावव्याप्तौवापरैव॥आदित्यास्तमयेकालेऽस्तिचेद्याचतुर्दशी॥तद्रात्रिःशिवरात्रिःस्या
त्साभवेदुत्तमोत्तमेतिकामिकात॥प्रदोषव्यापिनीग्राह्याशिवरात्रिचतुर्दशी॥रात्रौजागरणंयस्मात्तस्मात्तांसम्
पोषयेदितिस्मृत्यंतरात्।दिवारात्रिव्रतेपक्षएकमेकतिथियोगतः॥तस्यामुख्यंभवेद्योगोऽन्यत्राभावेतुव्रतंप्रतीति
स्मृतेः।प्रदोषव्याप्ताग्राह्या।पूर्वदिनएवप्रदोषनिशीथोभयव्याप्तौपूर्वैव॥त्रयोदशीयदादेविदिनभुक्तिप्र
माणतः॥जागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशीतिस्कांदात्परेद्युरेवतादृशीचेत्सैव॥निशाद्वयेचतुर्दश्यां
पूर्वात्प्याप्तापराशुभेति।कामिकात्।येतुपूर्वेद्युर्निशीथेऽपरेद्युःप्रदोषेतदापूर्वेद्युरेव॥अर्द्धरात्रात्पुरस्ताच्चे
ज्जयायोगोयदाभवेत्।पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रियेतिपाद्मोक्तेः॥यत्तुएतस्मादेवववनादिनद्वयेनि
शीथव्याप्तौपूर्वैवेतिहेमाद्रिमदनौ॥तन्न॥एतस्यवचसउत्तरदिनेनिशीथव्याप्त्यभावेप्युपपत्तेः।उत्तरदिनप्र
दोषनिशीथोभयव्याप्त्यादिवारात्रिव्रतमितिपूर्वोक्तिवचसःसंकल्पकालस्यचबाधापत्तेः॥माधवाचार्यास्तु
तत्परा॥एवंअयमेवनिर्णयःप्रतिमासशिवरात्रावपि।आदौमार्गशिरेमासिदीपोत्सवदिनेतथा।गृह्णीया
न्माघमासेवाद्वादशीचमुपोषयेदितिहेमाद्रौस्कांदेचतुर्दश्यंतरेप्यारंभ्याद्वादशानाममासवरशविधानात्प्रतिमास

सम· कार्यं व्रतं। चतुर्दशाब्दं वै हं कार्यां तथा च हेमाद्रौ कालोत्तरे॥ चतुर्दशाब्दं कर्तव्यं शिवरात्रिव्रतं शुभमिति॥ इयं च रविभौमयो
शिवयोगे वातिप्रशस्तेति माधवीयस्कांदे॥ माघकृष्णचतुर्दश्यां रविवारो यदा भवेत्॥ भौमो वाथ भवेद्देवि कर्तव्यं व्रतमुत्त
मं॥ शिवयोगस्य योगे वै तद्भवेदुत्तमोत्तममिति। भविष्ये। माघमासे चतुर्दश्यां कृष्णपक्षे समाहिताः॥ कृत्तिवाससमभ्य
र्लिंगं अर्चयंति शिवं शुभं। ते यांति परमं स्थानं सदाशिवमनामयमिति॥ पारणं तु तिथिमध्ये एव कार्यं तथा च माधवी
ये स्कांदे। उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणं॥ कृतैः सुकृतलक्षैश्च लभ्यते वाथवा नवा॥ ब्रह्मांडोदरमध्ये तु या
नि तीर्थानि संति वै॥ संस्नातानि भवंतीह भूतायां पारणे कृते॥ तिथीनामेव सर्वासामुपवासव्रतादिषु। तिथ्यंते पा
रणं कुर्याद्विना शिवचतुर्दशीमिति। यत्तु जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या तिथिभांते च
पारणमिति। स्कांदे च। कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी॥ एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति तद्
त्काल परं॥ स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मणः इति मंडनोक्तेः॥ ॥इति चतुर्दशी॥ अथ पूर्णिमामावास्या
दिश्री व्यतिरिक्ताः सर्वाः परैव। भूतविद्धा न कर्तव्या दर्शः पूर्णा कदाचन॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति
ब्रह्मवैवर्ते॥ सर्वत्र॥ सर्वास्वपि पूर्णिमासु अमावास्यासु च श्राद्धं नित्यं। तथा च पितामहः। अमावास्या व्यतीपात
पौर्णमास्यष्टकासु च॥ विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यत इति। चैत्रपूर्णिमायां विशेषो माधवीये। संवत्सरं कृत। राम ४९

वीयाः सा पक्वान्नपायसादिना तु राघ॥ दमनेनार्चयित्वैव विशेषेणास्य शिवमिति॥ मेषस्थे रवौ यामावास्या तदंते चांद्र
याः पूर्णिमासी सा चैत्री। एतत्क्रमेणान्यास्वपि॥ तदुक्तं हरदत्तेन। मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते॥ चांद्रमासा
स्तत्तदंताश्चैत्राद्या द्वादश स्मृताः॥ तेषु याः पौर्णमासीः सा सा चैत्र्यादिका स्मृता॥ कार्त्तिके न योगेन नक्षत्रस्येति नि
र्णयः इति। अथ वैशाखपौर्णमास्यां विशेषः॥ तत्र जाबालिः। पूतात्मा उदकुंभं च वैशाख्यां च विशेषतः॥ निर्दिश्य धर्म
राजाय गोदानफलमाप्नुयात्। अथ ज्येष्ठपौर्णमास्यां वटसावित्रीव्रतं भविष्ये। ज्येष्ठमासि सिते पक्षे पूर्णिमायां त
था व्रतं॥ चीर्णं पुरा महाभक्त्या कथितं ते मयानघेति॥ इयं पूर्वविद्धा ग्राह्या। युग्मवचनात्॥ ब्रह्मवैवर्तेपि प्रतिपत्प्र
त्यभिभूता सावित्रीव्रतपूर्णिमा॥ नवमी दशमी चैव नोपोष्याः परसंयुताः॥ आषाढी पूर्णिमासी तु कोकिलाव्रतप्रक्रमे
संध्याकालव्यापिनी ग्राह्या॥ आषाढपौर्णमास्यां तु संध्याकाले त्वकपस्थिते॥ संकल्पयेन्मासमेकं श्रावण्यां प्रत्यहं त्विद
मिति भविष्योक्तेः॥ सैव व्यासपूजायामौदयिकी त्रिमुहूर्ता ग्राह्या॥ तथा च विश्वेश्वरपद्धतौ॥ त्रिमुहूर्ताधिका ग्राह्या
पर्वक्षौरव्रतादिषु इति॥ अत्रैवाषाढेश्वरयात्रा पूजा चोक्ता काशीखंडे॥ उदीच्यां मारमूर्तेश्च नामाषाढीश समर्चयेत्॥
आषाढ्यां पंचदश्यां वै न पापैः परिभूयते॥ कृत्वा सांवत्सरीं यात्रामनेनायतनेन नर इति। अनेन निःपापः। श्राव
णी पौर्णमासी पवित्रार्पणादौ पूर्वविद्धा ग्राह्या तदा हव्यग्रहमाः॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥ पूर्व

स·म· विद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति॥ वेधस्तु त्रिमुहूर्तात्मिको ज्ञेयः॥ तदुक्तं स्कांदे॥ प्रतिपत्समनुप्राप्य यापत्पत्तं परि
नीयते॥ सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्ता विधा भवेदिति॥ अथोपाकर्म याज्ञवल्क्यः॥ अध्यायानामुपाकर्म श्रावणस्यां
श्रवणेन वा॥ हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य तु इति हस्तेन युक्तायां पंचम्यामिति स्मृतिचंद्रिकायां दिनांतरेपि
हस्तेन युक्त इति हेमाद्रिः॥ श्रवणश्रावण्यादि वेदमेव युक्तं॥ एवमेव स्मृत्यर्थसारेपि॥ औषधीनामप्रादुर्भावे तु बहु
ऋग्वेदत्वकारिकायां॥ अध्यायानामुपाकर्म श्रावणस्यां श्रवणेन तु॥ अवष्टंभोषधयस्तस्मिन्मासे तु न भवंति चेत्॥ तदा भा
द्रपदे मासि श्रवणेन करोति सत्॥ अत्र श्रवणो धनिष्ठायुक्तो ग्राह्यः॥ श्रवणेन तु यत्कर्म उत्तराषाढसंयुतं॥ संवत्सरकृ
तोध्यायस्तत्क्षणादेव नश्यति॥ धनिष्ठासंयुते कुर्याच्छ्रावणं कर्म यद्भवेदिति व्यासोक्तेः॥ गर्गः॥ पर्वण्यौदयिके कुर्युः श्रा
वणं तैत्तिरीयकाः॥ बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते इति॥ अत्र तैत्तिरीयाणामौदयिके पर्वणि कुर्युः ये तु याजुषाः
पूर्वविद्धैव श्रावणी दुर्गानवमी दूर्वाश्चैव हुताशनी॥ पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति वचनादिति हेमाद्रौ॥
तैत्तिरीयदयानु प्रमाणात्रोपलत्तत्तो तेन सर्वे प्यौदयिकी श्रावणी दुर्गानवमीत्यादि वचस्तु पवित्रारोपणादिकृत्यांतर
विषयमुपाकर्मणि भूतानुपृह्यिक विषयं चेति निर्णयामृते॥ तत्रोपलत्तत्वेमानं चिंत्यं॥ पर्वश्रवणयोगस्तयोरैक्ययह
णासंक्रांत्योः पर्युदासप्रयोजनकतानतत्सामानाधिकरण्येन नक्षत्रत्वात्तिथ्यंतरनक्षत्रांतरगतयोरपि॥ तेन चतुर्दशीप्र राम ५०

तिपदुत्तराषाढाधनिष्ठासु ग्रहणे संक्रांतौ वा पर्वणि श्रवणे वोपाकर्म कार्यमिव॥ स्मृतिमहार्णवे॥ संक्रांतिर्ग्रह
णं वापि पौर्णमास्यां यदा भवेत्॥ उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति॥ वाजसनेयिपदं बह्वृचानामप्यु
पलक्षणं॥ पंचम्यां हस्तेनैवेति तत्सूत्रात्॥ तच्छेदश्लोषकदिति॥ परत्वाभ्ज्ञेत्परे हुतीत्यपि क्वचित्पाठः॥ नदापरेहन्यपि
निषेधः॥ बृहस्पतिः॥ नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके॥ कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे इति तदपित
त्प्रत्येवदेशविशेषिता कर्सिंहकर्कव्यवस्थापरं॥ एवं हि लाघवं भवति॥ प्राप्तिः सिंहकोपमितिरनुधावनमर्दोत्तरभाग
इति॥ एवं चतत्प्रत्येवदक्षिणभागे कृत्स्नाकापमित्याकांक्षितेऽकर्कटे इत्याकांक्षितविधिर्भवति बह्वृचादीन्प्रति तु श्र
श्रा प्राप्तसिंहादिविधेर्गौरवमनाकांक्षितविधिश्च स्यात्॥ एके कोटिसिंहमात्रप्राप्तां वर्णिकोद्यंतरकर्कटप्राप्तो व्य
वस्थाविधिसंग्रहः॥ तए वा पाठतो द्वितीयस्थानेतनूनपात्प्रयाजः प्राप्तो नराशंसस्य वा प्राप्तो वासिष्ठादीनां नाराश
सो द्वितीयः प्रयाजस्तनूनपादन्येषामिति वदितितातवररा॥ कात्यायनः॥ उत्कर्षकालवृद्धोत्यादुपाकर्मादि
कर्मत्ति॥ पराशरः॥ उपाकर्म तथोत्सर्गं प्रसिसवाहोत्सवाष्टकाः॥ मासवृद्धौ पौकार्या वर्जयित्वातु पैतृकमिति॥
परे उत्तरेमासि॥ प्रसवाहोत्सवो नांतिष्यादिः संग्रहे॥ गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्द्धके पि वा॥ तथाधिमास
संसर्पमलमासादिषु द्विजाः॥ प्रथमोपाकृतिर्नस्यात्कृतं कर्मविनाशकृदिति॥ पत्र्युकश्यपः॥ गुरुभृकतितेधानेवज्जयित्

तिवोदितं॥इत्याह भगवाननिरुक्तावर्तांतुविशेषतइति॥नदर्शप्रथमोपाकर्मपरं॥अत्राधिमासादौप्रथमोपाकर्मनिषेधः
प्रत्यवायादिशयद्योतकोनपुनर्द्वितीयादिप्रयोगप्राप्त्यर्थं॥नित्यस्यापिसगतिकत्वेनमलेकर्तुमयुक्तत्वात॥कात्याय
नादिभिःसर्वप्रयोगसाधारण्येननिषिद्धत्वाच्च॥पद्धत्सामगानामधिमासेकर्तव्यतयाप्रथमोपाकर्मनिषेधःसामगविषय
एवापत्रुक्तव्यम्भंगः॥दशहरासुनोत्कर्षश्चतुर्दश्यपिपुगादिषु॥उपाकर्ममहाषष्ठ्योर्द्ध्वेतदिहृत्वंद्धादितइतितत्छंदोगानां
ति॥तेषांसिंहककोंपजीवनेनविहितस्योपाकर्मत्त्वात्रिममासेऽसंभवात॥कात्यायनः॥प्रत्यब्दंयदुपाकर्मसोत्सर्गंविधि
वद्द्विजेः॥क्रियतेछंदसांतेनपुनराप्यायनंभवेत॥अयातयामैश्छंदोभिर्यत्कर्मक्रियतेद्विजैः॥क्रीडमानैरपिसदा तत्तेषां
सिद्धिकारकं॥कोर्मि॥श्रावणस्यतुमासस्यपौर्णमास्यांद्विजोत्तमाः॥आषाढ्यांप्रोष्ठपद्यांवावेदोपकरणंस्मृतं॥अत्रा
षाढीबौधायनपरैव॥श्रावण्यांपौर्णमास्यांआषाढ्यांवोपकल्पेतितत्सूत्रादितितैत्तिरीयकाणांपूर्वंवेदसामान्यविधिरस्य
तुःसंदिग्धेतविशेषतइतिन्यायात॥यत्तुनिर्णयामृतेमाधवीयेच॥उपाकरणमनुद्यमासमात्रंविधीयते॥उपाकर्म
त्रसर्वशाखाप्रत्ययमेकंकर्मेतिन्यायेनेकमेवातेनबह्वृचसामगयोरप्याषाढगतमवेतद्द्वचयोरुपाकर्मणौत्तमासी
परत्ववद्युपानुवादइतितन्न॥उपसंहारेसत्याषाढ्यामन्यान्यत्रप्रवृत्तेःपौर्णमासीपदेवद्युत्यानुवादत्वायोगाद्बाग्नोमि
त्तःपर्दत्यपौदयिकेऋग्यजुःश्रावण्यांतैत्तिरीयकाः॥बह्वृचाःश्रवणेतुहस्तेसामवेदिनइति॥औदयिकइतिश्रवणाहु

स्तांम्पामपिसंबध्यते॥औदयिकंपर्वविशिनष्टिसएवश्रावणीपौर्णमासीत्वसंगवात्परतोयदितदातौदयिकीग्राह्यानान्या
न्यात्वौदयिकीभवेदिति॥परिशिष्टे॥धनिष्ठाप्रतिपद्युक्तंत्वाष्ट्रऋक्षसमन्वितं॥श्रावणंकर्मकुर्वीतऋग्यजुःसामपाठ
कः॥तर्पयित्वा॥प्रचेताः॥भवेदुपाकृतिःशेषःपौर्णमास्यांपूर्वाह्न एवतुइति॥एतद्द्वयाघ्यानुषपरं॥छंदोगानांविशेषमाहगोभि
लः॥अध्यायानामुपाकर्मकुर्यात्कालेपराह्णिके॥पूर्वाह्णेतुविसर्गःस्यादितिवेदविदोविदुरिति॥उपाकृत्याधीयीतेतितु
सूत्रादिमेउत्सर्जनोपाकर्मतीग्रहणाध्ययनांगे॥ग्रहणाध्ययनंतुब्रह्मचारिणएव॥अधीत्यस्नायादितिस्मृत्यायां
कौलीनत्वावगतेः॥अतोब्रह्मचारिणएवेमइतिकेचित॥तन्न॥स्नातकस्यापिग्रहणाध्ययनसंभवात॥वेदव्रतानि
वापारंनीत्वाह्युभयमेव वा॥अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेदितियाज्ञवल्क्यवाक्येनसमावर्तनोब्रह्म
चारिकल्पेनयथान्यायमितरेजायोपेयेत्येकेइत्याश्वलायनसूत्रेणावस्थानेतरमपितद्विधानात॥अधीयीतेत्य
नुवर्त्तिःसमावर्त्तोकृतविवाहः॥ब्रह्मचारिकल्पस्तन्नियमजातं॥इतरेब्रह्मचारिताः॥जायोपेतोगृहस्थएवंचत्रयो
प्यधिकारिणइति॥माधवोप्येवं॥यत्तुहेमाद्रिः॥जायोपेयीतिपपाठ॥समावर्त्तोजायोपेयीतिविशेषणाविशेष्यभावे
नद्व्याख्यईतन्न॥व्यवहितान्वयात्समावर्त्तपदवैय्यर्थ्यापाताच्च॥हरदत्तस्तु॥उपाकृत्याधीयीतेत्यध्ययनप्रपदेनग्रह
णाधारताब्रह्मयज्ञपारायणाद्यध्येतॄणांमात्रंगृहणाध्ययनमात्रंतेनतद्वतांब्रह्मचारिगृहस्थवानप्रस्थानांत्रयाणाम

पर्यं धर्मः ॥ जायोपेयेतिवपाठः ॥ तत्र च समावृत्तो ब्रह्मचारिकल्पेनेतिप्राप्तं ब्रह्मचर्यं समन्तोप्रतिप्रसूयते । जायाउपेयागम्ये
ति मनुस्मृतिटीकायां नारायणीयायामप्येवं ॥ नारायणवृत्तौ तु अथातोध्यायोपाकर्मेति सूत्रे व्याख्यानेयस्माद्ब्रह्म
यज्ञाध्ययनं नित्यं अतउपाकर्मविस्पक मित्यादिना ब्रह्मयज्ञागताध्युक्ता । अनन्तः सर्वैरपि कार्यं अत एव जीवत्प्रियोग
रत्नेगोभिलः उपाकर्मोत्सर्जनं वनस्थानामपीष्यते ॥ धारणाध्ययनांगत्वात् गृहिणां ब्रह्मचारिणामिति ॥ उपाक
र्मणाश्चाधप्रयोगे च वृद्धिश्राद्धमंगमिति नारायणवृत्तौ ॥ अत्राध्यायोत्सर्जनाद्यपि ध्यमाराद् त्पाश्वलायईनादिसू
त्राद्वतुरवत्तपंवा वत्साख्यमित्रकल्पानामपि विश्वामित्रनामदग्न्यादीनामपि सहाधिकारः ॥ वसिष्ठभृगुकात्रिवध्य
श्वराजन्यानां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति नाराशंसद्वितीयप्रयाजवतां तनूनपाद्द्वितीयप्र
याजवतश्च काश्यपादेः पुरोहितस्ये तेन राजपुरोहितौ सायुज्यकामो यजेयातामिति विहितकुलापेपागइवातेत्रापि
समानकल्पयोरेव राजपुरोहितयोधिकारो न्विति चेन्न ॥ एतदधिकारास्य तुल्यकल्पाधिकाराधिकरणापवादत्वेनया
भाष्यादेप्रतिपादितत्वात् अतएव कार्ष्णाजिनिः ॥ उपाकर्मणि चोत्सर्गे यथाकालंसमेत्य तु । ऋषीन्दर्भमयान्कृ
त्वा पूजयेत्तर्पयेत्ततइति व्यासः । ऋषीणामर्चनं सर्वकर्तव्यं च निवीतिनेति । कार्ष्णाजिनिः ॥ वेदारंभणात् पूर्वंसि
कुप्राशनतः परं ॥ नवयज्ञोपवीतानि दधाद्धारयेत्ततइति । गालवः । कृत्वायज्ञोपवीतानि नवानि वसुधाधिपा ॥ कु

त्वाग्नौ गुरुवेदत्वा पितृभ्योधारयेत्ततइति ॥ पितृभ्यइत्यत्रापि द्वत्वेत्यनुषज्यते ॥ वायवीये ॥ उपाकर्मणि तिथिं विप्रेभ्यो
दद्यादयज्ञोपवीतकं ॥ आपुष्ट्या ज्ञापनेनेन कर्मतामानवोऽनुवि ॥ ब्रह्मचारिणो विशेषः कात्यादर्शे ॥ मौञ्जीयज्ञोप
वीतंच नवं दंडं वधारयेत ॥ अजिनं कटिसूत्रं च नवं वस्त्रं तथैव च ॥ अत्र विशेषः कारिकायां ॥ पश्चादग्नेस्तु दर्भेषु प्रागग्रे
पूपविश्य वा आसित्वाप्यः शारावा दोदभास्तत्रनिधायवा ॥ प्रागग्रदर्भगर्भास्ति कुपूर्बह्मा नत्वीनयामव्याहृतिजप
तके द्वेसाविश्रीब्रह्मयज्ञवत ॥ त्रिरभ्यस्येपुरोकारंव्याहृतीश्चात्रकर्मणि ॥ गोभिलः ॥ उत्सर्जनं च वेदानामुपाकर्म च वि
अकृत्वा वेदजप्येन फलं प्राप्नोतिमानवः ॥ तत्फ पा कर्मनिर्णयः ॥ ॥ अथोत्सर्जनंमनुः ॥ पुष्ये तु छंदसां कुर्याद्द्वहि
रुत्सर्जनं द्विजः ॥ माघशुक्लस्य वाप्राप्ते पूर्वाह्णे प्रथमेहनीति ॥ व्यन स्थितस्यापि विकल्पः ॥ श्रावण्यां प्रोष्ठपद्यां वा
प्युपाकृत्य यथाविधि ॥ युक्तश्छंदांस्यधीयीत मासान्विप्रोर्द्धपंचमानि तिनेनैवोक्तत्वात् । पूर्वाह्णे प्रथमेहनीत्य
भयत्रसंबध्यते ॥ एवं वर्षादाश्रावण्यामुपाकर्मतिदापौषमासस्य शुक्लप्रतिपदि पूर्वाह्ण उत्सर्जनं ॥ यदातु प्रोष्ठ
पद्यामुपाकर्म तदामाघशुक्लप्रतिपत्पूर्वाह्णे इति स्मृतिचंद्रिकाकारादयः ॥ विज्ञानेश्वरयोगिनस्तु पूर्वाह्णइत्य
वपदं पुष्येन्वेति ॥ ननु भूकृप त्यादि ॥ पौषमासस्यरोहिणयामष्टकायामथापि वेति तत्र कालविशेषस्योक्तत्वा
दितातु ॥ पुक्तंतु पूर्वाह्णेदैविकं कर्मेति पूर्वाह्णस्याप्राप्ते नतस्यापि विधानां एवंवपदापौषरोहितपष्टकयोरे

राम. वोत्सर्जनं॥ तदार्द्रपंचम्यां नित्यत्रार्द्रशब्दद्वयं स्पष्टमेवोल्लिखितमादिवत्तद्वचनमेव॥ अनियतत्वं च बोधायनेनोक्तं।
श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य तैष्यां माघ्यां वोत्सृजेदिति वसिष्ठेनाप्युक्तं॥ आर्द्रपंचम्यां मासान॥ अ-
धीत्योत्सृजेत्सर्वेष्व छंदांसीति॥ पतुकात्यायनः॥ उपाकृत्योदगयने ततोधीयीत धर्मवित्॥ उत्सर्गश्चैक एवैषां तैष्यां
प्रोष्ठपदेपि वेति॥ तत्र प्रोष्ठपदपदं सिंहोपलक्षकं तच्च दोषापरमेव॥ सिंहे रवौ तु पुष्ये तु पूर्वाह्णे विवरेद्बहिः॥ छं-
दोगा मिलिताः कुर्युरुत्सर्गं सर्वछंदसामिति गार्ग्यवचनात्॥ खादिरगृह्ये तु पुष्ये तत्सर्जनं कुर्यादुपाकर्मदिने य-
वेति॥ कालांतरमप्युक्तं॥ एतदनुकूले वृश्चिकतिः॥ स्वाध्यायपनार्थां अत एवोपाकृत्योदगयन इति॥ उपाकर्मदिने पा-
धाना वोत्सर्जनं द्रप्राप्तेरुत्सर्गश्चैक एवेषामिति त्रयेवत॥ अत्र ऋषिपूजा तर्पतां वकार्यौ तथा स्मृतिचंद्रिका-
यां पुराणे॥ उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च॥ ऋषीन्संतर्पयेन्मंत्रैः पितृन्पितृतर्पणं॥ आश्वलायने-
त्तु माध्यामेव कार्यं॥ अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयत इति कारिकोक्तेः॥ अनुकल्पस्तु पूर्वोक्तस्मृति-
रस्म स्योक्तो ज्ञेयः॥ उत्सर्जनोत्तरकार्यमनुराह॥ अत ऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठेत॥ वेदांगानि तु सर्वाणि कृष्णेषु
मीति केवनेति॥ शांति कुर्युर्विद्वांस न लीनया। सव्याहृतिं पंक्तिभिः सावित्रीं ब्रह्मपतवत॥ त्रिरभ्यस्य पुरो कार्या
कृतीश्चात्र कर्मत्ति। गोभिलः॥ उत्सर्जनं च वेदानां उपाकरणकर्मवि॥ अकृत्वा वेदजप्येन फलं प्राप्नोति मानवः॥ इति॥ राम
५४

तैत्तिरीयाणां विशेषमाहापस्तंबः॥ तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेद्दर्धपंचमांश्चतुरो मासानित्येक इ-
ति॥ अत्र नदीनां रजोदोषो नेत्याह गार्ग्यः॥ उपाकर्मणि चोत्सर्गे रजोदोषो न विद्यते॥ ॥ इत्युत्सर्गः॥ इष्यादनेन
मंत्रेणासुदीपां श्वसुलाजपे॥ कीटाः पतंगा मशका वृक्षास्ते जले स्थले ये विचरंति जीवाः॥ दृष्ट्वा प्रदीपं न हि जन्म
भागिनो भवंति मत्यं श्वपचा पि विप्राइति। फाल्गुनपौर्णमास्यां होलिकोत्सवः स पंच प्रति ना तद्वचो भविष्ये॥
र्जनं॥ श्रावणपामेव रात्रौ सर्पबलिस्तैत्तिरीयाणां॥ श्रावण्यां पौर्णमास्यां स्थालीपाक इति सूत्रात्॥ आश्वलाय-
नीयैस्तु श्रवणाकर्म कार्यं॥ श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति सूत्रात्॥ इदं च प्रदोषव्यापिन्यां पौर्णमास्यां का-
र्यं। प्रदोषस्य कर्मकालत्वात्। कर्मणि यस्य यः कालस्तत्कालव्यापिनी तिथिः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कार-
णमिति वाक्यात्॥ दिनद्वये तद्व्याप्तावव्याप्तौ वोत्तरदिने। विकृतित्वात्॥ एवं सर्पबलिरपि एतस्यामेव पौर्णमास्यां
तत्राप्ययमेव निर्णयः॥ आश्विनपौर्णमास्यां आश्वयुजीप्रावसधिमात्रप्रकृतिविकृतिप्रयोगपर्याप्ते पर्वणि केवल-
स्मार्तग्निमतां बह्वृचानामाश्वयुजीकर्माग्रयणस्थालीपाकः समानतंत्रः पाकयज्ञसमासाद्य एकाग्नावेक-
बर्हिषिः। एकस्विष्टकृतः कुर्यान्नानापि सति दैवत इति सूत्रात्॥ शेषः परमुत्कृमाग्रायणाः कर्त्राकुर्यां पौर्णमा-
सासु चनदितिरीपिकादिलिखस्त्वित सूत्रागोचरः श्रौतपरः॥ इति पद्धत॥ आश्वलायनान्यापरे वाश्रीत्वाग्रयणामस्या

स.म. मिवश्यामाकैः प्रस्तरः कार्य इत्याग्रयणामिति नारायणः तस्मात् प्रयोगरत्ने च तत्र प्रस्तरशब्दवसंस्कारवाचित्वाद्दर्शपि
तामिमिति कल्पवनादिषूक्तं प्रस्तरं कृत्वा स्वपात्राद्युत्तरत आसादयेत् कृतकार्यबाधापत्तेस्मिन्नेवमासादयेत॥ कार्त्ति
कपौर्णमास्यां कार्त्तिके यद्दर्शनमुक्तं काशीखंडे। कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनं सप्तजन्म भवेद्विप्रो धन
नाढ्यो वेदपारगः इति त्रिपुरोत्सवोप्यत्रोक्तो भविष्ये पौर्णमास्यां तु संध्यायां कर्त्तव्यस्त्रिपुरोत्सवोप्यत्रोक्तो भवि
ष्ये पौर्णमास्यां तु संध्यायां कर्त्तव्यस्त्रिपुरोत्सवः॥ दद्यादनेन मंत्रेण सुदीपांश्च सुरालये॥ कीटाः पतंगा मशकाश्च
वृक्षाः जले स्थले ये विचरंति जीवाः॥ दृष्ट्वा प्रदीपं न हि जन्मभागिनो भवंति सत्यं श्वपचा हि विप्रा इति॥ फाल्गु
नपौर्णमास्यां होलिकोत्सवः। स च प्रतिनारदवचो भविष्ये॥ अथ पंचदशी शुक्ला फाल्गुनस्य नराधिप॥ अभयं
वै बालोकानां दीप्यमेश्वर॥ पश्चाद्धि शंकितालोकारमंति वहसंति वादारुजानि तु खण्डानि गृहीत्वा समुत्सुकाः॥
योधा इव विनिर्यान्तु शिशवः संप्रहर्षिताः॥ संप्रहर्षिताः॥ संचयं शुष्ककाष्ठानामुपलानां च कारयेत्॥ तत्राग्निं वि
धिवद्धुत्वा रक्षोघ्नैर्मंत्रविस्तरैः॥ ततः किलकिलाशब्दैस्तालशब्दैर्मनोहरैः॥ तेन शब्देन सा पापा होमेन च निराकृ
ता॥ सा दोढा राक्षसी॥ तत्रैवासवदुक्तापहोहोमः सर्वरोगोपशान्तिदः॥ क्रियतेस्यां द्विजैः पार्थ तेन सा होलि राम
का स्मृता॥ तमग्निं त्रिः परिक्रम्य गायंतु च हसंतु च जल्पंतु स्वेच्छया लोका निःशंका यस्य यन्मनः॥ तत्र पूर्णिमा प्रदो ५५

षव्यापिनी ग्राह्या॥ तदुक्तं तत्रैवाप्यपरे होलिकां कुर्यात्पूर्वाह्णे क्रीडनं गवामिति॥ सा पापात्र प्रदोषः॥ तथा च तत्रैव
नारद्या पूर्णिमायां तु रजन्यां होलिकोत्सव इति। चंद्रप्रकाशे नारदीये प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा॥ संवत्सरं तत
द्राष्ट्रं पुरं दहति साद्भुतं॥ प्रदोषव्यापिनी ग्राह्या पौर्णिमा फाल्गुनी सदा॥ तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे
इति॥ निशागमे तु पूज्येत होलिका सर्वतोमुखे इति पृथ्वीचंद्रोदये दुर्वासोवाक्याच्च॥ दिनद्वये तद्व्याप्तौ परे वा भद्रायां
दीपिता होली राष्ट्रभंगकरोति वै॥ नगरस्य च नैवेद्यात्तस्मात्तां परिवर्जयेदिति॥ पूर्वदिने भद्रायुक्तत्वेन परा ससमू
ह योक्त निषेधात्तु पूर्वदिने प्रदोषव्यापिनी न परदिने चेत्तदा पूर्वेद्युरेव रात्रौ भद्रां विहाय कार्या॥ यदि नां दृष्टि परके या
स्यात्फाल्गुनी पूर्णिमा यदि। रात्रौ भद्रावसाने तु होलिकां तत्र दीपयेदिति मदनरत्ने॥ राकायामद्भुपा हुधर्मे तु
दर्शपौर्णमासे भविष्ये होलां भद्रावसाने तु निशीथांते विदीपयेदिति पुराणसमुच्चये पातव॥ परं तु भद्रायां विहितकार्यं होला
लिकायाः प्रपूजनमिति॥ पञ्च॥ मध्यरात्रमतिक्रम्य विष्टेः पुच्छं यदा भवेत्॥ प्रदोषे ज्वालयेद्वह्निं सुखसौभाग्यदायका॥
प्रदोषान्मध्यरात्रांतं होलिका पूजनं शुभमिति वचने खितदिवाकरः॥ यदा पूर्वरात्रौ प्रदोषव्याप्यभावस्तत्त्वेपि
वा भद्रारहितः कालो न प्राप्यते उत्तरदिने च प्रदोषे पूर्णिमाभावः तदा भद्रा पुच्छिकायां तथा च लल्लः॥ पृथ्वीव्यापा
निकाव्यापिनी शुभा नित्यमशुभा नितु॥ तानि सर्वाणि सिध्यंति विष्टिपुच्छे न संशयः इति॥ भद्रापुच्छं तु ज्योतिःशास्त्रे प्रसि

ढं ॥ अग्निमेवविषयकत्वविनेपूर्णिमासार्द्धयामत्रयमितानंतोधिकाकावाप्रतिपद्वृद्धिस्तदापूर्णिमोत्तरं प्रतिपदि
प्रदोषे होलिकाकार्या न तु पूर्वेद्युर्विष्टिपुच्छे ॥ सार्द्धयामत्रयं पूर्णा द्वितीये दिवसे यदा ॥ प्रतिपद्वर्द्धमाना तु तदा सा हो
लिका स्मृतेतिभविष्योक्तेः ॥ या तूत्तरदिने प्रदोषैकदेशोक्ति पूर्वरात्रौ भद्रारहिता नैव लभ्यते सा सूत्तरा मुत्तरेव ॥ य
दा पूर्वरात्रिभद्राव्याप्ता उत्तरदिनप्रदोषे च चंद्रग्रहणं तदा तत्र स्नात्वा कार्यं स्नात्वा कर्माणि कुर्वीत भृतमन्नं विवर्जये
दितिवचनात् ॥ फाल्गुनो मलमासश्चेच्छुद्धमासे होलिका कार्या विशेषवाक्यविहितत्वं न चिन्मलइति वचनात् ।
होलिकापूजनमंत्रस्तु ॥ असृक्पाभयत्रस्तैः कृता त्वं होलि बालिशैः ॥ अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेति दिक् ॥
॥ इति पूर्णिमानिर्णयः ॥ अथामावास्या ॥ सा च व्रतोपवासादौ वृत्ता ॥ प्रतिपद्यप्यमावास्येति युग्मवाक्यात् ॥ अमाव
स्या न तु याचतां कपीत्याः पराश्च ता इतिस्मृतेश्च ॥ भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुंगवैरिति स्कांदे पूर्वविद्धानि
षेधाच्च ॥ अस्यां सोमयोगे कपिलधारातीर्थे श्राद्धमुक्तं काशीखंडे ॥ अमा सोमसमायोगे श्राद्धं यद्यत्र लभ्यते तीर्थे
कपिलधारेऽस्मिन् गयया पुष्करेण किं ॥ दिव्यां तत्र तु भूतानि यानि तीर्थानि सर्वशः ॥ तान्यत्र निवसिष्यंति दर्शे सो
मदिनान्विते ॥ भाद्रामावास्यायां कुशग्रहणमाह हारीतः ॥ मासि नभस्यमावास्या तस्यां दर्भोच्चयो मतः ॥ अयात
यामास्ते दर्भा विनियोज्याः पुनः पुनरिति ॥ कार्त्तिकामावास्यायां कृत्यमुक्तमादित्यपुराणे ॥ दिवा तत्र न भोक्तव्यं ऋते बा

लातुराज्जनात् ॥ प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमं ॥ दीपवृक्षास्तथा कार्याः शक्त्या देवगृहेषु च ॥ ब्राह्म
णान् भोजयित्वादौ संभोज्य च बुभुक्षितान् ॥ अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिनेति ॥ तत्रामावास्यायां ज्योति
र्निबंधे ॥ तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनमिति ॥ अत्र प्रदो
षव्यापकर्मकालत्वोक्तेः पूर्वेद्युरेव रात्रौ व्याप्तौ पूर्वैवाउत्तरेद्युरेवोभयत्र तथात्वे उत्तरैव ॥ भविष्ये कृत्वा तु पार्वणं श्रा
द्धं दत्त्वा ततोऽपराह्णसमये इत्यादिना दीपदानादेरुक्तत्वाद्दर्शश्राद्धोत्तरमेव तत्कर्तव्यमिति न भ्रमितव्यं ॥ नह्य
त्रानयोः क्रमो विधीयते किं त्वखंडामायां एव प्रायो व्यवहार्यत्वेन प्राप्तत्वादनूद्यते ॥ उभयदिने तद्व्याप्यभावे पू
र्वैव गौणकालेसत्त्वात् ॥ ॥ अथार्द्धोदयः ॥ भारते ॥ अमार्कपातश्रवणैर्युक्ता चेत्पुष्यमाघयोः ॥ अर्द्धोदयः स
विज्ञेयः कोटिसूर्यग्रहैः समः ॥ दिवैव योगः शस्तोऽयं न तु रात्रौ कदाचन ॥ स्कांदे ॥ अर्द्धोदये तु संप्राप्ते सर्वं गंगासमं जलं ॥
शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिताः ॥ यत्किंचिद्दीयते दानं तद्दानं मेरुसंमितं मितमिति ॥ तत्रैव चतुःषष्टिप
लं सुवर्णममत्रं तत्र कारयेत् ॥ चत्वारिंशत्पलं वाथ पंचविंशतिमेव वा ॥ निधाय पायसं तत्र पद्ममष्टदलं लिखेत् ॥
पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकं ॥ तदभावे तदर्द्धं वा तदर्द्धं वापि कारयेत् ॥ कृत्वा तु तंडुलैः शुद्धैः पद्ममष्टद
लं स्मृतं ॥ अमत्रं स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकं ॥ तेषां प्रीतिकरार्थाय पिष्टैर्वा तमालपत्रैः सुशोभनैः ॥ वस्त्रादिभिर

स॰ लंकृत्य ब्राह्मणायनिवेदयेत्। मंत्रश्च। सुवर्णपात्रमामान्नं यस्मादेतत्त्रपीमयं॥ आवयोस्तारकं यस्मात्तस्मात्पाहि
जोत्नमेति। समुद्रमेखलां पृथ्वीं सम्पगृह्णातु यत्फलं॥ तत्फलं लभते मर्त्यः कृत्वादानममंत्रकमिति। अमत्रं पात्रं
फाल्गुनामावास्यायां रुद्रादिपूजा॥ लैंगे फाल्गुनप्रक्रमे अमावास्यायां पूज्यो रुद्रो त्रिब्रह्मणा लास्तथा॥ मीलो
दनैः पोलिकाभिः पूज्यश्चाह्यासबांधवैरिति। गं:। अमावास्या तु सोमेन सप्तमी भानुना तथा। चतुर्थी भूमि
पुत्रेणा सोमपुत्रेणाचाष्टमी॥ चतस्रस्तिथयस्त्वेताः सूर्यग्रहणतुल्यभाः॥ स्नानं दानं तथा श्राद्धं सर्वं तत्राक्षयं भवेदि
ति॥ तत्रैव अश्वत्थार्कयोगे व्यतीपातः। अश्वत्थाश्विधनिष्ठार्द्रानागदैवतमस्तके:॥ अमावेद्रविवारेण व्यतीपा
तः स उच्यते॥ तत्र यत्कृतं दत्तं सर्वं कोटिगुणं भवेदिति॥ नागदैवतमाश्लेषा मस्तकं मृगशीर्षं अथ श्राद्धामा
वास्यानिर्णयः। छंदोगपरिशिष्टे। पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते॥ वासरस्य तृतीयेंशे नातिसंध्यास
मीपतइति। पिंड: पिंडपितृयज्ञः। तमनु आहिपते क्रियते इति पिंडान्वाहार्यकं। पिंडपितृयज्ञानंतरभावीति या
क्षीणराजनि चंद्रे तस्मिन्सतीति। अमावास्यायामित्यर्थः। अत्र यद्यपि पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणां
मपराह्णः पितृणामिति श्रुत्या लौकिकपात्रे आविभक्तस्याह्नोंत्यभाग एव प्रतीयते तथापि सापाह्नस्त्रिमुहू
र्तःस्याच्छ्राद्धं तत्र न कारयेत्॥ राक्षसी नाम सा प्रोक्ता गर्हिता सर्वकर्मसु इति यमेन सापाह्नस्य श्राद्धकालत्वेप्रति राम
५७

षिद्धे यदि कार्त्स्न्याद्वादशमुहूर्त्तोऽस्तकालत्वं सिध्यति॥ यत्तु दीपिकं हेमाद्रिसिद्धांत उक्तस्त्रिधा। शितदिनस्यांत्यपरा
ह्णे चेदितिसोप्येतत्परतयैव कथं चिद्याख्येयः। माधवीयमपराह्णपदमप्येवं। अष्टममुहूर्त्तस्त्वि कुतपेत्र्यारंभः। नवमे
रौहिणसमाप्तिरिति तु एकोद्दिष्टविषयं। कुतपप्रथमेभागे एकोद्दिष्टमुपक्रमेत॥ आवर्त्तनसमीपे वा तत्रैव नियता
त्मवानिति व्यासोक्तेः। आरम्भकुतपेश्राद्धं कुर्यादा रौहिणं बुधः। विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेदिति म्लो
कगोतमोक्तेश्च। यत्तु नारदेनाम आह्नस्त्रिमुहूर्त्तं तु पदा वलति भास्करः। सकालः कुतपो नाम पितृणां दत्तमक्षयमि
ति मुहूर्त्तत्रयात्मकत्वं कुतपस्य उक्तः स्योक्तं तदशमं मुहूर्त्ते पावर्त्तारंभपरमिति केचित्। युक्तं तु एकोद्दिष्टेन मध्या
ह्न इत्यादिना मुहूर्त्तत्रयात्मक मध्याह्नस्यैकोद्दिष्टकालतया विधाने दृष्टमनवममुहूर्त्तयोश्च तत्कालतया विनियोगे ऽ
वशिष्टस्य दशमस्यापि उपयोगाकांक्षायां उत्तरभावितया गौणकालता परत्वमिति॥ येत्तु मात्स्ये। अष्टमे भास्करो यस्मान्मं
दीभवति सर्वदा। तस्मादनंतफलदस्तत्रारंभो विशिष्यते। ऊर्ध्वं मुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयं॥ मुहूर्त्तपंचकं ह्येतत्स्व
धाभवनमिष्यत इति। तदेकोद्दिष्टपार्वणकालकौटिकाराभिप्रायेण पार्वणेति केचिदेकादशद्वादश मुहूर्त्तयोरेवमुख्यका
लत्वं न मुहूर्त्तत्रयस्य॥ तत्रैव षष्ठीतोकदेशव्याप्तौ स्मत्यं तरे। अपराह्णद्वयव्यापिन्यमावास्या यदा भवेत्। तत्र्या
व्यत्व महत्वोभ्यांनि तायिः पितृकर्मणीति। अधिकव्याप्तौ त्वेतत्। एकदेशसमव्याप्तौ तु उभयापराह्ण्याप्तौ चरवर्दद्यादिनानिर्णयः। त

था वसिष्ठवराहवसंवादे पि। अमावास्यानुमा हि स्याद परा कुहू येपि सा॥ तत्पेपूर्वपरा वद्धो सामपि च परास्मृतेति॥
सत्पंतरे। तिथिद्वये सिनीवाली निषिद्धे कुहूर्मता॥ साम्येचैव कुहूर्त्तेया वेदवेदांगवेदिभिरिति॥ पूर्वा सिनीवा
लीउत्तरा कुहूः द्वयं वा सिनीवालीन द्वयं वा कुहूर्मतेति। व्यासोक्तेः॥ दिनद्वये कालास्पर्शे त्वाबालिः॥ अपरा कुहूर्पा
व्यापी यद्दिदृशेत्तिथिसंक्षये॥ आहिताग्निः सिनीवाली निरग्न्यादिः कुहूर्मतेति॥ आदिशब्दात्स्त्री भूद्र पोतपिग्रहः॥ सिनीवा
ली द्विजैः कार्या साग्निकैः पितृकर्मणि॥ स्त्रीभिः भूद्रैः कुहूर्त्तेया तथा चानग्निकैर्द्विजैरिति वृद्धलौगाक्षिवचनात्॥ इति विशेष
निर्णयोनिर्णीतः॥ ॥अथेष्टिकालः॥ सा च पर्वप्रतिपत्संधौ कार्या तिथारहगोभिलः॥ पत्ताता उपवस्तव्याः पत्तादयो यष्ट
व्याः संधिमभितो यज्ञेतेति॥ उपवासोम्य व्याख्यानं। तत्रातिसूक्ष्मतरे संधौ यागानुष्ठानस्याशक्यत्वात्पूर्वदिने पर्वतिते
आरंभ उत्तरदिने च प्रतिपदि यागसमाप्तिः। तथा च सूतिः॥ पूर्वेद्युरग्निं गृह्णातिउत्तरमहः यजतीति। पूर्वेद्युरिध्मा वर्हिः करो
तिय ज्ञमेवारभ्य गृहीत्वोपवसतीति। तथा वा उपोस्मिं श्रीव त्समालादेवताव संतिय एवं विद्वान्निमुपस्त त्या तीति। त
त्र पर्वप्रतिपदोः संपूर्णत्वे संदेह एव नास्ति खंडत्वे तयोर्निर्णयमाह गोभिलः॥ आवर्तनेयदा संधिः पर्वप्रतिपदोर्भ
वेत्॥ तदहर्याग इष्येते परतश्चेत्परेहनीति। पर्वप्रतिपदोः संधिरवांगावर्तनाद्यदि तस्मिन्नहनि यष्टव्यं पूर्वेद्युरु
उपक्रमः आवर्तनात्परः संधिर्यदि तस्मिन्नुपक्रमः परेद्युरिष्टिरित्येष पर्वद्वयविनिश्चय इति॥ आवर्तनं दिनस्य मध्यं॥ राम ५८

अत्र पर्वपितृयायावती प्रतिपदोर्वृद्धिः त योर्वातदर्द्धमानेन पर्वतो ह्रासं वृद्धिं वा कल्पयित्वा संधिर्निर्णेयः॥ त
थाच कात्यायनः॥ परेद्वि घटिकास्तत्पास्पुर्न्यूनाश्चयावाम्य धिकास्तु ताः॥ अर्द्धनियोज्यं वत्सथा प्रयोज्यं ह्रासवृद्ध
द्धो प्रथमे दिने तदिति॥ अत्र केचित्॥ यदि चतुर्दश्यां दशदंडाः पर्व च पंचदश दंडमितं प्रतिपत्तु एकोनविंशदंडात दाप्र
तिपदस्त्ररद्धदंडद्वयं पर्वात्प्रविशति एवं चतुर्दश्यां यदि पंचविंशतिदंडाः पर्वैकोनविंशद्दंडप्रतिपच्चतुर्दशदंड
तदा प्रतिपद्ह्रासार्द्धं सार्द्धघटिकाद्वयं पर्वात्प्रविशति त्पंति तदयुक्तं ईदृशे विषये पर्वापेक्षया प्रतिपदो ह्रासस्य वृद्धेर्वाभा
वात्॥ प्रत्युत चतुर्द्दशहरति ह्रास एवास्ति ह्रासो दाहरत्तो च वृद्धिः न हि घटिकान्यूनाधिक्यभावे ह्रासवृद्धी भवतः॥ किं
तु चतुर्दश्यनंतरं यावत्यः पर्वघटिकास्ततश्चाधिक्ये न्यूनत्वे वा प्रतिपदि ह्रासवृद्धी इति एवमालोच्य संधिर्निर्णेयः॥
अत्र दिनद्वये पूर्वोदाहृतशातातपोक्तयागकालसत्वे कस्मिन्दिने याइत्याकांक्षायां संधिशास्त्रं नियामकं॥ दिनद्वये या
गकालासत्वे त्वेकांशे विरहे तु संधिशास्त्रस्यानियामकत्वाभावाद्यागलोपप्रसक्तौ तस्यागौणकालमाह वृद्धशाता
तपः॥ संधिर्यत्रापराह्णे स्यात्प्राग्ग्रहः पश्चात्परेहनि॥ कुर्वीतः प्रपद्यगेव तुर्थ्येतिनदृश्यतीति यदि तु न यष्टव्यं चतुर्दश्यां
इति निषेधः स्यात्तस्यात्र दृष्टगोचरकालत्वम यात्रयावेमावास्यां कार्षं तद्वा कोद्वा इति प्रतिनिषिद्ध वचनवत्तानत्वस्य
निषेधः प्रागनुवादत्वसमर्थना त्। एकस्मिन्दिने यागकालस्पर्शेधिकोन्यशत्न्यासत्सदापि संधिशास्त्रमेवादर्तव्यं नाधि

स॰ र्या । एतस्य भूयसां स्याद्धर्मत्वमिति न्यायमात्रत्वेन संधिशास्त्रबाधकत्वायोगात् । प्रतिपद्दिने पंचधा विभक्तदिन
चतुर्थभागरूपापराह्णव्यापिद्वितीयाप्रवेशे न चंद्रदर्शनं तदा चतुर्दश्यामन्वाधानं संधिदिने च यागः । तथा च वृद्धव
सिष्ठः । आदित्येऽस्तमिते चंद्रः प्रदृश्येताऽद्य दि पा यदि प्रतिपद्यतिपत्तिः स्यात्पंचदश्यां यजेत्तदा । अस्तमिति । अस्तासन्नो व
दृश्यातातपः । त्रिमुहूर्ता द्वितीया चेत्प्रतिपद्यापराह्णिकी । अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात् ॥ कात्यायनः ॥
यजनीये ह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते । तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद् द्विजातये ॥ एतानि वचनान्यपराह्णे
मा प्रतिपत्संधिपरतामीति हेमाद्रिः । तन्न । रात्रिसंधावपि धापत्तेः ॥ न चापराह्णसंधिशास्त्रेणैतो च कैमुतिकन्यायेन
रात्रिसंधावपि परदिने यागसिद्धेः रात्रिसंधिशास्त्रमनर्थकं स्यात् । अतश्चंद्रदर्शनान्निषेधबाधकतये च रात्रि
संधिशास्त्रं सार्थकमिति वाच्यं । अपराह्णशब्दे न योगवृत्त्या हर्वद्वितीयत्तिनोत्तरभागाभिधाने रात्रिसंधौ कैमुतिकन्याये
न तच्छास्त्रप्रवृत्तेः । अतो विनिगमनाविरहाद्देतानि वचनान्यावर्त्तन्ते ततः पूर्वमुत्तरं वाऽमाप्रतिपत्संधौ प्रवर्त्ततेनाना
पराह्णसंधावेवेति युक्तं । एवं च वाजसनेयाद्यभाष्यशतपथप्रशंस्यापि तद्भाष्यार्थतामाशयः । त्रिमुहूर्तशास्त्र
स्य तु पंचधा विभक्तदिनचतुर्थभागरूपापराह्णव्यापिद्वितीयाविषयत्वात् एवं च सोमदर्शनादिति हेतूक्तिः संगच्छते
न तु सायाह्णे त्रिमुहूर्त्तमात्रसत्त्वात् तत्र चंद्रदर्शनस्य संभवाभावात् । यत्तु केचिच्चंद्रदर्शने यागनिषेधप्रयोजकं त्रि राम

मुहूर्त्तद्वितीयाप्रवेश इति तन्न । त्रिमुहूर्त्ता इत्यादिपूर्वार्द्धस्य प्राप्तिकानुवादकत्वापत्तेः । एतच्च दिवासंधावेव प्रवर्त्त
ते । न रात्रिसंधौ । अग्रिमदिने तावुतः न यस्यासंभवात् । एतत्कृतो पराह्णशब्दो पि योगिकः । मन्दिने द्वितीयभा
गमपरतति चेन्न । अपराह्णपदस्यैव वृत्त्यापि नेः योगिकपारिभाषिकयोः परिभाषासार्थक्याय पारिभाषिकस्यैवा
रास्येव युक्तत्वाच्च ॥ संधिनिर्णये तु द्वेधा विभक्तदिनपूर्वापरभागरूपयोः पूर्वाह्णापराह्णशब्दयोर्मध्याह्णशब्द
स्य च योगिकत्वमेवापूर्वाह्णे गोभिलवाक्ये आवर्त्तनपदस्यावगावर्त्तनापरते श्चैतयोः पदयोः । आस्वरसात्
पत्वेतत्करतो आवर्त्तनात्तु पूर्वाह्णे त्यपराह्णस्ततः परः ॥ मध्याह्णस्तु तयोः संधिर्यदावर्त्तनमुच्यते इति तद्गो
भिलोक्तमेव योगिकमर्थमनुवदति ॥ न त्वपूर्वपरिभाषा विधत्ते । येन त्रिमुहूर्त्तवाक्यमपि द्वेधा विभक्तदि
नापरभागरूपमपराह्णमुपजीवेत् । अतो दिनमध्ये यदा कदाचित्संधौ परदिने पंचधा विभक्तदिनचतुर्थभाग
रूपसकलापराह्णव्यापिद्वितीयासत्त्वे चतुर्दश्यामन्वाधानं संधिदिने च याग इति । एष एव निर्णयामृतमदनपा
रिजातयोराशयो लक्ष्यते । इष्टिसमाप्तिश्च प्रतिपन्मध्य एव न पर्वप्रतिपद्यग्रविघायां यदि चेष्टिः समाप्यते पुनः
प्रतीपकत्वसिद्धिः कर्त्तव्या यागविवर्त्तमे रितिगार्ग्योक्तेः पौर्णमास्यां कदाचित्स्वपिद्धुः कालतामाह । कात्यायनः ॥ सं
धिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्त्तनाद्रवेः ॥ सा पौर्णमासी विज्ञेया सद्यःकालाविधौति चिरति तिथिः पसं च पौर्णमा

स· स्यामन्वाधानपरिस्तरणोपवासाः सद्योवासद्धःकालापाए सर्वंक्रियतइति॥भाष्यार्थसंग्रहेपि॥अन्वाहितिध्मा
स्तरणोपवासःपूर्वेद्युरेतेखलुपौर्णमास्यां॥आवर्तनात्प्राग्यदिपर्वसंधौ॥ष्टिस्तदैवयागःक्रियतेसमस्तइति॥
मंडनः॥आधानानंतरापौर्णमासीचेन्मलमासगा॥तस्यामारंभणीयादीन्नकुर्वीरन्कदाचनेति॥सावमलमा
सोत्तरंशुद्धकालेकार्या॥तत्रकालातिक्रमनिमित्ताविभ्रसेष्टिरप्यादौकार्या ततआरंभइतिकेचित॥तन्न॥पु
रुषापराधकृतविहितकालातिक्रमरूपाविभ्रेष्टिनिमित्ताभावात॥एवंप्रकृतीष्टेःकालोनिर्णीतः।विकृ
कतितिकालोपिक्रतौ।पदीप्सायदिपशुनायक्षिसोमेनयजेतसोमावास्यायांपौर्णमास्यांवेतिपौर्णमासीका
लीनोपांशुयाजाग्नीषोमीयादिविकाराणांपौर्णमास्यामेवामावास्याकालीनसान्नाय्यादिविकाराणांचा
मावास्यायामेवेतिव्यवस्थाप्राप्तावव्यवस्थार्थमिदंवचनं।पौर्णमास्याममावास्यायामितिविधेयकालगतैकव
वनस्यविवक्षितत्वेनैकस्यांपौर्णमास्यामेकस्याममावास्यायांसांगप्रयोगोपादानात्सद्यकालीनत्वार्थंवेतिनि
रत्वापितंत्ररत्ने॥नचैवंपशुसोमानामनेकेषामुद्देश्यत्वात्तन्निमित्तोमावास्यापौर्णमास्योर्द्वयोर्विधेयत्वान्नि
मित्तश्चवाक्यभेदस्यादितिवाच्यं।इष्टिपशुसोमेष्वनुगतस्ययागत्वस्यैकस्योद्देश्यतावच्छेदकस्यामावास्यानुग राम
तस्यचपर्वलिप्सविधेयतावच्छेदकस्यैकस्यसद्भावात्तस्यपरिहर्तुमशक्यत्वात्॥प्रकृतिविकृत्योरेककालसंन्निपाते ६०

निर्णयमाह।कात्यायनः॥आवर्तनात्प्राग्यदिपर्वसंधिःक्रत्वादुतस्मिन्प्रकृतिर्विकृत्या॥तदैवयागःपरतोयदिस्या
त्तस्मिन्विकृत्याःकृतेःपरेद्युरितियः।शोकालनिर्णयमाहगोविंदार्णवेकात्यायनः॥अर्धाद्दिनाद्भवतिनियतःपर्वसं
धिःपरस्तात्कृत्वातस्मिन्नहनितुपशुसंघएवद्व्यहंवा॥आरभ्याथप्रकृतिरथचेत्पर्वसंधिःपुरस्तात्कृत्वातस्मिन्प्रकृ
तिमथतुस्यात्पशुःसद्यएव॥॥आग्रयणकालानाहआपस्तंबः॥वर्षासुश्यामाकैर्यजेतशरदिव्रीहिभिर्वसंतेयवै
रिति।वार्त्तिककारोपि।यजेत्पूर्वपूर्णमासाद्‌र्ध्वंदर्शान्नवैश्यपेतिनवैर्ज्ञात्वाग्रयणेतोष्टि।दीपिकायांदर्शेष्याःप
रमुक्तमाग्रयणंप्राकृपौर्णमासाद्युतदिति।संपूर्णोविशेषमाहलौगाक्षिःपक्षांतंकर्मनिर्वर्त्यवैश्वदेवंवसाग्नि
कः।पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधइति।पक्षांतमन्वाधानं।अन्वाहार्यकंदर्शश्राद्धमितिद्विजाः॥॥इतीष्टि
कालनिर्णयः॥॥अथपिंडपितृयज्ञः॥॥तत्रश्रुतिः॥अमावास्यायामपराह्णेपिंडपितृयज्ञेनचरंतीति॥अत्रयः
परमोविप्रकर्षःसूर्याचंद्रमसोःसापौर्णमासीयःपरमःसंन्निकर्षःसामावास्येतिगोभिलोक्तेरमावास्यापदंयद्यपि
सूर्याचंद्रमसोःपरमसन्निकर्षवत्यांस्तत्तिथौशक्त्यातथापितत्रकर्मानुष्ठानाशक्तेस्तद्दहोरात्रंलक्षयतीत्यतएवय
दहश्चंद्रमसंनपश्यंतितदहःपिंडपितृयज्ञेनचरंतीतिसूत्रं।यदैवैषनपुरस्तात्दृश्येनपश्चाद्दृश्यपितस्मोनिर्वप
तीतिवश्रुतिः।संगच्छते।अतोमावास्यातिथेरपराह्णव्याप्त्यभावेप्यंत्यस्तावच्छिन्नाहोरात्रएवपितृयज्ञः॥पूर्वदिनाप

स·

राह्णव्यापित्त्ववादरइत्याश्वलायनापस्तंबसूत्रवृत्तिभाष्यकाराः॥यौक्तिकंतु।अमावास्याशब्दस्यप्रयोगस्तावत्तिथि
विशेषिसार्वजनीनोनिर्विवादः॥तत्रैवैकदेशवर्त्तिनोपिपरमसंनिकर्षस्यसंभवत्येवप्रवृत्तिनिमित्तत्वात्।वक्ष्यतिपदइ
ववक्रस्यवैश्वदेवपदइववविश्वेषांदेवानां।यद्यपितिथिविशेषेलक्षणा।तथापिनिरूढत्वात्सैवयुक्तानाहोरात्रेअधुनि
कीर्त्यंदर्शनंतुअमायुक्तापराह्णवत्यहोरात्रेप्यविशिष्टंदिगाहोरात्रपूर्वभाविषुषःकालीनंचंद्रदर्शनंपूर्वाहोरात्रवर्त्ति
त्वान्नविरुद्धं।अथपुरस्तात्पदसाधकापतदेवविरुद्धं।तदापुरस्तात्पदसार्थक्यापसंध्युत्तराहोरात्रगतेमपितत्तथा
स्यात्।अतोपराह्णपुंकेवावामास्याभ्यात्याननुसंधेयाहइति।अपाह्णस्त्वत्रपंचधाविभक्तदिनोपान्त्यभागइतिवृत्तिका
रोक्तएव।दिनद्वयेऽपराह्णस्पर्शाभावेतुपूर्वदिनएवातत्रसम्यापादितवदत्तपस्योत्तरदिनेवदंतदिश्याश्वद्रवद्धे
सत्वात्।यथाहहारीतः॥चतुर्दश्याष्टमेभागेक्षीणोभवतिचंद्रमाः।अमावास्याष्टमेभागेपुनःकिलभवेदणुरिति
॥पूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणांअपराह्णःपितॄणामितिश्रुत्यपितृयज्ञप्रकरणेयाःत्रेधाविभक्तदिना
त्यभागस्तुयुक्तः।हारीतवचस्तूपवासपरं।तंप्रकृत्यापियदहरेवैषपुरस्तान्नपश्चाद्दृश्येतेतिकातीयसूत्रात्।य
पनूकास्तुवृत्तिभाष्याद्युक्तसंधिमदहोरात्रंप्रापःपंचधाविभागवानुरुध्यावदंतितत्रकातीयानांतावत्पितृय
ज्ञोदर्शयागांगं।तत्पूर्वदिनएवतत्कार्यंनतुनियमेनामायुक्तएवापराह्णपूर्वेद्युःपितृतर्पयज्ञंनिष्क्रीणीयोत्तरमह राम
६१

दिवान्यजतीतिश्रुतेः॥अमावास्यायामपराह्णइतिअमावास्यापदस्यकर्मपरत्वात्।पितृयज्ञोगंनवेतितुवादांतरंमितितोन
त्रीयादीनांतुनिर्विवादः।संधिमत्येवाहोरात्रेनुष्ठानं।आश्वलायनानांसर्वाधानिनांतावद्धातिरग्निकपितृयज्ञो
न्तरंपृथगेवपार्वणं।यज्ञांतंकर्मनिर्वर्त्यवैश्वदेवंवसाग्निकः।पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधइतिवाक्यात्॥पक्षा
न्तंअन्वाधानंअन्वाहार्यकंपार्वणंश्राद्धंतत्रवर्जनीयमग्निकवद्धिप्रयोगोहोमः॥तथावपरिशिष्टंपूर्वममावास्यातत्रभवेद्या
वत्तांतदाहिताग्निःपिंडपितृयज्ञंकृत्वाकरोत्यनाहिताहिताग्निस्तुतदितरेतान्यतिषज्येतिअनाहिताग्निःपार्वणंतेनपि
ंडपितृयज्ञकल्पाभावादमन्पनुत्तयापातिष्ठेवेति।ब्राह्मणानांयातिषुहोमइतिवअनाहिताग्निःपार्वणंतेवपिंडपितृ
यज्ञकल्पाभावादन्पनुत्तयापातिष्ठेवेति।ब्राह्मणानांयातिषुसर्वाधानी।अनाहिताग्निस्त्वर्द्धाधानीकेवलस्मार्त्ता
ग्निमान्वेतिसांप्रदायिकाः॥अनयोस्तुयौक्तिककालनिर्णयोयपज्ञेसर्वदाश्राद्धंपितृयज्ञयोस्तत्रविशेषरूपोव्यतिष
ंगएवाकालेव्यात्अन्वोकरणंवस्मात्ताग्नौमाष्यवत्तिसंप्रदायेतुसंपूर्वोपवर्त्तिव्यतिषंगएव।कालेव्यादेवाखंड
पर्वत्तितुपूर्वदिनेपितृयज्ञेजीपवत्अपराह्णदिसकलेतिकर्त्तव्यंताकंश्राद्धं।परदिनेतुपितयतः।कालभेदेनतत्र
न्यायाप्रवृत्तेः।एतेनपूर्वदिनएवव्यतिषंगइत्यपास्तं॥कालभेदादेववपिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधइ
तिक्रमानुरुद्धेनपृथगनुष्ठानमप्यपास्तं।एकदिनीयेष्वेवत्यपंक्तमविधिराकांक्षितनियमविधिसंभवेमिन्नदि

म.
६२ नीये घनाकांक्षितापूर्वविधानाद्वियोगात्। यद्यपि पूर्वदिने वा बिंदादिषु वक्ष्य अपरत्वादिकास वापित पक्षेति कर्त्तव्यता
परतत्तो भातितथापि यद्यदन्नमुपभुक्तं तत्र स्थालीपाकेन सह पिंडार्थमुद्धृत्येति सूत्रव्याख्यार्थस्यानात्रापूर्वः स्थाली
पाकः श्राद्धे नैसर्वश्राद्धेषु प्रसंगात्। अनिबंधे तत्तन्नानुवादएवायं यत्र स्थालीपाको विहितस्तत्र तेन भुक्तशेषे
णाद पिंडानिपरत्तां यत्र तु स्थालीपाकविधिर्नास्ति तत्र भुक्तशेषेणैव केवलेन निपरत्ता भवति॥ आचार्ये त्वाप्यो आत्मन्पू
र्णानि आन्वष्टक्यं च पूर्वेद्युर्मासिमास्यपपावर्त्ता॥ कांम्यमभ्युदयेषष्ठ्यामेकोद्दिष्टमथाष्टमं। तत्र पूर्वेषु वस्तुषु स्थाली
पाकादन्नमुद्धृत्याग्नौ करणं। अग्निसमीपे स्थालीपाकेन भुक्तशेषेण च पिंडनिपरत्ता। पिंडपितृयज्ञकल्पस्य तेषु विद्य
मानत्वात्॥ तद्यथा पितृमेधप्राकृ उत्तरे षुवतुषु भोजनार्थं दिन्नमुद्धृत्य घृताक्तं कृत्वा पाति होमः। ब्राह्मणानामपि भु
क्तशेषमात्रेण पिंडनिपरत्ता॥ तेषु स्थालीपाकविध्यभावात्॥ पिंडपितृयज्ञकल्पप्राप्त्यभावात् च। तत्रार्घ्यालेखावर्त
दभ्युदयां वसकृदादिनावसरात्। घृतेरवांमितिदकेनेत्यादिपवीमाशानां तं च भवति॥ अग्निंप्रत्येपादिति तु न भवति। अन्य
ज्ञातिप्रतापनादि सर्वं न भवतीति वत्तियं ष्यस्थालोवने तु ल्लेखाकरणादिकैव भवति न चरुश्रपणादिका। युक्तं चैतदभुक्त
मिति केचित्॥ चरुश्रपणादिप्राप्तेर्मानाभावात्। अग्नौ जुहोतीति यथोक्तं पुरस्तादिति सूत्रमतिदेशार्थमिति केचिदुद्धृत्य
घृताक्तमन्नुत्तापपत्यग्नौ करिष्ये करवै करवाणीति वा प्रत्यभिज्ञाननुपतां कुरुष्व कुर्विति सूत्रोत्तरमथेत्यादिसूत्र राम

भुक्ते॥ अतो यथोक्तमित्याद्युद्धरणोत्तरकालीनानेवमेतराणां वदानादीनतिदिशति न प्राक्कालीनान पिंडश्रपणादीन्॥
यत्तु यद्यदन्नमुपभुक्तं तत्र स्थालीपाकेन सह पिंडार्थमुद्धृत्येति सूत्रं। तत्रापि स्थालीपाकस्योद्धरणमेव कमतिनान्नस्य
हि। तेन पिंडार्थत्वविधि॥ उद्धरणोत्तु तस्य प्रतिपाद्यत्वमेव। करणं तूपभुक्तसजातीयमेवान्नं। अतो न पिंडदानमपि चरुश्र
पणप्रयोजकं॥ वस्तुतस्तु॥ आन्वष्टक्यं च पूर्वेद्युरित्याद्युक्तावत्तु श्राद्धेषु साग्नीनां च होमो विधीयत इत्यावाविधाने
वाक्यभेदात्। अस्यभावे तु विप्रत्यंस्य पाणावेवोपपादयेदिति मानवेन पाणिहोमप्राप्तेश्च अभावस्य परिग्रहणाशेषांतरे
ष्वपि परिसंख्ययाप्यविशिष्टः। अष्टकानुगत्वैकत्वोपाधिकं एवमुत्तराद्धौ तद्वदुभयमपि। प्राप्तपरिसंख्यातिपीयंन
त्रिदोषः। अत्रत्वेवाववंतीत्यत्रैवेवशब्दैनपंचपंचनरवामत्या इत्यत्रैवच पंचपदेनोत्रापि चतुः पदेनक त्वेव परिसंख्या
नात्॥ नच परिसंख्यापकानुवादकत्वादेपरीत्यं। अस्यभावनिमित्तकस्य पाणेः साग्निकर्त्तृकत्व एवादिवतु घृ
प्राप्तेः साग्नीनामित्यस्यानुवादत्वायोगात्। अग्नेः परिसंख्यापावनत्वाद्यं चरुश्रपणादि दूरं निरस्तमेव॥ इति
श्रीमच्छंकरभट्टात्मजभट्टनीलकंठकृते भास्करे कालमयूखेष्टकादिकालनिर्णयः॥ ॥ अथ ग्रहणनिर्णयः॥
॥ वृद्धगार्ग्यः॥ पूर्णिमाप्रतिपत्संधौ राहुः संपूर्णमंडलः। ग्रसते चंद्रमर्कं च दर्शप्रतिपदंतरे॥ वृद्धवसिष्ठः॥ गवां को
टिप्रदानेन सम्यग्दत्तेन यत्फलं॥ गंगास्नानेन तत्फलं स्याद्राहुग्रस्ते निशाकरे॥ दिवाकरे पुनस्तस्माद्दशसंख्यमुदा

स॰ ६३
हृतं मिति॥भारते॥गंगास्नानं तु कुर्वीत ग्रहतो चंद्रसूर्ययोः। महानदीषु चान्यासु स्नानं कुर्याद्यथाविधि॥गंगाया अ
लाभे अन्यासु स्नानादि कुर्यादित्यर्थः॥महानद्यो ब्राह्मे॥गोदावरी भीमरथी तुंगभद्रा च वेणिका॥ तापी पयोष्णी विं
ध्यस्य दक्षिणे तु प्रकीर्तिताः॥भागीरथी नर्मदा च यमुना च सरस्वती॥विशोका च वितस्ता च विंध्यस्योत्तरतः स्मृताः॥म
हानद्यः समवेशाख्याः॥वापीकूपतडागेषु गिरिप्रस्रवणेषु च॥नद्यां नदे देवखाते सरसीषूद्धृतांबुनि॥उष्णोदकेन वा
स्नायात् ग्रहतो चंद्रसूर्ययोः॥इह पूर्वं पूर्वाभावे उत्तरोत्तरोऽनुकल्पः॥उक्तं च मार्कंडेयेन॥शीतमुष्णोदकात्पुण्यमपा
रक्यं परोदकात्॥भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं॥ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलं॥तीर्थतोयं ततः
पुण्यं महानद्यंबु पावनं॥ततस्ततोऽपि गंगांबु पुण्यं पुण्यस्ततो बुधिः॥व्यासोऽपि॥सर्वं गंगासमं तोयं सर्वे व्याससमा
द्विजाः॥सर्वं भूमिसमं दानं ग्रहणे चंद्रसूर्ययोः॥पुष्णोदकमातुरविषये॥आदित्यकिरणैः पूतं पुनः पूतं च वह्निना॥अ
तो व्याध्यातुरः स्नायाद्ग्रहणे पूष्णवारिणेति व्याघ्रोक्तेः॥मासभेदेन नदीनां पुण्यत्वं देवीपुराणे॥कार्त्तिके ग्रहणं श्रेष्ठं
गंगायमुनसंगमे॥मार्गशीर्षे तु ग्रहणं प्रोक्तं देविकायां महामुने॥पौषे तु नर्मदा पुण्या माघे संनिहिताम्भसा॥फाल्गुने
वरुणा प्रोक्ता चैत्रे पुण्या सरस्वती॥वैशाखे तु महापुण्या चंद्रभागा सरिद्वरा॥ज्येष्ठे तु कौशिकी पुण्या आषाढे ता
पिका नदी॥श्रावणे सिंधुनामा तु तथा भाद्रे तु चंद्रिका॥आश्विने सरयूः श्रेष्ठा तथा पुण्या तु नर्मदेति॥तत्रैव॥गो राम

दावरी महापुण्या चंद्रे राहुसमन्विते॥वाराहग्रस्ते तमोभूते महामुने॥नर्मदातोयसंस्पर्शे कृतकृत्या भवंति ते॥
क्षेत्रविशेषोऽपि॥गंगा कनखलं पुण्यं प्रयागः पुष्करं तथा॥कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे॥अत्र श्राद्ध
मुक्तं भारते॥सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने॥अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदति॥पंकइत्या
दि अकरणे दोष इत्यर्थः॥तच्चामेन कार्यं॥आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा॥आमश्राद्धं द्विजः कुर्या
च्छूद्रः कुर्यात्सदैव हीति शातातपोक्तेः॥तत्रैरात्रोपवासः स्नानाद्याहृदे च लेः॥पद्यास्नानं च दानं च सूर्यस्य ग्रह
तो दिवा॥सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते॥अत्राशौचिनोऽपि स्नानाद्याह वृद्धवसिष्ठः॥सूतके मृ
तके चैव न दोषो राहुदर्शने॥तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते॥वारविशेषे फलातिशयमाह व्या
सः॥रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा॥चूडामणिरिति ख्यातस्तत्र दानं तत्फलं भवेत्॥वारेष्वन्येषु यत्पु
ण्यं ग्रहणे चंद्रसूर्ययोः॥तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतमिति॥षड्त्रिंशन्मते॥सर्वेषामेव व
र्णानां सूतकं राहुदर्शने॥स्नात्वा कर्माणि कुर्वीत भृतमन्नं विवर्जयेत्॥पक्वमन्नं त्याज्यं ग्रहणे तोत्तरमपि

स. न भुंजीतेत्यर्थः॥ इयं च स्मृतिकौक्तिः स्नानाद्यनिर्णयकर्मत्यागार्थी। तदुक्तं स्मार्त्तकर्मपरित्यागो राहोरन्य
त्र सूतके इति॥ शिवरहस्ये॥ सूर्येन्दुग्रहणं यावत्तावत्कुर्याज्जपादिकं॥ न स्वपेन्न च भुंजीत स्नात्वा भुंजी
त मुक्तयोरिति। फलविशेषो ब्रह्मपुराणे॥ उपमर्दे लक्षगुणं ग्रहणे चंद्रसूर्ययोः॥ पुण्यं कोटिगुणं मध्ये मु
क्तिकाले त्वनंतकमिति॥ दानमुक्तं महाभारते॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः॥ पात्रभूताय विप्राय
भूमिं दद्यात्सदक्षिणां॥ यद्यपि पूर्वं सर्वेष्वासममाइत्युक्तं तथापि तद्ग्रहणकालस्तुत्यर्थं। दानस्यावश्यकत्वा
र्थं वा न तु पात्रत्यागेन यस्मै कस्मैचिद्विद्वान्प्रतिपादनार्थं॥ पात्रलक्षणं दानमपूर्वेव त्यते॥ अनुकल्पमाह बौ
धायनः॥ श्रोत्रियोऽश्रोत्रियो वापि पात्रं वा पात्रमेव वा॥ विप्रब्रुवोपि वाविप्रो ग्रहणे दानमर्हतीति। भारते
भूमिगाविःसुवर्णं विधान्यं वा यद्यदीप्सितं॥ तत्सर्वं ग्रहणे देयं आत्मनः श्रेय इच्छता॥ पुण्यकालमाह जाबा
लिः॥ संक्रांतौ पुण्यकालस्तु षोडशोभयतः कलाः॥ चंद्रसूर्योपरागे च यावद्दर्शनगोचर इति। अत्र केचित

राम
६५

राहुदर्शनस्नानाद्यानं च कुर्यादित्यादिभिर्वाक्यैर्दर्शनस्नानादिविधीयते दर्शनं च चाक्षुषं। तच्च स्वकीय
मेव निमित्तं परकीयदर्शनस्य परं प्रति निमित्तत्वाभावात्॥ एवं चायमर्थः संपद्यते स्वयं ग्रहणं दृष्ट्वा स्ना
नादिकर्त्तव्यं न मेघावृते इत्याहुः॥ तदयुक्तं॥ एवं त्वंधस्य स्नानादि न स्यात्॥ तथा नेत्रेतो धंतमादि
त्यं नास्तं यं तं कदाचन॥ नोपरक्तं न वारिस्थं न मध्यं नभसो गतमिति वाक्ये न स्नातकानां ग्रहणदर्श
ने प्रतिषिद्धे तेषां स्नानादि न स्यात्॥ यदि परं तत्रैवापत्तिः क्रियते तथा सति सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्र
हस्तदा॥ तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति निषेधो नुपपन्नः स्यात्॥ रात्रौ सूर्यग्रहणस्य जा
तस्य दिवा चंद्रग्रहणस्य जातस्य दर्शनाभावे स्नानादेरप्राप्तत्वात्॥ किंच यदि दृष्टं यं ग्रहणं स्नानादेर्नि
मित्तं तथा सत्युद्देश्यस्य ग्रहणस्य विशेषणत्वाद्दर्शनं नाविवक्षितं स्यात्। यस्योभयं हविरार्त्तिमा

स.म. छर्दित्यत्रैव हविष उभयत्वं॥ अतः केवलं ग्रहणमेव निमित्तमिति वक्तव्यं॥ तद्वत्ता तमेव निमित्तं सर्वनिमित्तानां
ज्ञातानामेव नैमित्तिकप्रयोजकत्वमिति विज्ञानेश्वरसदभिस्तत्र तन्निरूपितत्वात॥ तद्वत्ता नंशास्त्रीयमे
वन लौकिकं॥ न चैवं द्वीपांतरे ज्ञातं द्वीपांतरे पि प्रयोजकं स्यादिति वाच्यं॥ द्वीपांतरे ज्ञातस्य द्वीपांतरे रा
त्रिदिनज्ञातत्वेनाप्रयोजकत्वात॥ क्वचिद्देशे दृष्टं देशांतरे च मेघच्छन्नं तु भवत्येव प्रयोजकं॥ न च राहुदर्श
न दृष्टपनेन वा कुषमेव दर्शनं ग्राह्यमिति वाच्यं॥ अथ मीरोहितीपुक्ता विश्वपद्वे वस्पतेयादीत्यादिषु शास्त्रा
दृष्टे पि दृष्टे पि दर्शनप्रयोगदर्शनात॥ तेन प्रत्यक्षदर्शनमवस्यानिमित्तमिति केषाचित्प्रलापः शास्त्रान्य
यविरुद्ध उपेक्षणीयः॥ अस्तास्तविषये मनुः॥ चंद्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तयोः॥ अमुक्तयोरस्तग
योर्दृष्ट्वा स्नानं परे हनि॥ भृगुरपि॥ ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदा परेद्युरुदये स्नात्वाभ्यवहरेन्नर इति॥
वेधमाह व्यासः॥ नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं शशिग्रहात॥ ग्रहकाले च नाश्नीयात्स्नात्वाश्नीयाद्विमुक्तयोः॥

कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः॥ षडशीतिमुखी प्रोक्ता षडशीतिगुणा फलैः॥ वृषवृश्चिककुंभेषु सिं
हे चैव यदा रविः॥ एतद्विष्णुपदं नाम विषुवादधिकं फलमिति॥ तयोर्मध्ये अयनविषुवतोर्मध्ये। वारर्क्षविशे
षतः पुनरासां सप्तधात्वमुक्तं देवीपुराणे॥ मंदा मंदाकिनी ध्वांक्षी घोरा चैव महोदरी॥ राक्षसी मिश्रिता प्रोक्ता संक्रांतिः
सप्तधा नृप॥ सूर्ये घोरा विधौ ध्वांक्षी भौमवारे महोदरी। बुधे मंदाकिनी नाम मंदा सुरपुरोहिते॥ मिश्रिता भृगु
वारे स्याद्राक्षसी तु शनैश्चरे॥ तथा॥ मंदा ध्रुवेषु विज्ञेया मृदौ मंदाकिनी तथा॥ क्षिप्रे ध्वांक्षी विजानीयादुग्रे घोरा प्रकीर्ति
ता॥ चरे महोदरी ज्ञेया क्रूरैः क्षेत्रैश्च राक्षसी॥ मिश्रिता चैव निर्दिष्टा मिश्रितर्क्षेषु संक्रमः॥ इति॥ ध्रुवाणि रोहिण्युत्त
रात्रयं च। मृदूनि रेवती चित्रानुराधा मृगाः॥ क्षिप्राण्यश्विनी हस्त पुष्याः॥ उग्राणि पूर्वात्रयं भरणी मघा च॥ चराणि
धनिष्ठा पुनर्वसु श्रवणस्वातीशततारकाः॥ क्रूराणि ज्येष्ठार्द्राश्लेषामूलानि॥ मिश्राणि विशाखा कृत्तिके॥
अस्याः पुण्यतमः कालस्तत्रैवोक्तः॥ त्रिचतुःपंचसप्ताष्टनवद्वादश एव च॥ क्रमेण घटिका ह्येतास्तत्पुरापं
परमाधिकमिति चर्चितवसिष्ठः॥ संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः॥ तद्योगाद्याप्यधश्चोर्ध्वं त्रिंशन्नाड्यः
पवित्रिता इति॥ अधस्त्रिंशदूर्ध्वं त्रिंशदिति केचित॥ वस्तुतस्तु॥ अधः पंचदश ऊर्ध्वं पंचदश इत्येवं त्रिंशदितियात

स. धावद्देवीपुराणे ॥ अतीतानागते भोगो नाड्यः स पंचदश स्मृताः ॥ इति संक्रान्तौ विहितप्रतिषिद्धस्नानाध्यापना
देः पालनं भोगः । जाबालः ॥ संक्रान्तौ पुण्यकालस्तु षोडशोभयतः कला इति ॥ कला नाड्यः ॥ एषां च वासिष्ठादिवा
क्यानाम विशेषात्सर्वसंक्रान्तिपरत्वं । तत्र चाल्पकालोक्तिः पुण्यातिशयाभिप्रायेण पुनर्निषेधाय ॥ अत एव शाता
तपः ॥ याया: संनिहिता नाड्यस्तास्ताः पुण्यतमाः स्मृता इति ॥ वसिष्ठः ॥ मध्ये तु विषुवे पुण्यं प्राग्विष्णोर्दक्षिणायने ।
षडशीतिमुखे तीते अतीते चोत्तरायणे इति । मध्ये उभयत्र इत्यर्थः । अत्र च पराद्धादुत्तरायणेऽनागतेपि पुण्यमिति
हेमाद्रिः ॥ तत्र प्रमाणं तां विमृश्यं ॥ ब्रह्मकैवर्ते त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिका इति ॥ स्कान्दे । कुलीरे विंश
देवाद्या मकरे त्रिंशदुत्तरा इति ॥ कुलीरः कर्कटः । वसिष्ठः ॥ त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृता इति । गौतमः ॥
अर्वाक् षोडश नाड्यस्तु परतः षोडशैव तु ॥ ता एव दक्षिणे पूर्वा अतीते चोत्तरायणे इति । अत्रापि न्यूनाधिक
घटिकानां पूर्वोक्तैव व्यवस्था विज्ञेया ॥ वसिष्ठः ॥ वर्तमाने तुलामेषे नाड्यस्तूभयतो दश ॥ ति । बोधायनोपि पुण्यं वि
षुवति प्रोक्तं दश पूर्वदिशापरा इति ॥ वसिष्ठः । षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिका इति । षडशीत्याख्यानां च
नस्तां संक्रान्तीनां मेके कस्याः पंचदश पंचदशेत्येवं षष्टिनाड्यः पुण्या इति हेमाद्रिः । तथा च स्कान्दे । षडशीतिमुखे राम
६७

तीते नाड्यः पंचदश स्मृता इति ॥ केचित्तु अष्टिरुक्तास्तु नाडिका इति पाठं कल्पयन्ति । अष्टिः षोडश । तच्छन्दस्तः बाडेशा
लपाद बादिति ॥ तत्रैव । तत्रैव पुण्यं तेषु तु । षष्टिप्रषडशीतिमुखेतिथ्या तथा षष्टि त्यर्थः ॥ वसिष्ठः ॥ पुण्यकालो
विष्णुपद्याः प्राक्पश्चादपि षोडश इति ॥ ब्रह्मकैवर्ते । विषुवेषु तथा मुहूर्तस्पा । षडशीतिमुखे त्रयं ॥ तथा विष्णुपदे त्रीणि
पुण्यानिक वयो विदुरिति ॥ एवमुक्तन्यूनाधिकपक्षाः पु । ण्यपुण्यपुण्यतरपुण्यतमत्वेन व्यवस्थाप्याः । याया: संनि
हिता नाड्यस्ताः पुण्यतमाः स्मृता इति पूर्वोदाहृतशातातपवाक्यात् । गोभिलः ॥ रात्रौ संक्रमतो भानोर्दिवा कुर्यात्तु
तत्क्रियां ॥ पूर्वस्मात्परतो वापि प्रत्यासन्ने च तत्फलं ॥ अर्द्धरात्राद्धस्तस्मिन्मध्याह्नस्योपरि क्रिया । ऊर्ध्वं संक्रमणे चो
र्ध्वमुदयात्प्रहरद्वयं ॥ पूर्णे वेदर्द्धरात्रे तु यदा संक्रमते रविः । प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटाविति ॥ मध्याह्न
आवर्त्तनं ॥ तच्चोदयश्च पूर्वोत्तरदिनयोः । सन्निधान लाभात् ॥ दिनद्वयमुपर्यद्धमेवत्ते पां । रात्रौ संक्रमतो भानोर्दिना
र्द्धस्नान दानयोरिति वासिष्ठेन सामान्यतो रात्रिसंक्रमे दिनार्द्धपुण्यत्वस्यैवोक्तत्वात् ॥ गार्ग्यः ॥ कालेन्यूने र्द्धरात्रे तु
यदा संक्रमते रवेः ॥ तदहः पुण्यमिच्छंति गार्ग्य गालवगौतमाः ॥ देवीपुराणे । संपूर्णे अर्द्धरात्रे तु उदये स्नानमेवपि
व ॥ मानार्द्धभास्करे पुण्यं अपूर्णे शर्वरीदले । संपूर्णे अर्द्धरात्रे निशीथे इत्यर्थः । उदयास्तमयश्चोप्रातःसायं पंस
ध्योपलक्षकौ ॥ अपूर्णे शर्वरीदले सायंप्रातःसंध्योत्तरपूर्वभागयोरित्यर्थः ॥ योगे नल तत्ताया वा भास्करोदि

स. वसः। निशीथे सायंप्रातःसंध्ययोस्तु उत्तरपूर्वभागयोश्च संक्रमतो दिनार्द्धं पुण्यमित्यर्थः। कस्य दिनस्यार्द्धमित्यपेक्षायां
मुक्तं तत्रैवार्द्धरात्रे त्वसंपूर्ते दिवा पुण्यमनागते। संपूर्ते ऽभयोर्देयमतिरेके परेहनि। अत्रासंपूर्तार्द्धरात्रशब्देन
सायंसंध्या निशीथपूर्वभागश्च गृह्यते। अत्र संक्रमतो ऽनागतमतीतमित्यर्थः। तद्दिवामानार्द्धं पुण्यं तच्चोत्तरसं
न्निधानात्। संपूर्तार्द्धरात्रे निशीथ इत्यर्थः। तत्र संक्रमतो ऽभयोः पूर्वोत्तरदिनयोरुत्तरपूर्वमानार्द्धं पुण्ये। अतिरेके ऽर्द्ध
रात्रात्परतः संध्यायां वा संक्रमतः परेहन्याद्यमानार्द्धं पुण्यमित्यर्थः। संपूर्ते तूभयोरित्यत्रैवावश्यं यथाक्रान्तत्रैव। आदौ
पुण्यं विजानीयाद्यद्यभिन्नातिथिर्भवेत्। अर्द्धरात्रे व्यतीते तु विज्ञेयमपरेहनि। पूर्वदिनोत्तरावर्त्तितिथ्या अर्द्धरात्रसंक्रम
ताकालीनातिथिर्यद्यभिन्नास्यात्तदा न दिनद्वयमिति। द्वाव्यतीते त्वर्द्धरात्रे पूर्वदिनतिथ्या भेदे ऽपि परेद्युरेवेति। पद्मनाभस्त्वर्द्धरात्रनि
षिद्धे निर्द्धयार्द्धयोरपि स्यात्तदा पूर्वभोगिनीषु पूर्वदिनोत्तरार्द्धमुत्तरभोगिनीषु उत्तरदिनाद्यार्द्धमुभयभोगिनीष्विच्छिको
विकल्पः। एवमयनातिरिक्तसर्वराशिसंक्रमतो दिनार्द्धं पुण्यत्वलिखितेन विशुपयोः अनुमीनन पृ कन्यासु वैयपत्त। पूर्वो
त्तरगतं रात्रौ भानोः संक्रमणं भवेत्। पूर्वाह्णे पंचनाड्यस्तु पुण्याः कीर्तिताः प्रोक्ता मनीषिभिः। अपराह्णे च पंचैवं प्रोक्ते तस्मा
त्रैविक्रमरीति तियद्यामं तत्पुण्यातिशयदर्शनार्थं। केचित्तामन्त्रसंक्रमं पुण्यं दिनार्द्धस्नानदानयोः। रात्रौ संक्रम
तो भानो विषुवत्ययने दिनमिति। विशेषविकल्पतया पार्श्वध्वनात्सामान्यविषयं दिनार्द्धवचनं विषुवद्विषयमित्याहुः। राम
६८

विषुवति संक्रमे रात्रौ सति दिनार्द्धमयने तु दिनमिति वाक्यार्थः। वस्तुतस्तु यद्यत्र विषुवति दिनार्द्धपुण्यत्वविधि
स्यात्तदा स्यात्तथा। न त्वेवं। किं तु विषुवति सामान्यवाक्यप्राप्तमर्थमनूद्यायने दिनार्द्धापवादेन संपूर्तदिन
स्य पुण्यत्वं विधीयते। यहाद्यापाद त्रयेण सर्वसंक्रान्तिषु सामान्यतो दिनार्द्धपुण्यत्वविधायात्ययोर्दिनविषु
वत्ययनयोः संपूर्तदिनपुण्यत्वं विधीयत इति पद्मनाभोरयने रात्रौ जाते सति दिने दिनमध्ये दिनार्द्धं पुण्य
मित्यविवाच्येति न त्वासन्नसंक्रममिति। अत एव भविष्योत्तरे। मिथुनात्कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः। प्रभाते वानि
शीथे वा कुर्यादह्नि पूर्वतः। कार्मुकं तु परित्यज्य झषं संक्रमते रविः। प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनीति बौधायनो
पि। अस्तं गते सवितरि मकरं याति भास्करः। प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनि। अर्द्धरात्रे तदूर्ध्वं वा संक्रान्तौ द
क्षिणायने। पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति। अहं तु ब्रुवे। अर्द्धदिन इति छेदः। अयने रात्रौ जाते सति अ
दिने रात्रावेव पुण्यमिति तदर्थः। तच्च नागरतैलंगादिपरं तेषां तथाचारात्। अत एव माधवः। कर्के मकरे रात्रा
वृष्याचारादनुष्ठितिरिति। माधवस्तु दिन इति दिवेति वा पाठमभिप्रेत्य विषुवति रात्रौ जाते दिनार्द्धं पुण्यमयने तु रा
त्रौ संक्रमतो सति दिवा दिनार्द्धपुण्यं कर्के पूर्वार्द्धं मकरे तूत्तरार्द्धमिति व्याचख्यौ। ननु बौधायनीये ऽस्तंगत इत्य
नेन प्रदोषार्द्धरात्रयोर्लब्धत्वात् पृथग्ग्रहणमनर्थकमिति चेन्न। अस्तंगत इत्यपि वा केदिनांतास्य पुण्यतोक्तिः प्रत्या

स·

मत्तेरपरतस्त्र विषुवति त्वपि वस्यात्तदा रात्रावपरे दिवसार्द्धे इति तस्य साध्य निर्णयात् ॥ धनुर्मीनावतिक्रम्य कन्यां च मिथुनं य
दा ॥ पूर्वापरविभागे न रात्रौ संक्रमते रविः ॥ दिनांते पंचनाड्यस्तु तदा पुण्यतमाः स्मृताः ॥ उदये च तथा पंच दैवे पित्र्ये
च कमतीति तिरात्रौ धनुरतिक्रम्य पूर्वभागे संक्रमे उदये पंचनाड्यः तथा रात्रौ मिथुनमतिक्रम्यापरभागे संक्रमे
दिनांते पंचनाड्य इति सामान्यतो बोधायनवाक्येन पुण्यप्राप्तौ पुण्यतमत्वबोधकं तिनमकरे सूर्यस्तात् दूर्ध्वं य
दा कदाचिज्जाते उत्तरदिनपूर्वार्द्धे पुण्यं आद्याः पंचघटिकाः पुण्यतमाः ॥ कर्कटोदयात्पूर्वं यदा कदाचिज्जाते पू
र्वदिन एवोत्तरार्द्धे पुण्यं अंत्याः पंचघटिकाः पुण्यतमा इति बोधायनवाक्यैक्यं तन्निर्णयानुरोधेन स्कांदं मंत्र्यं व्याख्ये
स्नातवरत्ताः ॥ बोधायनेनायनयोर्विप्रकृष्टदिनपुण्यत्वोक्तावपि स्कांदे नक्तंतिकृष्टदिनेपि पुण्यता बोध्यते ति
नोभयदिनेपि समुद्दिष्टपुण्यकालेन कोपि विरोधः ॥ तेन स्कांदस्यास्त्वार्थे ति केयं व्याख्या युक्तेति मम प्रतिभाति ।
॥ इति संक्रांतिनिर्णयः ॥ ॥ अथ संक्रांतिकृत्यं ॥ नागरखंडे ॥ रविः संक्रमते यस्य राशौ संक्रांतिरिति कथ्यते ॥ स्नानदान
तपः श्राद्धहोमादिषु महत्फला ॥ आपस्तंबः ॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ॥ अहोरात्रोषितः स्नातः सर्व
पापैः प्रमुच्यते ॥ एतच्च पुत्रवद्गृहस्थातिरिक्तविषयं ॥ आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः ॥ उपवासो न कर्त्त
व्यो गृहिणा पुत्रिणा तथा इति ॥ तस्य तत्रोपवासनिषेधात् ॥ यत्तु रवि[illegible]व होरात्रभोजननिषेधः स पुत्रवंत राम

६९

मपि गोचरपति एतद्वचनाप्रवृत्तेः ॥ इदं हि वचनं नियमो व्रतमध्ये स्त्रीतद्वोपवासादि पुण्यकमितिकौशाद्युपवासस्य प्र
तद्रूपत्वाभावादिति द्वैतनिर्णयचिंतातत्वकराः ॥ शातातपः ॥ रविसंक्रमणे प्राप्ते न स्नायाद्यस्तु मानवः ॥ सप्तजन्मानि रोगी
स्यान्निर्धनश्चैव जायते ॥ संक्रांतौ यानि दत्तानि हव्यकव्यानि दातृभिः ॥ तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनीति ॥ वृ
सिष्ठः ॥ अयने षुवयद्दत्तं षडशीतिमुखेषु वा चंद्रसूर्योपरागे च दत्तं भवति चाक्षयं ॥ अयने कोटिपुण्यं च लक्षं विष्णुपदी
फलं ॥ षडशीतिसहस्रं तु षडशीत्यां स्मृतं बुधैः ॥ शतमिंदुक्षये दानं सहस्रं तु दिनक्षये ॥ विषुवे शतसाहस्रं व्यतीपाते त्वनं
तकं ॥ वृद्धवसिष्ठः ॥ अयने विषुवे चैव त्रिरात्रोपोषितः पुमान् ॥ स्नात्वा योर्चयते भानुं सर्वकामफलं लभेत् ॥ ब्रह्मपुराणे ॥ शु
क्लपक्षे तु सप्तम्यां यदा संक्रमते रविः ॥ महाजया तदा सा वै सप्तमी भास्करप्रिया ॥ स्नानं दानं तपो होमः पितृदेवादिपू
जनं ॥ सर्वं कोटिगुणं प्रोक्तं तस्यैनेन महोत्सवा ॥ यस्त्वस्यां मानवो भक्त्या घृतेन स्नापयेद्रविं ॥ सोश्वमेधफलं प्राप्य ततः सूर्य
पुरं व्रजेत् ॥ पयसा स्नापयेद्यस्तु भास्करं भक्तिमान्नरः ॥ विमुक्तः सर्वपापेभ्यो याति सूर्यस्य लोकतां ॥ मयैषा कथिता पुण्या सप्त
मी त्रिपुरांतक ॥ याम्यपोष्य नरो भक्त्या अचलः न संगलान् लभेत ॥ संक्रांतिविशेषे तादिपविशेषमाह विश्वामित्रः ॥
मेषसंक्रमते भानौ मेषदानं महाफलं ॥ वृषसंक्रमते दानं गवां प्रोक्तं तथैव च ॥ वस्त्रान्नपानदानानि मिथुने विहि
तानि तु ॥ घृतधेनुप्रदानं तु कर्कटे परिशस्यते ॥ सिंहे सुवर्णपात्रदानं हि हेवविहितं सदा ॥ कन्याप्रवेशे वस्त्राणां तथा सुरभीतां धे

स

ववा॥तुलाप्रवेशे धान्यानां बीजानामेव चोत्तमं॥कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव वा॥कीटो वृश्चिकः॥धनुःप्रवेशे व
स्त्राणां यानानां च महाफलं॥मृगप्रवेशे दारूणां दानमग्नेस्तथैव च॥कुंभप्रवेशे दानं तु गवामंबुतृणस्य च॥मीनप्रवेशे
त्वम्लानि नात्पानामपि चोत्तमं॥दानान्यथैतानि मया मुनींद्राः प्रोक्तानि काले तु नरः प्रदत्वा॥प्राप्नोति काममनसत्वमी
प्सितं तस्मात्प्रशंसंति हि कालदानं॥स्कांदे॥धेनुं तिलमयीं राजन्दद्याद्यश्चोत्तरायणे॥सर्वकामानवाप्नोति विंदते पर
मं सुखं॥विष्णुधर्मोत्तरे॥उत्तरे त्वयने विप्रा वस्त्रदानं महाफलं॥तिलपूर्वमनड्वाहं दत्वा रोगैः प्रमुच्यते॥कालिकापु
राणे॥कनकं कुलिशं नीलं पद्मरागं च मौक्तिकं॥एतानि पंचरत्नानि न्यसेद्देवस्य मूर्द्धनि॥रत्नानां वाप्यभावे च कर्षैकर्षार्द्ध
मेव वा॥सुवर्णं योजयित्वा तु तस्मिन्नेवोत्तरायणे॥विधिवद्ब्र तथाभ्यर्च्य गंधैर्नाम्येन भूरिणा॥प्रज्ञाल्प मर्दयित्वा तु प्रदद्या
द्घृतकंबलं॥दत्वा चोपस्करं भूयो ब्राह्मणान्यतिभिः सह॥संभोज्य दत्वा पित्वा तु कल्पयेदनिवारितम्॥कुलिशं हीरकं द।
त्नपित्वा दक्षिणापासं योज्य कल्पयेद्भोजनमिति शेषः॥उपोष्य सर्वमेवैतत्कुर्याद्भक्तिसमन्वितः॥पंचगव्यं तिलैर्युक्तं पी
त्वा वै पारयेद्व्रतं॥तिलैः स्नानं प्रकुर्वीत तैरेव च हुनेद्बुधः॥दैवतानां पितॄणां च भाभ्यां तर्पयेत्तथा॥पारयेत्पारणं कृ
यति॥तिलस्नानपाराणां योनौ न क्रमो विवर्जितः॥उभाभ्यामिति तिनादृष्यं वतुर्थी॥होमं तैश्च प्रकुर्वीत सर्वदैवोत्तरायणे॥
तान्वै देवा पपिभ्यो ह्येहारके नतमर्दयेत्॥यत्नाद्दिवकरोत्पिंवंचितं शर्मा निर्णयः॥उत्तरायणमासाद्य नरः कस्मात्स्नो

चेत्॥ ७॥इति संक्रांतिकृत्यं॥ ॥अथ पक्षः॥स वृद्धिविधः॥शुक्लः कृष्णश्च॥चंद्रकलावृद्ध्युपलक्षितः पक्षः॥चंद्रकलाक्ष
योपलक्षितः पक्षः कृष्णः॥स तु देवेषु शुक्लः॥पित्र्ये कृष्णः॥तदाह माधवः॥देवे मुख्यः शुक्लपक्षः कृष्णे पित्र्ये विशिष्यते इति।
श्रुतिः॥तो पूर्वपक्षश्चापरपक्षश्चाभवतां॥पूर्वपक्षं देवा अन्वपद्यंतापरपक्षमन्वसुरा इति॥ ॥इति पक्षनिर्णयः॥ ॥
अथ मासः॥ ॥स च मस्यते परिमीयते चंद्रवृद्धित यादिने तिव्युत्पत्त्या न मासशब्देन कृद्यामिधेयः॥स चतुर्धा॥चांद्रः साव
नः सौरश्चेति॥ तदुक्तं माधवीये ब्रह्मसिद्धांते॥चांद्रः शुक्लादिदर्शांतः सावनस्त्रिंशता दिनैः॥एकराशौ रविर्यावत्कालं
मासः स भास्करः इति॥नाक्षत्रमपि मासं केचिदिच्छंतीति माधवीये मदनरत्ने च॥एतेषां व्यवस्थामाह ज्योतिर्गर्गः॥सौरो
मासो विवाहादौ यज्ञादौ सावनः स्मृतः॥आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यते॥तत्र ब्राह्मणस्य चांद्र एव मुख्यः।
तदुक्तं ब्रह्मसिद्धांते॥अमावास्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु॥संक्रांतिपौर्णमासीभ्यां तथैव नृपवैश्ययोः॥पिता
महोपि दैवे कर्मणि पित्र्ये च मासश्चांद्रमसः स्मृत इति॥यतिधर्मप्रकरणे तूक्तं तु संधिषु वापयेदिति वचनात्पूर्णिमांत च
पनं कुर्वंति। तस्माद्दर्शांतत्वपूर्णिमांतत्वयोः समो विकल्पो दृश्यते॥अनुष्ठाने तु तत्र तत्र वचनविशेषाच्छिष्टाचाराद्व्य
वस्थेति माधवः॥ दर्शांतपूर्णिमांतानां च मासविशेषाणां चैत्रादिसंज्ञा नक्षत्रप्रयुक्ताः सास्मिन्पौर्णमासीति संज्ञा
यामित्यनुशासनात्॥तेन यस्मिन्मासे पौर्णिमा चित्रायुता स चैत्रः एवं वैशाखादयोपि॥इति मासनिर्णयः॥ ॥अथ

स. चैत्रकल्पं भविष्योत्तरे ॥ चैत्रे त्रिरात्रं नक्ताशी नर्यास्त्वा वाददाति यः ॥ अन्नाः पंचपयस्विन्यो दरिद्राय कुटुंबिने ॥ नत्रापते
पुनरसो जीवलोके कदाचन तत्रैव ॥ चैत्रेमासे तु संप्राप्ते यः कुर्यान्नक्तभोजनं ॥ पिष्टं तु पयसा युक्तं भुंजानः शांतिसंभवं ॥
पूजयेत्पार्वतीं भक्त्या तां देवं दमनस्य वा ॥ गंधपुष्पोपहारैश्च विंशाद्भुजसंमितां ॥ देवीं ज्वालामुखीं नाम्नीं कुंकुमागरुचं
दनैः ॥ धूपं सागरुकर्पूरं भगवत्यै निवेदयेत् ॥ वामनपुराणे ॥ चैत्रेमासि विचित्राणि शयनान्यासनानि च ॥ विप्रेभ्यः प्रीत
ये मिता निदेयानि ब्राह्मणेभ्यः ॥ मास्या वर्ण पितामधौ यस्तु दधि क्षीर घृतेक्षुकं ॥ दद्या द्रव्या तोसौ भूमा निरसवस्त्र
पुनानि चासं पूज्य विप्रमिथुनं गौरी मे प्रीयतामिति ॥ ॥ इति चैत्र कृत्यं ॥ ॥ अथ वैशाख कृत्यं ॥ ॥ विष्णुस्मृतौ
॥ तुलामकर मेषेषु प्रातः स्नायी भवेन्नरः ॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति ॥ पद्मपुराणे । वैशाखे वि
धिनास्नानं देवनद्यादिके बहिः ॥ हविष्यं ब्रह्मचर्यं च भूशय्या नियमस्थितिः ॥ व्रतं दानं दमो देवि मधुसूदनपूजनं ।
अपि जन्मसहस्रोत्थं पापं दहति दारुणं ॥ मिति ॥ तथा मधुमासस्य शुक्लायां एकादश्यामुपोषितः ॥ पंचदश्यां च मो
वीर मेषसंक्रमतोपि वा ॥ वैशाख स्नाननियमं ब्राह्मणानामनुज्ञया ॥ मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं ॥
मंत्रस्तु वैशाखं सकलं मासं मेषसंक्रमतो रवेः ॥ प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥ मधुहंतुः प्रसादेन ब्रा
ह्मणानामनुग्रहात् ॥ निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहं ॥ माधवे मेषगे भानौ मुरारे मधुसूदन ॥ प्रातः स्नानेन राम ७१

मे नाथ फलदो भव पापहन्त्रि ॥ तिहस्तस्थार्घ्यं विधिवत्स्नायात ॥ एवं स्नानाशक्तौ तत्रैव ॥ त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा
दिनत्रये ॥ अपि सम्यग्विधानेन नारी वा पुरुषोपि वा ॥ प्रातः स्नातः सनियमः सर्वपापैः प्रमुच्यते इति तथा ॥ कंदु
यच्छतोगां तु स्नात्वा पिप्पल तर्पणं ॥ कृत्वा गोविंदमभ्यर्च्य न दुर्गतिमवाप्नुयात् ॥ पिप्पलतर्पणो पिप्पलमूलसे
चनं ॥ अवनि विधायस्त्रैव ॥ माधवं सकलं मासं तुलस्या योर्चयेन्नरः ॥ त्रिसंध्यं मधुहंतारं नास्ति तस्य पुनर्भवः इति ॥ भा
रते ॥ निस्तरेदेकभक्तेन वैशाखं यो जितेंद्रियः ॥ प्रातः स्नायी नरः स्त्री वा ज्ञातीनां श्रेष्ठतां व्रजेत् ॥ वामनपुराणे ॥ वैशाखे पु
ष्पलवणं वर्जयित्वा च गोप्रदः ॥ भुक्त्वा विष्णुपदे कल्पं स्थित्वा राजा भवेदिह ॥ नृसिंहप्रसादे पद्मपुराणे ॥ तीर्थे वा न
दिनं स्नानं तिलैश्च पितृतर्पणं ॥ दानं धर्मघटादीनां मधुसूदन पूजनं ॥ माधवे मासि कुर्वीत मधुसूदनतुष्टये ॥ अ
पराके वामनपुराणे ॥ गंधाश्च माल्यानि तथा वैशाखे सुरभीणि वै देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥ उद्या
पनं च तत्रैव ॥ कामासमेकं बहिः स्नात्वा नद्यादौ विमले जले ॥ एकादश्यां वा द्वादश्यां पौर्णमास्यामथापि वा ॥ उपोष्य
नियतो भूत्वा कुर्यादुद्यापनं बुधः ॥ मंडपं कारयेद्दिव्यं दोकलशान्विन्यसेत् ॥ निक्षेत्तावा तद्दूर्वनतद्धस्तिने
वा पुनः ॥ शैक्तावा कारयेद्वंसो वर्णानि स्तराम्बितं ॥ लक्ष्मीयुतं तगन्नाथं पूजयेदासनेबुधः ॥ मधुसूदनं प्राय
दीर्घैर्विधिवत्सं वपेः ॥ एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत् ॥ श्वोभूते कृतमैत्रोथ्यग्रह वेदोक्त महार यजोत ॥ होमं कुर्यात्त

स॰ यतेनपापसेनविवर्जिताः। तिलाज्येनपवैर्वापिसर्वैर्वापिस्वशक्तितः॥ अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा॥ प्रा
तर्विष्णुरनेनैवइदंविष्णुरनेनवा॥ व्रतस्यपूर्तिसिद्ध्यर्थंधेनुमेकांपयस्विनीं॥ पादुकोपानहौछत्रंगुरवेऽर्प
नंतथा॥ शय्यांसोपस्करांदद्याद्दीपिकांदर्पणंतथा॥ ब्राह्मणान्भोजयेत्त्रिंशन्नैम्योदद्याद्दक्षिणां॥ कलशा
न्नलपूर्णांस्तुतेभ्योदद्याद्यथातथा॥ एवंकृतेमाधवस्यउद्यापनविधौशुभे॥ एवंफलमाप्नोतिसकलंविष्णुसायु
ज्यमाप्नुयात्॥ वैशाखस्यमलत्वेपितत्रैवस्नानादिसमाप्यमितिहेमाद्रिमदनौ॥ तथावकाठकगृह्ये। आरब्धम
लमासात्प्राक्कृच्छ्रकाम्यमसमापितं। सप्राप्तेमलमासेपितत्समाप्यमसंशयमिति॥ ॥इतिवैशाखोद्यापनविधिः॥
॥इतिवैशाखकृत्यं॥ अथज्येष्ठकृत्यं॥ भविष्योत्तरे॥ ज्येष्ठेनपंकजंकृत्वाज्येष्ठेमासिसवेदकं। पुष्पैःसंपूज्यगंधा
द्यैर्नानावस्त्रविभूषणैः। वर्षकोटिशतंसाग्रंसूर्यलोकेमहीयते। पंकजोब्रह्मा॥ वामनपुराणे। उदकुंभोबुधेनुश्च
तालवृंतंवचंदनं। त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्येष्ठमासिवा॥ ॥इतिज्येष्ठकृत्यं॥ ॥अथाषाढकृत्यं॥ वामनपु
राणे॥ उपानद्युगलंछत्रंलवणामलकानिच॥ आषाढेमानसप्रीत्यैदातव्यानीहभक्तितः। भारते॥ आषाढमे
कभक्तेनस्थित्वामासमतंद्रितः। बहुधान्योबहुधनोबहुपुत्रश्चजायते॥ ॥इत्याषाढकृत्यं। ॥अथचातुर्मास्य
व्रतानि। भविष्योत्तरे। स्त्रीवानरोवामद्भक्तोधर्मार्थंसुदृढव्रतः॥ गृह्णीयान्नियमानेतान्दंतधावनपूर्वकान्॥ तेषां राम
७२

फलानिवक्ष्यामितत्कर्तॄणांपृथक्पृथक्॥ मधुरस्वरोभवेद्राजापुरुषोगुडवर्जनात्। तैलस्यवर्जनाद्राजन्सुं
दरांगःप्रजायते। कटुतैलपरित्यागाच्छत्रुनाशमवाप्नुयात्॥ तद्वद्योगाभ्यासीभवेद्यस्तुसब्रह्मपदमाप्नुया
त्॥ कटुकाम्लतिक्तमधुरक्षारकषायरसान्वयः॥ योवर्जयेत्सवैरूप्यंदौर्गंध्यंनाप्नुयात्क्वचित्॥ तांबूलवर्जनाद्भोगी
रक्तकंठश्चजायते॥ घृतत्यागात्सुलावण्यंसर्वस्निग्धतनुर्भवेत्॥ फलत्यागात्तुमतिमान्बहुपुत्रश्चजायते॥ शा
कपत्राशनाद्रोगीअपक्वादोमलोभवेत्॥ पादाभ्यंगपरित्यागाच्छिरोभ्यंगविवर्जनात्। दीप्तिमान्दीप्तकरणोप
नीऽद्व्यपतिर्भवेत्॥ दधिदुग्धतक्रनियमोगोमक्तोगोपतिर्भवेत्। इंद्रातिथित्वमाप्नोतिस्थालीपाकस्यवर्जनात्।
लभतेसंततिंदीर्घांतैलपक्वविवर्जनात्। भूमौप्रस्तरशायीववीरोमुनिवरोभवेत्॥ सदामुनिःसदायोगीमधु
मांसस्यवर्जनात्। तथा। एकांतरोपवासेनब्रह्मलोकेमहीयते॥ मौनव्रतीभवेद्यस्तुतस्याज्ञास्खलिताभवेत्॥ भू
मौभुंक्तेसदायस्तुसपृथिव्याःपतिर्भवेत्॥ नमोनारायणायेतिजपन्यज्ञफलंलभेत्॥ पादाभिवंदनाद्विष्णोर्लभे
द्गोदानजंफलं। विष्णुपादाब्जसंस्पर्शाद्दिनपापात्प्रमुच्यते॥ पादोदकाभिषेकाद्वोगंगास्नानेदिने। विष्णुदेवकुले
कुर्यादुपलेपनमार्जनं॥ कल्पस्थायीभवेद्राजासनरोनात्रसंशयः॥ प्रदक्षिणाशतंयस्तुकरोतिस्तुतिपाठकः॥
हंसयुक्तविमानेनसचविष्णुपुरंव्रजेत्॥ गीतवाद्यकरोविष्णोर्गांधर्वंलोकमाप्नुयात्॥ नित्यंशास्त्रसमाख्यानात्

स॰ कान्यस्तुप्रबोधयेत्॥ यावत्सुष्यतितस्यास्तु विष्णुलोकंसगच्छति। कृत्वाप्रेततार्कं विष्णो र्लोकमप्सरसांव्रजेत्॥ नी
धेनुस्नपनाद्विष्णो र्निर्मलंज्ञानमाप्नुयात्॥ पंचगव्याशनात्पार्थ चान्द्रायणफलंलभेत्॥ अपावितेनप्राप्नोति
पुत्रधर्मनिशेषतः॥ षष्ठीव्रतकानमोक्तायः कल्पस्थायी भवेद्दिवि॥ उपवासद्वयान्तरितं नक्तः शिलोञ्छेन तु भुंजा
नः प्रयागस्नानमाप्नुयात्॥ पत्तेष्वेयोनरो भुंक्ते कृतते त्रफलं लभेत्॥ पामद्रुपजलत्यागात् नरोगैरभिभूय
ते॥ गुडवर्जीनरोदद्यात्तद्वत्ताम्रभाजनं। नमस्य हिरण्यं न पश्चेछलवताप्याप्ययंविधिः॥ ब्रह्मदेवत्रे। एकभक्त
नरः कृत्वा नित्यस्नायी दृढव्रतः। पयोवर्यचतुरोमासान्वासुदेवंसनातनम्। यस्तु सुप्ते हृषीकेशे नक्तमाचरते व्रती।
वस्त्रयुग्मंनरोदत्वा शिवलोके महीयते। अयूपवर्जनं कृत्वा भोजनेव्रतमाचरेत्॥ कार्त्तिक्यां तु गोधूमान्वस्त्रंद
त्वाश्वमेधमाप्नुयात्॥ अन्नंदत्वा च विप्राय ब्रह्मलोकमवाप्नुयात्॥ एकान्तरोपवासेन विष्णुपूजनतत्परः॥ गांदत्वा
वासुदेवस्य लोके संपूज्यते नरः। यस्तु सुप्ते हृषीकेशे क्षितिशायी भवेन्नरः॥ शय्यां सोपस्करां दत्वा इन्द्रलोके महीयते॥
वार्षिकांश्चतुरोमासान्मधुसर्वं परित्यजेत्॥ घृतादौ हरिमुद्दिश्य सभवेद्धृदविद्धिजः॥ सोपयेत्कृष्णपादेनश्चा बा
ढादिवनुधूपां। विष्णुपूजनकृन्मर्त्यः स भवेन्नन्निकेतनः॥ व्रतानक्तंत्यजेत्तैवा॥ समाप्ते भोजयेद्विप्रान्भक्ताद
धाद्दक्षिणां॥ तथा॥ समाप्ते गोयुगं दद्याद्दत्वा विप्राय भोजनं। तथा। समाप्ते गोवर्धं दद्याद्धेमकांचनसंयुतान राम
९३

धाव्रतांतेवतथादद्यात्कामिकांवपयस्विनीं तथा। वस्त्रयुग्मंसमाप्तेऽनुवस्त्रंदद्याद्द्विजायतेइति। तथाव्रतांतेविप्रमिथु
नंपूजाधेनुसमन्वितं॥ वस्त्रान्हिरण्मयान्दद्यात्सोऽश्वमेधफलंलभेदिति॥ एतेषांवपतालाशक्तितोब्रप्रवस्थावातु
र्मास्येनिषिद्धान्युक्तानि भविष्योत्तरे॥ सुप्ते यस्मिन्निवर्तंते क्रियाः सर्वाः शुभोदयाः॥ विवाहव्रतबंधादिचूडासंस्का
रवीक्षताः॥ यज्ञागृहप्रवेशाश्चप्रतिष्ठादेवमूर्तताः॥ पुरापानिपानिकर्माणि तेनस्पुःसुप्ते जगत्पतौ॥ वीक्षतामपूर्वदेव
वीक्षताः॥ पुराणानिकर्माणि ज्योतिष्टोमादीनि॥ ॥इतिचातुर्मास्यविधिः॥ ॥अथनदीनांरजोदोषः॥ तत्रनावत्रघोषि
विधाः॥ महत्योऽल्पाश्चेति। तथाचब्रह्मपुराणे। गोदावरीभीमरथीतुंगभद्रा च वेणिका॥ तापीपयोष्णी विंध्यस्यद
क्षिणे तु प्रकीर्तिताः॥ भागीरथीनर्मदा च यमुना च सरस्वती॥ विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः॥ द्वादशै
ता महानद्यो देवर्षिक्षेत्रसंभवा इति॥ एतदन्यास्त्वल्पाः ततोऽल्पाप्यगर्त्ताः॥ तथा च स्मृतिसंग्रहे॥ धनुःसहस्राण्यष्टौ
च गतिर्यासांनविद्यते। नतानदीशब्दवहा गर्तास्तेपरिकीर्तिता इति। तत्रमहत्सु भविष्योत्तरो आदौ तु कर्कटे देवि
महानद्यो रजस्वलाः॥ त्रिदिनं तु चतुर्थेह्नि शुद्धास्युर्जाह्नवी यथेति॥ देवल। गंगा च यमुना चैव प्लक्षजाता सरस्वती॥
रजसा नाभिभूयंते येचान्ये नदसंज्ञिताः॥ शोणसिंधुहिरण्याख्याः कोकलोहितघर्घराः॥ शतद्रुश्च नदाः सप्त पा
वनाः परिकीर्तिताः॥ स्मृतिसंग्रहे। तपनस्यसुतागंगागोतमी च सरस्वती॥ रजसा नाभिभूयंते ते चैते वनदसंज्ञिताः॥

स॰ निगमः॥ गंगा धर्मद्रवः पुण्या यमुना च सरस्वती॥ अंतर्गतरजोदोषाः सर्वावस्थासु चामलाः॥ एवं वा प्रथमं कर्कटे देवित्र्य
हं गंगा रजस्वला॥ तथा कर्कटादौ रजोदुष्टा गोतमी वासरत्रयं चंद्रभागा सती सिंधुः सरयूर्नर्मदा तथेति। दिपत्रं
नगतिरजो विषयं। अल्पनदी विशेषांतर माह देवलः॥ नभो नभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः॥ तासु स्नानं न कु
र्वीत देवर्षिपितृतर्पणं॥ अत्रिश्च। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः॥ नस्नानादीनि कर्माणि तासु कुर्वीत मा
नवः॥ न देवतयोः सर्वा नद्यस्तु विशेषोक्ता महानदी विषयत्वमपीति वाच्यं। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्व
लाः॥ तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः इति व्याघ्रपादोक्तेः॥ अल्पनदीषु ऋतुत्व धर्मा त्येपि। यावन्नोदेति भग
वान् दक्षिणाशा विभूषणः॥ तावद्रजो हा न घः करतोयाः प्रकीर्त्तिता इति। करतोया अल्पोदकाः॥ कात्यायनेन त्व
त्रोक्तो विशेषः ग्रीष्मे शोषमुपगच्छंति ग्रीष्मे कुसरितो भुवि तासु प्रावृषि नस्नायात् पूर्वे दशवासरे॥ रजो दोषश्च
न तत्तीरवासिनां। न तु तत्तीरवासिनामिति निगमोक्तेः॥ विशेषांतरं मत्स्यपुराणे॥ पुराणे भसासमायोगात् तु दुष्टम
प्यंबु पावनमिति॥ भारते। च॥ अपवित्रमपि प्राप्य गंगायां तिपवित्रतां। रजोयुत नदीजलपाने प्रायश्चित्तं॥ स्म
ति संग्रहे। कालेन भस्य भुक्त्वा स्नात्वा त्रिरात्रं तु नवोदकं। अकाले तु दशाहं स्यात् पीत्वा नाद्यादहर्निशमिति। भविष्योम
हदंबु समं वापि पदि तिष्ठेत्पुरातनं॥ नवांबु मिश्रितं तेन न दुष्टमिति स्मृतयः। योगयाज्ञवल्क्यः। रजोदुष्टे भसिला राम ७४

नं वर्जयेन्नद्यादिषु द्विजैः॥ कदर्थितं रजस्तेषां संध्योपास्तिश्च तर्पणं। तथा अजा गावो महिषी चैव ब्राह्मणी च प्रसू
तिका॥ भूमेर्नवोदकं चैव दशरात्रेण शुद्ध्यति। कृतं तु तनकूपाद्युदकमपि नवोदकं॥ व्याघ्रपादः॥ अभावे कू
पवापीनां अनपायिपयोभृतां। रजोदुष्टेपि पयसि ग्रामभोगो न दुष्यति। वसिष्ठः॥ उपाकर्मणि चोत्सर्गे प्रेतस्ना
ने तथैव च। चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते॥ ॥अथ श्रावणकृत्यं॥ ॥भारते। श्रावणं नियतो मासमेकभु
क्तेन यः क्षिपेत। यत्र तत्राभिषेकेण पूज्यते ज्ञातिवर्द्धनः। वामनपुराणे। घृतं च क्षीरं कुंभांश्च घृतपक्वफलानि
वा श्रावणे श्रीधरप्रीत्यै दातव्यानि द्विजेन्द्र इति श्रावणकृत्यं॥ ॥अथ भाद्रपदकृत्यं॥ भारते। प्रौष्ठपदं तु यो
मासमेकाहारो भवेन्नरः॥ धनाढ्यः स्फीतमरुन्तामैश्वर्यं प्रतिपद्यते॥ वामनपुराणे। मासि भाद्रपदे दद्यात् पायसं
मधुसर्पिषी। हृषीकेशप्रीणनार्थं लवणं सगुडोदनं॥ ॥इति भाद्रपदकृत्यं॥ ॥यमः। घृतमाश्वयुजे मा
सि नित्यं दद्याद्द्विजातये। प्रीणयित्वाश्विनौ देवौ रूपभाग भिजायते॥ वामनेन तिलशिरांगं वृषभं दधिताम्र
सादिकं। प्रीत्यर्थं पद्मनाभस्य देयमाश्वयुजे नरैः॥ भारते। तथैवाश्वयुजं मासमेकभक्तेन यो नयेत्। प्रजावान् च
हुपुत्रश्च वाहनाढ्यः सजायते॥ ॥इत्याश्विनकृत्यं॥ ॥अथ कार्त्तिककृत्यं॥ विष्णुः। कार्त्तिकं सकलं मासं नि
त्यं स्नायी जितेंद्रियः॥ जपन् हविष्यभुक् दांतः सर्वपापैः प्रमुच्यते। नपश्चाद्देवतामंत्रस्य गायत्र्या वा॥ एतदा

स० कविपयमशक्तस्यतु कं। काशीखंडे। वाराणस्यां पंचनदे त्र्यहं स्नात्वा तु कार्त्तिके॥ आमीतिपुरुषं वपुषः पुरुषमा
जो ति निर्मला इति। स्नानकालश्च कृत्यतत्त्वे वा कार्त्तिके बिंदुतीर्थे यो ब्रह्मचर्यपरायणः॥ स्नास्यत्यनुदिते भानो
भानुजात्तस्य भीः कुतः॥ भानुजा यमात्। तत्रैव स्नानमंत्रः॥ कार्त्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन॥ प्रीत्य
र्थं तव देवेश दामोदर मया सह॥ इमं मंत्रं समुच्चार्य मौनी स्नायाद्व्रती नर इति। अर्घकेपापशोषंतोग हात्व घ्र्यं
मया दत्तं राधया सहितो भवान्॥ इमो मंत्रो समुच्चार्य यो र्घ्यं मर्त्यः प्रयच्छति। सुवर्णरत्नपुष्पोबु पुत्रा शंखेन पुष्प
वावान॥ सुवर्णपिपिवीसंकल्पोदकपूर्वकं॥ तेन दत्तो भवेत्सम्यक्कृत्सुयात्रा पत्सुपर्वतीति। पाद्मे॥ तुलसीदलल
क्षेणा कार्त्तिके यो वर्चयेद्धरिं। पत्रे पत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलं। तत्रैव। कृत्त्वा कोटिगुणां गंगायामपि त
त्समः॥ ततोधिकः पुष्करेस्याद्द्वारवत्यां वभार्गव॥ दुर्लभः कार्त्तिको विप्रा मथुरायां नृणामिहेति॥ स्कांदे कार्त्ति
त्तिक माहात्म्ये। धात्रीछायां तु यः कुर्यात्पिंडदानं महामुने॥ मुक्तिं प्रयांति पितरः प्रसादान्माधवस्य तु। दानम
ह वामानः॥ रजतं कनकं दीपान् मणिमुक्ताफलादिकं॥ दामोदरस्य प्रीत्यर्थं प्रदद्यात्कार्त्तिके नरः॥ वंदमंप्रका
शेव र्षदयंत्ति। विप्रवेश्मनि यो दद्यात्कार्त्तिके मासि दीपकं॥ अग्निष्टोमफलं तस्य प्रवदंति मनीषिणः॥ चतुष्प
थेषु रथ्यासु ब्राह्मणावसथेषु वा। वृक्षमूलेषु गोष्ठेषु कांतारगहनेषु वा। दीपदानाद्भवेत्त्वत्रिमहाफलमवाप्नुया राम

त्॥ उच्चैः प्रदीपमाकाशे यो दद्यात्कार्त्तिके नरः॥ सर्वं कुलं समुद्धृत्य विष्णुलोकमवाप्नुयात् इति। मंत्रोपि तत्रैव।
दामोदराय नभसि तुलायां लोलया सह॥ प्रदीपं ते प्रयच्छामि नमोनंताय वेधसे इति॥ स्कांदे। प्रदीपमालाः कुर्वी
त कार्त्तिके मासि वै मतं मात्रवसानेषु दीपानां ब्राह्मणान् भोजयेच्छुचिः॥ गातापर्व्वसलभते दीप्यते वराविपर्ध्व
ति। भारते। कार्त्तिकं तु नरो मासं यः कुर्यादेकभोजनं॥ भूरिबहुवीर्यश्च कीर्त्तिमांश्चैव जायते॥ काशीखंडे। कृच्छ्र
वा चातिकृच्छ्रं वा प्राजापत्यमथापि वा। संप्राप्ते कार्त्तिके मासि कुर्याच्छूत्पातिपुरुपवान्॥ एकांतरव्रतं कुर्यात्त्रि
रात्रव्रतमेव वा॥ पंचरात्रं सप्तरात्रं संप्राप्ते कार्त्तिके व्रती॥ पक्षव्रतं वा कुर्वीत मासोपोषणमेव वा॥ शाकाहारपयो
हारं फलाहारमथापि वा॥ यवैर्यवान्नाहारं वा संप्राप्ते कार्त्तिके व्रती॥ ब्रह्मचर्यं चरेद्भूर्नेमहाव्रतफलाप्तये पत्र
भोजी भवेद्भक्तेनं कांस्ये त्याज्यत्र पत्रतः॥ कांस्यस्य निषमेद्यात्कांस्यं सर्पिःप्रपूरितं॥ नारदीये॥ कार्त्तिके वर्जयेत्तै
लं कार्त्तिके भुक्तसंधितं॥ भुक्तं पर्युषितं॥ संधितं लवणशाकः पाम्राणि कोमादकं वैवनेवाद्यात्कार्त्तिकव्र
ती। द्विदलं तिलतैलं तथान्यं नं तद्दूषितं। द्विदलं तु पूर्वमुक्तं। भारते॥ कार्त्तिके वर्जयेन्मांसं कार्त्तिके वर्जयेन्मधि
ति॥ काशीखंडे॥ मधु त्यागे घृतं दद्यात्पायसं च सशर्करं। मांसाशिनोपि ये भूपास्त्यजेयुस्ते पिकार्त्तिके॥ नि
वेद्य मेमत्स्यमांसानां दद्यात्कार्त्तिके व्रती। कूष्मांडानि समांसानि दशाष्टवर्तायुतान्यपि॥ कार्त्तिके मौनभोजी य

स. सोश्नात्यमृतमेव हि॥ सुघृतं सतिलं मौनी सहिरण्यं प्रदापयेत्। कार्त्तिके लवणं त्यक्तं येन व्रतं भक्तासना॥
भ्यक्ताः सर्वे रसास्तेन तत्त्यागी गां प्रदापयेत्॥ भूशय्यां कार्त्तिके कुर्वन् न भवेत् संस्पृशो द्युती॥ पर्यंकं भूषयोर्द
द्यात्तु तूलं सोपधानकं॥ सर्व्वचातुर्मास्यव्रतान्यपि वस्तु यद्यसंभवे कार्त्तिक एव कार्याणीति। तथा वत्सत्रेव। वस्तुतस्त्वपि
चमासेषु न समामर्थ्यं व्रतेषु यदि। तदा नैव इति ना भावं अध्यपवर्ग फलमिच्छतेति॥ अथ भीष्मपंचकं॥ कार्त्तिकं प्रक्रम्य
प्राप्नोति एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकं व्रती स्नात्वा विधानेन मध्याह्ने तु तथा पुनः॥ अत्र प्रातर्मध्याह्ने
च मन्त्रं मध्याह्न्यां स्नात्वा देवर्षिपितृन् संतर्प्य विष्णुं पंचामृतं पंचगव्येः संस्नाप्य कर्पूरकस्तूरीकुंकुमचंदनैरनुलिप्य
पुष्पैरभ्यर्च्य किं सागुरुणा धूपयित्वा पायसं वा हिकमनवरतदीपं प्रज्वाल्य हविष्यान्नं निवेद्य सायं संध्यामुपास्य मू
लमंत्रं जपेत्। तत्र पंचसु दिनेषु विशेषः॥ आद्ये पद्मैः पादौ पूजयेत्। द्वितीये बिल्वपत्रैर्जानुनी॥ तृतीये नाभिं तु
नाभिं तुलसीपत्रैः। चतुर्थे तातीपुष्पादिभिः स्कंधौ॥ पंचमे मालतीपुष्पैः शिरः। तथा पंचस्वपि दिनेषु पू
जान्तरं॥ सत्यव्रताय शुचये गांगेयाय महात्मने॥ भीष्मायैव ददाम्यर्घ्यमाजन्मब्रह्मचारिणे॥ वसूनामवतारो
य शंतनोरात्मजाय च। अर्घ्यं ददाम्यहं॥ अपुत्राय ददाम्येतत् सतिलं भीष्मवर्मणे इति येतेमंत्रैः भीष्मसंतर्पणी मय
गोमूत्रं दुग्धं दधि घृतानि पिबेत्। एवं पंचदिनानि पयोभ्य षष्ठदिवसे विधिवत्स्नात्वा पक्वान्नेन पंच ब्राह्मणान् भोज्यव

राम
१६

धुभिः सहरात्रौ भुंजीत। अत्र चैकादश्यां सुवर्णं द्वादश्यां वस्त्रं त्रयोदश्यां गौश्चतुर्दश्यां घृ ५ तथा पञ्चम्यां पौर्णमास्यां
घृतकृसरं तिला वस्त्रं वदेयाः मैथुनानृतवाद मधुमांस तांबूलाभ्यंगादीनि वर्ज्यानि। एतेषु वस्त्रानादिषु सोरस्थांप्रे
वामासः आश्वपतीयः। तुलामकरमेषेषु प्रातः स्नानं विधीयते॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति वि
ष्णुस्मृतेः। आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत्। कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीरिति पाद्मोक्ते
श्च॥ ॥ इति कार्त्तिककृत्यं॥ ॥ अथ कार्त्तिकोद्यापनविधिः॥ ॥ पाद्मे॥ नारद उवाच॥ अथोर्जव्रतिनः सम्यक्
उद्यापनविधिं नृप॥ तं शृणुष्व समासेन सविधानं विशेषतः॥ ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥ व्र
तसंपूर्त्तितार्थाय विष्णुप्रीत्यर्थमेव च॥ तुलस्याः उपरिष्टात्तु कुर्यान्मंडपिकां शुभां॥ सुतोरणां चतुर्द्वारां पुष्पचा
मरशोभितां॥ द्वारेषु द्वारपालांश्च पूजयेन्मृण्मयान्पृथक्॥ पुरापशीलं [illegible] सुशीलं च जयं विजयमेव च॥ तुल
सीमूलदेशे तु सर्वतोभद्रमेव वा पंचवर्णैर्वर्त्तकैः सम्यक् कृत्वा शोभासमन्वितं॥ तस्योपरि घटं [illegible] पिधानं पंच
रत्नसमन्वितं॥ महाफलेन संयुक्तं कुंभं तत्र निधापयेत्॥ पूजयेत्तत्र देवेशं शंखचक्रगदाधरं॥ कौशेयपीतवसनं पु
कंजलधिकन्यया। इंद्रादिलोकपालांश्च मंडपे पूजयेद्व्रती॥ द्वादश्यां प्रतिबुद्धो सौ त्रयोदश्यां ततः सुरैः॥ दृष्टो
द्दृष्टश्चतुर्दश्यां तस्मात्पूज्यस्तिथाविह। तस्यामुपवसेच्छांतः प्रयतमानसः॥ पूजयेद्देवदेवेशं सौवर्णं तु व

नुज्ञया॥उपचारैः षोडशभिर्नाममंत्रसमन्वितैः॥रात्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः॥मर्त्तिं कुर्वंति ये भक्त्या
स॰ जागरे वत्सपातिनः॥जन्मांतरशतोद्भूतैस्ते मुक्ताः पापसंचयैः॥जागरे जागरे विष्णोर्गीतं नृत्यं प्रकुर्वतां॥गोसहस्र
प्रददतां फलं समनुदात्ते॥गीतं नृत्यादिकं कुर्वन्दर्शयन्कौतुकानि च॥पुरतो वासुदेवस्य रात्रौ वै हरिवासरे॥
पठन्विष्णुचरित्राणि तोषयंजगतिविष्णवान्॥मुखेन कुरुते वाद्यं दस्तिंश्चालाबाध्वर्जयेत्॥ततश्च पौर्णमास्यां वस
पत्नीकान्द्विजोत्तमान्॥त्रिंशन्मितांस्तथैकं वा स्वशक्त्या वा निमंत्रयेत्॥वरानदत्वा यतो विष्णुर्मत्स्यरूपमवर्त्तत
तस्यां दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतं॥अतस्तान्भोजयेद्विप्रान्पायसान्नादिनाव्रती॥अतो देवाइतिद्वाभ्यां जुहु
यात्तिलं पायसं॥प्रीत्यर्थं देवदेवस्य देवानां च पृथक्पृथक्॥दक्षिणां च यथाशक्तिप्रदद्यात्प्रणमेत्ततान्॥देवदेवं
समभ्यर्च्य देवांश्च तुलसीं तथा॥ततो गां कपिलां तत्र पूजयेद्विधिवद्व्रती॥गुरुं व्रतोपदेष्टारं वस्त्रालंकरणादिभिः॥
सपत्नीकं समभ्यर्च्य तांश्च विप्रान्क्षमापयेत्॥युष्मत्प्रसादाद्देवेशः प्रसन्नो मम सर्वदा॥व्रतादस्माद्यत्पापं स
प्तजन्मकृतं मया॥तत्सर्वं नाशमायातु स्थिरा मे चास्तु संततिः॥मनोरथाश्च सफलाः संतु नित्यं तवार्चनात्॥देहां
ते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभं॥इति क्षमाप्य तान्विप्रान्प्रसाद्य च विसर्जयेत्॥कार्त्तिके रेवा यथोक्तं प्रतिवि
धिरेवं विधः स्मृतः॥ ॥नारद उवाच॥एवं यः कुरुते सम्यक्कार्त्तिकस्य व्रतं नरः॥विपापमास्तु निर्मुक्तो विष्णुसा राम
११

न्निध्यगो भवेत्॥सर्वव्रतैः सर्वतीर्थैः सर्वदानैश्च यत्फलं॥तत्कोटिगुणितं ज्ञेयं सम्यगस्य विधानतः॥ते धन्या
स्ते महापुण्यास्तेषां सर्वफलोदयः॥विष्णुभक्तिरताः स्युः कार्त्तिकव्रतकारिणः॥देहस्थानि पापानि वितर्कं
यांति तद्यथा ताक्ष्ययास्य मोवत्सेवं यह जेव्रतकं नरैः॥नारद उवाच॥इत्युक्तव्रतनियमान्भक्त्या तिमत्रा
यो वै तत्कथयति वैष्णवायनित्यं॥ते सम्यग्व्रतकरणात्फलं भवेद्यत्तत्सर्वं किल्बिषविनाशनं लभंते॥ ॥
इति कार्त्तिकोद्यापनविधिः॥ ॥अथ मार्गशीर्षकृत्यं॥ ॥महाभारते॥मार्गशीर्षं तु यो मासमेकभक्तेन संत्य
जेत्॥भोजयेत्तु द्विजान्शक्त्या स मुच्येद्व्याधिकिल्बिषैः॥कृषिभागी बहुधान्यश्च जायते॥वामनपुराणे॥खरो
ष्ट्राश्वनरा गावः शकटानि अजाविकं॥दातव्यं केशवप्रीत्यै मासि मार्गशिरे नरैः॥ ॥इति मार्गशीर्षकृत्यं॥ ॥अ
थ पौषे॥महाभारते॥पौषमासं तु कौंतेय एकभक्तेन यः क्षिपेत्॥सुभगो दर्शनीयश्च यशोभागी च जायते॥
॥इति पौषकृत्यं॥ अथ माघकृत्यं॥ विष्णुस्मृतौ॥तुलामकरमेषेषु प्रातःस्नायी सदा भवेत्॥हविष्यं ब्रह्म
चर्यं च महापातकनाशनमिति॥प्रभासखंडे॥माघे मासि च यः स्नायान्नैरंतर्येण भारत॥पौंडरीकफलं तस्य
दिवसे दिवसे भवेत्॥ब्रह्मपुराणे॥एकादश्यां शुक्लपक्षे पौषमासे समारभेत्॥द्वादश्यां पौर्णमास्यां वा शुक्लप
क्षे समापनं॥पद्मपुराणे॥पुष्यस्यैकादशीं शुक्लामारभ्य स्वर्द्रिलिशयः॥मासमात्रं निराहारस्त्रिकालस्नानं निराहा

स.

रस्यैवस्नाहवर्पति॥स्नानकालश्च पद्मपुराणे॥माघमासेरटंत्याप:किंचिदभ्युदितेरवौ॥भविष्योत्तरे॥पौमाघ
मासपुष्पतिसूर्यकराभितप्तेप्रेस्नानंसमाचरतिवारूनदीप्रवाहेइति॥ब्रह्मपुराणे॥अहत्तोदयेतुसंप्राप्तेस्नान
कालेविवस्वत:॥माधवांघ्रिपुगंध्यायन्यन्य:स्नातिसुरपूजितइतिएतानिशक्तस्पेत्पाद्यवक्षितानि॥
तत्रसंकल्पमंत्रमाहविष्णु:॥तत्रवोच्यपानिपमंगल्हौपादिधिपूर्वकं॥माघमासमिमंपूर्णंस्नास्येहंदेव
माधव॥तीर्थस्यास्यजलेनित्यंइतिसंकल्पवेतसि॥स्नानमंत्र:पद्मपुराणे॥दु:खदारिद्र्यनाशायश्रीविष्णोस्तोष
णायच॥प्रात:स्नानंकरोम्यद्यमाघेपापविनाशनं॥मकरस्थेरवौमाघेगोविंदाच्युतमाधव।स्नानेनानेनमेदेव
यथोक्तफलदोभव॥इमंमंत्रंसमुच्चार्यस्नायान्मौनसमन्वित:॥पवित्रेप्रसवित्रेवपरंधामजलेमम॥तत्व
ज्ञमापरिभ्रष्टंपापंयातुसहस्रधेतिमंत्रेणसूर्यायार्घ्यदानमुक्तंपद्मपुराणेदचे।मासपर्यंतमस्मिन्वेत्र्यहंक
र्तव्यं॥अस्मिन्योगेत्वशक्तोपिस्नायादपिदिनत्रयं॥प्रयागेमाघमासेतुत्र्यहंस्नातस्ययत्फलं॥नाश्वमेधस
हस्रेणतत्फलंलभतेभुवीतिपद्मपुराणात॥प्रयागासंभवेकाशीखंडे।काश्यपुत्त्रवेप्रयागेयेतपसिस्नातिमा
नवा:॥दशाश्वमेधजनितंफलंतेषांभवेद्ध्रुवाम्मिति॥भविष्योत्तरेअप्राव्तशरीरस्तुय:कर्षंस्नानमाचरेत॥प
देपदेश्वमेधस्यफलंप्राप्नोतिमानव:॥नारदीयेनवर्हिंतेवयेत्स्नांतोत्घस्नातोपिवरानने॥होमार्थंसेवयेद्वहिं राम
१८

श्रीतार्थेनकदाचन॥अहन्यहनिदातव्या:तिला:शर्करयान्विता।।त्रिभागास्तुतिलानांहिचतुर्थ:शर्करान्वित:॥तथा
तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी॥तिलभुक्तिलदाताचषट्तिला:पापनाशनी:॥तैलमामलकाश्चैवती
र्थेदेयास्तुनित्यश:॥तथाप्रज्वालयेद्वह्निंसेवनार्थंद्विजन्मनां॥पाद्मे॥दातव्योदीपकोखंडेदेवमुद्दिश्यमाधवं
॥विष्णु:॥माघेमास्यग्निंप्रत्यहंतिलैर्हुत्वासघृतकशरंब्राह्मणान्भोजयित्वादीप्ताग्निर्भवतीति॥माघव्रतोद्या
पनमाह॥चंद्रभप्रकाशेविष्णु:॥एवंस्नानावसानेतुभोज्यंदेयमवारितं॥भोजयेद्द्विजदांपत्यंभूषयेद्वस्त्रभूषणै:॥
कंबलाजिनरत्नानिवासांसिविविधानिच॥बालकानिवद्देयानिप्रच्छादनपटांस्तथा॥उपानहौतथागुप्तमोचकौ
पापमोचकौ॥अनेनविधिनादद्यान्माधव:प्रीयतामिति॥अत्रसमापनमंत्र:॥सवित्रेप्रसवित्रेचपरधामजलेमम॥
त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधा॥दिवाकरजगन्नाथप्रभाकरनमोस्तुते।परिपूर्णंकरिष्येहंमाघस्नानंतवाज्ञया॥
अहन्यहनिदातव्या:तिला:शर्करयान्विता:।माघावसानेसुभगेषट्त्रिंशद्भोजनंतथा।।पूर्वोमेप्रीयतांदेवो
विष्णुर्मूर्तिर्निरंजन:।दंपत्योर्वाससीसूक्ष्मेसप्तधान्यसमन्विते।त्रिंशन्मोदकादेया:शर्करातिलसंयुता:॥भाग
त्रयंतिलानांतुचतुर्थ:शर्करांशक:।अन्नभ्यस्तवरारोहेसर्वमासन्तथेदद्यं।विशेषोद्यापनंतुकार्तिकेवाचतपश्चि
विधिरेवंविध:स्मृतइतिवचनात्पूर्वोक्तएवज्ञेया:॥इतिमाघकृत्यं॥अथफाल्गुनकृत्यं॥स्कांदे॥एकभक्तंतुकुर्वी

यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा । मलमा-
सः स विज्ञेयो मासः स्यात्तु त्रयोदश इति तं ४

स॰ ताः फाल्गुने मासि नित्यशः। स्त्रीपुंसो भाग्यमाप्नोति त्रिपाद्यपरमप्रियः। वामने। फाल्गुने त्रीहियोगाद्वो वस्त्रैः कृ-
ष्णाजिनान्वितं॥ गोविंदप्रीतानाय पदातव्यं पुरुषर्षभ। तथा प्रातःस्नायी भवेन्नित्यं द्वैमासे माघफाल्गुनावि-
ति॥ ॥ इति फाल्गुनकृत्यं॥ ॥ अथ मलमासः॥ तत्स्वरूपं माधवीये ब्रह्मसिद्धांते। वा द्वौ मासो द्व्यसंक्रांतो मलमा-
सः प्रकीर्तितः इति स द्विविधः। अधिमासः क्षयमासश्चेति। तदुक्तं मदनरत्ने काठकस्य कालनियमो ब्रह्मसिद्धांते। द्वा-
त्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा॥ घटिकानां चतुष्केण पतत्यधिकमासक इति। स्यागमनकालोऽपि
तत्रैव गतोऽब्ध्यद्रिनंदैर्मिते शाककाले तिथीशैर्भविष्यत्यथांगाक्षसूर्यैः॥ गजाद्र्यग्निभूमिस्तथा प्राप्य शेषपंकुवे-
देंदुभिः क विजि कु मिथ्येति। अस्यार्थः॥ अब्धयश्चत्वारः। अद्रयः सप्त। नंदा नव एतत्संख्यात्रयमंकानां वामतो
गतिरिति प्रकारेण प्रातिलोम्येन बोध्यं। एवं च मिलनेन चतुःसप्तसप्तत्यधिकनवशतसंख्या संपद्यते एवं भवेद्वर्षेऽप-
रिमिते कश्चित् क्षयमासः पूर्वं जात इत्यर्थः। एवमग्रेऽपि प्रातिलोम्येन संख्या बोद्धव्या। तिथयः पंचदश ईशा एका-
दश। पंचदशाधिकशतं पुत्रैः सहस्रसंख्याके वर्षे मिते पातिकश्चित् क्षयमासोपेतः संवत्सरो भविष्यतीत्यर्थः॥ अं-
गानि षट्। अक्षाणि इंद्रियाणि पंच। सूर्या द्वादश। षट्पंचाशदधिकशतद्वयोपेतसहस्रसंख्याके वत्सरे मिते पाते
भविष्यतीत्यर्थः। गजा अष्टौ। अद्रयः सप्त। अग्नयस्त्रयः। भूरेका। अष्टसप्तत्यधिकशतत्रयोपेतसहस्रसंख्याके पाति राम

१८

भविष्यतीत्यर्थः॥ कुः एका। वेदाश्चत्वारः। इंदुरेकः। एकचत्वारिंशदधिकशतसंख्याके वर्षे तथा गावः नव कुरेकाए-
कोनविंशत्यं प्रायशो जायते इत्यर्थः॥ ॥ इति मलमासस्वरूपं॥ अथात्र वर्ज्यावर्ज्यं पैठीनसिः। स्त्रो तस्मात्तत्क्रियामास-
वृद्धिदशोमासि कीर्तिताः। त्रयोदशे तु संवत्सरा निष्फलाः परिकीर्तिताः॥ जाबालिरपि॥ नित्यनैमित्तिके कुर्यात्प्रय-
तः कुर्यान्मलिम्लुचे॥ तिथिनक्षत्रवारोक्तं काम्यं नैव कदाचन। कानिचिन्नित्यान्यपि मलिम्लुचे वर्ज्यानीति काठके-
ऽप्युक्तं। षष्ठीन्याग्रयणाधानचातुर्मास्यादिकान्यपि॥ महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत्॥ स्पष्टमासवि-
शेषाख्याविहितं वर्जयेन्मल इति। षष्ठी प्रि: काठकदेप्रतिष्ठा मदनरत्ने स्मृतिसंग्रहे। जातकर्मवपुर्मूर्ति-सीमं-
तो न्नपनव्रतं॥ मलिम्लुचेऽपि कर्त्तव्यं निमित्तं यदि जायते इति माधवीये भृगुः। वृद्धिश्राद्धं तथा सोममग्न्याधेयम्
हाल पं। राजाभिषेकं काम्यं च न कुर्यात् भानुलंघिते इति॥ वृद्धमनुः। अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च। वेदव्रतवृषो-
त्सर्गचूडाकरणमेखलाः॥ मांगल्यमभिषेकं च मलमासे विवर्जयेत्॥ वृषोत्सर्गः काम्यः॥ ज्योतिःशास्त्रे तत्र दत्त-
मदत्तं चैव कृतं न हुतमेव वा॥ सुजन्मप्रजप्रंसा त्रो प वास कृतो भवेत्॥ न यात्रां न विवाहं च न च वास्तुनिवेशं॥ न प्रति-
ष्ठा च देवानां प्रासादग्रामभूरुहामिति स्मृत्यंतरे॥ वापीकूपतडागादिप्रतिष्ठा यज्ञकर्म च॥ न कुर्यान्मलमा-
से तु महादानव्रतानि चेति। प्रजापतिः। उपाकर्म बह्वृचं चकन्यं पर्वे स्विवं तथा। उत्तरे निपतं कुर्यात्पूर्वं तन्निःफलं

स॰

भवेत्॥ अन्यत्रापि॥ अवरोहस्थे मंतः सर्पातो बालिरष्टका॥ ईशानस्य बलिर्विष्णोः शयनं परिवर्त्तनं। प्रायश्चित्तं तु सं
वत्सिम मासे विवर्जयेत्॥ गृह्यपरिशिष्टे॥ अवषट्कारहोमांश्च पर्वचाग्रयणं तथा॥ मलमासेपि कर्त्तव्यं काम्या इष्टी
श्च वर्जयेत्॥ अवषट्कारहोमाः॥ अग्निहोत्रोपासनवैश्वदेवादयः॥ पर्वदर्शपूर्णमासौ स्थालीपाकौ वा॥ अग्रयण
मान्यपत्तो ष्टिः स्ता चतुर्भिः स्त्विति दीपिकायां॥ बृहस्पतिः॥ बाले वा यदि वा वृद्धे शुक्रे वास्तंगते गुरौ॥ मलमासइवैता
निवर्ज्यानि देवदर्शनमित्यपि॥ आधानं पतकर्मादि प्रायश्चित्तं व्रतानि वा॥ न कुर्यान्मलमासेपि शुक्रगुर्वो हि पद्मवे॥
अस्तंगते गुरोशुक्रे वृद्धे बाले मलिम्लुचे॥ व्रतारंभं पूर्वा वनकुर्यान्मौंजीबंधनं निःक्रमं जातकर्मादि काम्यं वृष
विसर्जनमिति॥ जातकर्मादि जातेष्टिः॥ बहुवचनग्राह्यसा अस्तउक्तौ ब्रह्मसिद्धान्ते॥ रविरस्तत्तिरन्येषां ग्रहाणाम
स्तउच्यते॥ ततो वृद्धिबार्द्धकं मोद्यादूर्ध्वं बाल्यं प्रकीर्त्तितमिति॥ वार्द्धकबाल्ययोर्मानमपि तत्रैवापरत्तं प्राग्दिशि वृ
द्धत्वं पश्चात्पंचदिनं कवेः॥ द्रोणत्वं प्राक् पंचाहं पश्चाद्दशदिनं स्मृतमिति॥ कश्यपः॥ अत्र विशेषः॥ परत्तं वृद्धो महा
स्ते तु बालश्चात्र दशाहिकः॥ पादस्ते तु दशाहानि वृद्धो बालो दिनत्रयं॥ महास्तपादास्तत्र लग्नातां तु॥ द्वात्रिंशद्दिवसं प
श्चात्ते नीवस्य भार्गवस्य तु॥ ह्रासप्रतिमहत्त्वस्ते पादास्ते द्वादशक्रमादिति॥ अत्रैव प्राक् पश्चादुदितः प
वसप्तदिनं शिशुः॥ विपरीतं तु वृद्धत्वं तद्वदेव गुरोरपि ख्यादिनान्यूनाधिकभावः स्यात्॥ एतद्वर्जस्त्रामाह गर्गः॥ राम ८०

शुक्रो गुरुः प्रागपरात्र बालो विंध्ये दशार्वं तिषु सापरात्रं॥ वंगेषु हूतेषु च षट्च पंच शेषेषु देशे त्रिदिनं वदंति॥ वृद्ध
त्वमप्येतदमाराधेप॥ एवं वक्रातीचारसिंहराशिगतो गुरुरस्तंगतं वच्चे भक मस्तु वर्जयेन्नतु क्रमलग्नेन॥ नीचस्थे
वक्रसंस्थे प्यवरगते बालवृद्धास्तगे वा संन्यासो देवयात्रा व्रतनियमविधिः कर्णवेधोपि दीक्षा॥ मौंजीबंधोथ चू
डापरिणायनविधिर्वास्तु देवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात् त्रिदशपतिगुरौ सिंहराशिस्थिते चेति॥ नीचस्थो मकरस्थः॥
विशेषमाह मांडव्यः॥ जातविधन्नातकान्नप्राशनचूडादिकं सर्वं विभवनस्थेजीविका पंचत्यो विवाहस्त्विति॥ तथा॥ रवि
ते त्रिगते जीववत्से त्रिगते रवौ॥ वर्जयेत्सर्वकर्माणि व्रतस्थस्यपनानि वा॥ तथा॥ गुर्वादित्ये गुरोः सिंहस्थे रेवास्तमुपागते॥ त्यजे
द्दानं महादानं व्रतं देवविलोकनं॥ लल्लः॥ गुरुत्रागतो भानुर्भानुस्त्रगतो गुरुः॥ गुर्वादित्यः स विज्ञेयः सर्वकर्मसु गर्हितः॥
शेसनकः॥ एकराशिगतो सूर्यजीवोस्पातापदापुनः॥ व्रतं च विवाहादि शुभं कर्मात्तिविवर्जितं॥ राजमार्तंडे॥ पात्रां चू
डा विवाहभ्रुति॥ विवरविधिं शंखवस प्रवेशं प्रासादयोनेहर्म्यं सुरवनरभवनारंभ विद्याविधानं॥ मौंजीबंध प्रतिष्ठा
मदीक नकरदाधारतां कुर्वीत पिमतुः॥ सिंहस्थिते ज्यपे गुरुदिनकरयोरेकराशिस्थयोश्च॥ तथा॥ गुर्वादित्ये गुरौ सिंहेन
ष्टे भृगौ मलिम्लुचे॥ पाम्पाधनेह तोसुप्ते सर्वकर्माणि वर्जयेत्॥ सिंहस्थे गुरौ विशेषमाह शतानंदः॥ माघाद्यायं दिमघा
नास्ति सिंहे गुरुरकारतामिति॥ अन्यत्रापि॥ मघार्क्षं परित्यज्य पदास्ति सिंहे गुरुर्भवेत्॥ मदा वेल्कन्यकाङ्क टास्तुम

म.

गांसुप्रिया भवेत्॥ तथा॥ माघी च मघासंयुक्ता मघायां च गुरुर्भवेत्। महामाघस्तदा प्रोक्तो व्रतोद्वाहो विवर्जितः॥ वृद्ध
गार्ग्यः॥ मीने अनुष्ठिते हि वर्ष्णिन्नेस्मृतं तुरंगमे॥ तौरमत्र न कुर्वीत विवाहं गृहकर्म च। तथा॥ वापीकूपतडागयाग
गमनं तोरप्रतिष्ठा व्रतं विद्यामंदिरकार्यविधनमहादानं वनसेवनं तीर्थस्नानविवाहं देवभवनं मंत्रादि देवेज्यां
दूरतो विवर्जयेत् विष्णुः परिहरेद्धसंतगते भागविहति। लल्लोत्र पुनर्विशेषमाह॥ उपनीतं विशेषितं भानुभाग्वारद्धो
द्वेषाक पिलाख्यषष्ठ्यां॥ सुरासुरेज्यास्तमयेवनीचे यात्राविधिः संक्रमतोपि शस्तः॥ गुरुभुक्तास्तमयादि विनिष्टि
द्धकालेग्रहतादिदोषदोषइति लल्लोदाहृतवचनार्थः॥ अतिचारगतो जीवस्तं राशिं न निवर्तेत् पुनः॥ लुप्तः संवत्सरो ज्ञे
यः सर्वधर्मबहिष्कृतः॥ अस्यापवादः॥ वृषभे मेषके कुंभे यद्यतीचारगो गुरुः॥ न तत्र कालदोषः स्यादित्याह गा
लवो मुनिरिति गयायां विषये वायुपुराणे विशेष उक्तः॥ गयायां सर्वकालेषु पिंडं दद्याद्विचक्षणः॥ अधिमासे न
जन्मदिने अस्ते च गुरुशुक्रयोः न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ॥ तथा गोदावर्यां गयायां वश्रीशैले महालय
द्वये॥ सुरासुरगुरुस्तांवमौढ्यदोषो न विद्यते॥ तथा शांतिकर्म प्रकुर्वीत रोगे नैमित्तिके तथा॥ गुरुभार्गवमौढ्यादि
दोषस्तत्र न विद्यते॥ तथा काश्यामपि स्कांदे॥ सदा कृतयुगं चात्र महापर्व सदात्र वै॥ न ग्रहास्तोदयकृतो दोषो विघ्ने
श्वरालये सदा सोम्यायनं तत्र सदा तत्र महोदयः॥ एतानि काशीस्तुतिमात्रपराणीति वृद्धाः॥ मात्स्ये दर्शेप्यहरहः

राम
८१

श्राद्धं दानं च प्रतिवासरं गोभूतिलहिरण्यानां मासेपि स्यान्मलिम्लुचे इति। मदनरत्ने यमः॥ आब्दिकं प्रथमे यस्यात्तत्कु
र्वीत मलिम्लुचे। तत्र दर्शे तु सम्प्राप्ते कुर्वीत पुनराब्दिकं द्वितीयाद्यान्याब्दिकं॥ तत्प्रत्नोपि। वर्षे वर्षे तु यच्छ्राद्धं मातापित्रो
र्मृतेहनि। मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथा॥ यानि मासद्वयेपि कुर्वीतेत्याहीनिवचनात्तिथानि मासिकविष
याणीति मदनरत्ने॥ मलमासमृतानां तु यदि कृत्प्राविंतस्य एव मलमासस्तु प्राग्न्तुस्तत्र तत्रैव प्रत्याब्दिकं कार्यं॥ अ
नुभृतुमासो तदाह माधवीये भृगुः॥ मलमासमृतानां तु यच्छ्राद्धं प्रतिवत्सरं मलमासे तु तत्कार्यं नान्येषां तु कदाचने
ति॥ यत्तु हेमाद्रौ व्यासः॥ मलमासमृतानां तु सौरमानं समाश्रयेत् तासएव दिवसस्तस्य श्राद्धपिंडोदकादिषु इति तद्द्य
न्ताररमेवा॥ त्यमासि तु तत्रैव प्रत्याब्दिकं कार्यं॥ तदाह मदनरत्ने सत्यव्रतः॥ एकस्मिन्नपि दामासः संक्रांतिद्वयसंयु
तः॥ मासद्वयगतं श्राद्धं मलमासे तु शस्यते इति तद्व यस्यासिपेः पूर्वार्द्धं मृतः सेवतिथिः स्यात्पूर्वमाससंस्थिताश्रा
द्धा॥ कृतश्राद्धं चेत्तदा उत्तरमाससंस्थिता श्राद्धा॥ तथा वार्षिकं दीपिका यां तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयार्द्धे तदुत्तरः॥ मासा
विति बुधैश्चिंत्यो मलमासस्य मध्यगाविति॥ अथात्र दानमुक्तं हेमाद्रौ पाद्मे॥ अधिमासे तु संप्राप्ते गुडसर्पिषुता
नि च॥ त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने। अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः॥ उद्दिश्यापूपदानेन पृथ्वी
दानफलं लभेत्॥ त्रयस्त्रिंशदपूपानं कांस्यपात्रे निधाय च समघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत्॥ विष्णु

पीसहस्रांशुः सर्वपापप्रणाशनः। अपूपान्नप्रदानेन मम पापं व्यपोहतु॥ नारायणो जगद्बीजं भास्करप्रतिरूपकः।
व्रतेनानेन पुत्रांश्च संपदं चाभिवर्द्धय॥ यस्य हस्ते गदा चक्रं गरुडो यस्य वाहनं। शंखः करतले यस्य स मे विष्णुः प्रसी
दतु॥ कलाकाष्ठादिरूपेण निमिषघटिकादिना॥ यो वंचयति भूतानि तस्मै कालात्मने नमः। कुरुक्षेत्रमयं देशः कालः
पर्व द्विजो हरिः। पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम॥ मलानां च विशुद्ध्यर्थं पापप्रशमनाय च। पुत्रपौत्राभिवृद्ध्य
र्थं तव दास्यामि भास्कर॥ अस्मिन्मंत्रे त्रयोविंशदपूपकान्। प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः॥
॥इति मलमासनिर्णयः॥ ॥अथ ऋतुनिर्णयः॥ स च षड्विधो मासद्वयात्मकश्चांद्रः सौरश्च॥ वसंतो ग्रीष्मो वर्षाः शर
द्धेमंतः शिशिर इति। स चांद्रो मीनस्थे ऋतुः। तत्र मीनमेषयोर्वसंतो वृषमिथुनयोर्ग्रीष्म इत्यादि। एवं हेमंत शि
शिरयोरेकीकरणं विवक्षितं। तेन वसंतोपक्रमाः षडृतवो भवंति... ॥मासद्वयात्मकत्वं चा
...
...
सद्वयात्मकत्वमिति चेत् न। अधिमासस्य षष्टिदिनात्मकमासाव...। ...वसंतः। ...
रोऽप्युक्तो रत्नमालायां। मृगादिराशिद्वयभानुभोगात् षडृतवः स्युः शिशिरो वसंतः। ग्रीष्मश्च वर्षाश्च शरच्च तद्वद्धेमंत

नामा कथितो ऽत्र षष्ठ इति॥ इत्यृतुनिर्णयः॥ ॥अथायनं॥ ॥ तच्च ऋतुत्रयात्मकं सौरमेव। तदुक्तं दीपिकायां।
सौरर्तुत्रितयं प्रदिष्टमयनं चेति॥ ऋतुत्रयं चायनं स्यादिति मदनरत्ने विष्णुधर्मोक्तेश्च। तद्द्विविधमुत्तरं दक्षि
णं च। तत्र शिशिराद्युत्तरं वर्षादि दक्षिणं॥ तदुक्तं रत्नमालायां। शिशिरपूर्वमृतुत्रयमुत्तरं ह्ययनमाहुरहश्च
तदामरं॥ भवति दक्षिणमन्यदृतुत्रयं निगदितं रजनी मरुतां च सेति॥ तस्मादादित्यः षण्मासान्दक्षि
णेनैति षडुत्तरेणेति॥ अनयोरृतुत्रयं निगदितं रजनी सतां मरुतां च सेति॥ तस्मादादित्यः षण्मासा
न्दक्षिणेनैति षडुत्तरेणेति॥ अनयोः... भोग...॥ उदगयन आपूर्यमाणपक्षस्य पुण्याहे...
...सत्यव्रतोऽपि देवतारामवाप्यादिप्रतिष्ठादि...॥ दक्षिणाशामुखे कुर्वन्नत
...नाप्नुयादिति॥ वैखानससंहितायां। मातृभैरववाराहनारसिंहत्रिविक्रमाः॥ महिषासुरहंत्री च स्थाप्या
वै दक्षिणायने। इति॥ मदनरत्ने ज्योतिःशास्त्रेऽपि... प्रतिष्ठा विवाहो लव तबंधपूर्वं। सौम्यायने
...॥ इत्ययननिर्णयः॥ ॥अथ संवत्सरः॥ ॥स च वेदा सत्रैविध्या
...॥ अत एव ब्रह्मसिद्धांते॥ चांद्रसावनसौराख्यामासानां तु प्रभेदतः॥ चांद्रसावनसौराः स्युस्त्रयः
त्रिविध इति हेमाद्रिः॥ अत एव ब्रह्मसिद्धांते॥ चांद्रसावनसौराणां मासानां तु प्रभेदतः॥ चांद्रसावनसौराः स्युस्त्रयः
संवत्सरा अपीति॥ तत्र चांद्रसंवत्सरश्चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शांतः। सौरस्तु द्वादशराशिभोगेन। सावनः ष

षुत्तरशतत्रयाहोरात्रात्मकः॥ आद्यउक्तो ब्रह्मपुराणे॥ चैत्रेमासिजगद्ब्रह्मा ससर्जप्रथमेहनि॥ शुक्लपक्षेसमग्रं तु तदा
स॰ सूर्योदयेसतीति॥ आ॰ दि॰ विवेतोपि॥ संसारेत्सवचक्रकमदिवौद्वंसंवत्सरंसदा॥ नान्यंयस्माद्वत्सरादौप्रवृत्तिस्तस्पर्कीर्त्तिति
त्ति॥ इमंवारंमसमासीकमंगिस्मरत्तएवोपपुज्येतेवत्सुतत्सु॥ मासांतरस्थतिथ्यंतरमारभ्यवर्षांतरस्थतत्पूर्वभाविति
ष्यंतोपिवत्सरखांद्रएव॥ चंद्रकत्वात्पतिथिघटितत्वात्॥ अनसनपिमेदानाहनारदः॥ प्रभवोविभवःशुक्लःप्रमोदो
थप्रजापतिः॥ अंगिराश्रीमुखोभावोयुवाधाततथैवच॥ ईश्वरोबहुधान्यप्रमाथीविक्रमोवृषा॥ चित्रभानुःसुभा
नुश्चतारणः पार्थिवोव्ययः॥ सर्वजित्सर्वधारीचविरोधीविकृतःखरः॥ नंदनोविजयश्चैवजयोमन्मथदुर्मुखौ॥ हे
मलंबोविलंबोथविकारीशार्वरीप्लवः॥ शुभकृच्छोभनःक्रोधीविश्वावसुपराभवौ॥ प्लवंगःकीलकःसौम्यःसाधा
रणोविरोधकृत॥ परिधावीप्रमादीचआनंदोराक्षसोनलः॥ पिंगलःकालयुक्तश्चसिद्धार्थीरौद्रदुर्मती॥ दुंदुभीरु
धिरोद्गारीरक्ताक्षीक्रोधनःक्षयइति एताश्चसंज्ञाश्चयद्यपिज्योतिःशास्त्रेबार्हस्पत्यस्यैवोक्तास्तथापिचांद्राणां
प्रभवादीनामितिचांद्रस्यैवप्रभवादिनामभिर्व्यवहारात्॥ विष्णुघ्नावातद्वमासप्पत्तादिवत्प्रभवादिश्चांद्रःसंवत्स
रापिसंकल्पादौसंकीर्त्यः॥ ज्योतिःशास्त्रेतुबार्हस्पत्यमानात्रापिवत्सरावुक्तौ॥ तत्रबृहस्पतेर्मध्यममानेनैकरा
शिभोगोबार्हस्पत्यःसप्तविंशतिनक्षत्रपरिवृत्याएकोमासः तैर्द्वादशभिर्वत्सरः॥ अनयोस्तुधर्मशास्त्रेतानकोपु राम
८३

प्रयोगः॥ ॥इतिसंवत्सरनिर्णयः॥ ॥अथजन्मतिथिकृत्यं॥ तन्मलमासेनकर्तव्यं॥ चांद्रमसीयत्वेनसावकाशत्वा
त॥ ब्रह्मपुराणे॥ सर्वैश्चजन्मदिवसेस्नातैर्मंगलपाणिभिः॥ गुरुदेवाग्निविप्राश्चपूजनीयाःप्रयत्नतः॥ स्वनक्षत्रंचपित
रस्तथादेवःप्रजापतिः॥ प्रतिसंवत्सरंचैवकर्तव्यश्चमहोत्सवः॥ स्नातैस्तिलस्नातैः॥ तथाच॥ तत्रतिथिमधिकृत्यतिल
स्नायीतिलोद्वर्तीतिलहोमीतिलप्रदः॥ तिलभुक्तिलवापीचयदृतीनावसीदतीति॥ मंगलपाणिभिः॥ अभिप्रेता
र्थसिद्धिहेतुतयागोरोचनादिकंमंगलं॥ तत्पाणिभिरित्यर्थः॥ तथाचकल्पचिंतामणौ॥ गुडदुग्धतिलान्नघातुज
न्मग्रंथिश्चबंधनं॥ गुग्गुलुंनिंबसिद्धार्थपूर्वंगोरोचनापुनः॥ संपूज्यभानुर्दिग्व्योमहाविप्रांपयेद्दिदं॥ चिरंजीवी
यथात्वंभोभविष्यामितथामुने॥ रूपवान्वित्तवांश्चैवश्रियायुक्तश्चसर्वदा॥ मार्कंडेयमहाभागसप्तकल्पांतजी
वना॥ आयुरिष्टार्थसिद्ध्यर्थंअस्माकंवरदोभव॥ सुनक्षत्रंजन्मकालीनं॥ नामकरत्तोतथादर्शनातातथाश्रीप
तिरत्नमालाजा॥ नववस्त्रधरोभूत्वापूजयेच्चिरजीविनं॥ द्विभुजंजटिलंसौम्यंसुवृद्धंचिरजीविनं॥ मार्कंडेयंनरो
त्तमः॥ व्यासंरामंद्रौणिंकृपंबलिंप्रह्लादंहनूमंतंविभीषणंमध्यार्चयेत्॥
भक्त्यापूजयेत्तथाततोदीर्घायुःषंव्यासंरामंद्रौणिंकृपंबलिंप्रह्लादं॥ ततस्तिलहोमःप्रतितद्देवतानाममंत्रैः
षष्ठीं चदधिभक्तेनवर्षेपुनःपुनः॥ रामःपरशुरामः॥ द्रौणिरश्वत्थामा॥ ततस्तिलहोमःप्रतितद्देवतानाममंत्रैः॥ अथवा विंशतिरष्टौवायथाशक्तिविधी
स्वाहांतैःकार्यः॥ दिवीप्रातः॥ होमोग्रहादिपूजापायसातमष्टोत्तरंभवेत्॥

स॰

यते। ततो गुडं दुग्धतिलपानं। तत्र मंत्रः। सतिलं गुडसंमिश्रं मंजल्यर्द्धमितं पयः। मार्कंडेयवरं लब्ध्वा पिबाम्यायु
र्वृद्धिहेतवे इति। स्कांदे। खंडनं नखकेशानां मैथुनाध्वानमेव च। आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत्। कलहमित्य
त्र संगरमिति क्वचित्पाठः। वृद्धमनुः। मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवा
रिणा। ज्योतिर्निबंधे। स्नात्वा जन्मदिने त्रिपंचपरिहरन्प्राप्नोत्यभीष्टं प्रियं मत्स्यान्नो वपतो हि नापद्दतो प्प ६ ष छिरंव
र्द्धनिर्मलकुनवा इति पश्चात्स्परि पत्नीनाशं प्रपांतिधि कवंभुंक्ते पथ्य निरामिषं सहिमवे जन्मांतरे पंडितः। जन्मति
थिः स्कांदे देवीपुराणे। यस्य द्वेपे जन्मतिथिर्यदा स्यात्पूज्या तदा जन्मभसंयुता च। असंस्कृता मे नदिनद्वये पि पू
र्वापरा या भवती हतंत्रं। उभयदिने जन्मनक्षत्रालाभे तु पूर्वाह्णव्यापिनी ग्राह्या। तस्य कर्मकालत्वात्। ॥ अथ केषु
चित् दर्शिषु वर्ज्यतिथयः। सिंहादित्ये भुक्लपक्षे चतुर्थ्यां चंद्रदर्शनं॥ ॥ मिथ्याभिदूषितं कुर्यात्तस्मात्पश्येन्न तं
सदेति। सप्तम्यां न स्पृशेत्तैलं नीलवस्त्रं न धारयेत्। न वाप्यामलकैः स्नायान्न कुर्यात्कलहं क्वचित्॥ निंबस्य भक्षणात्
तैलं निर्लेपं तामं जनं॥ सप्तम्यां निवकुर्वीत ताम्रपात्रे च भोजनं॥ स्कांदे। शिरः कपालमंत्राणि नाखचर्म तिल
तथा एतानि कैकमशो नित्यं अष्टम्यादिषु वर्जयेदिति। शिरो नालिकेरं। कपालमलाबु। अंत्राणि पटोलं। रामनखं निष्पावः। चर्म मसूरिकाः। तिलाः वंताकमिति हेमाद्रौ। चतुर्विंशतिमिते तु। यदी छेदूर्ध्वगमनं मष्टम्यादि

८४

षु वर्जयेदित्युत्तरार्द्धं पठंति। व्यासः। षष्ठ्यष्टमी अमावास्या पक्षद्वये चतुर्दशी॥ अत्र संनिहितं पापं तैले मांसे
क्षुरे भगे इति वामनपुराणे॥ नंदासु नाभ्यंगमुपाचरेत्तु क्षौरं च रिक्तासु जयासु मांसं॥ पूर्णासु योषित्परिवर्जनीया
भद्रासु सर्वाणि समारभेत॥ स्मृ। त्यां पंचदश्यां चतुर्दश्यामष्टम्यां वासरे। वस्त्रं निष्पीड्य तैलेन वा ..रेत्पिन
दिंस्यते। वस्त्रनिष्पीडनं पत्रपर्णाने तस्याप्य निषेधः॥ स्मृ। तैल न संस्पृशेदार्सं चंद्रवत्यादीन्... येन वा। प
वर्णादो वर्षे षष्ठ्यां द्विरिक्तायां च हरेत्तिथौ॥ आमेनीलतन्तां॥ वामनपुराणे॥ नाभ्यंगमर्के नवभूमिपुत्रे क्षौरं चकु
क्रे च कुजे च मांसं बुधे च योषां न समाचरेत्तु शेषेषु सर्वाणि सदैव कुर्यात्॥ चित्रासु हस्ते श्रवणे च तैलं क्षौरं वि
शाखा प्रतिपत्सु वर्ज्यं॥ मूले मृगे भाद्रपदासु मांसं योषिन्मघाकृत्तिकयोत्तरासु इति॥ वा... चतुर्दश्यां तथा ष
ष्ट्यां पंचदश्यां च पर्वसु तैलाभ्यंगं तथा भोगं यो वितन्वि विवर्जयेत्॥ नमः छ गोमयं या पिना... शायात्तु गोमयं नो
मन्त्रवत्प्रदोषे च गन्तव्यं बुद्धिमान्नरः॥ संध्यावर्ज्यो न्याहमन्ये॥ ब्रह्मचारी मानिकर्माणि संध्यापां परिवर्जयेत्॥
श्रीहत्याज्ञाप तेव्याधिगर्भे द्वितीयश्च मैथुनात्॥ निद्रातो जायते लक्ष्मीः स्वाध्यायादायुषः क्षयः इति॥ ॥ इतिका
लविशेषवर्ज्यानि॥ ॥ अथ क्षौरे निषिद्धकालः॥ ॥ पंचदश्यां चतुर्दश्यामष्टम्यां रविशारदा। तैलं मांसं च धायं च
क्षुरं च परिवर्जयेदिति यमः॥ तथा सितासितष्टमीषु भूताहे तु जपे तथा॥ तैलाभ्यंगं क्षौरकर्म स्त्रीसंगं चैव च

स. र्जयेत्॥ व्यासः॥ सौरे शनैश्चरादित्ये भौमाहोरात्रमेव वा तथा प्रतिपदं रिक्तां तिथिं च परिवर्जयेत्॥ अहोरात्रग्रहणं
नवारदोषाः प्रभवंति रात्राविति वचनबाधार्थं हिमाद्रौ ज्योतिःशास्त्रे। नाभ्यक्तमुक्तरताकालनिरासनानां नस्नात
सुभगमनांशुकभूषिता॥ नासंध्यानिशानिकुजसौरदिनेश्वराणां सौरं हितं भवति वाह्निनवा पिविष्यां॥ अह्नी
ति अहोरात्रोपलक्षणं॥ मार्कंडेयः॥ अष्टमीं च तथा षष्ठीं नवमीं च चतुर्दशीं। क्षुरकर्म त्ति वर्ज्या च पर्वसंधिस्तथैव
व॥ वृद्धगार्ग्यः॥ मीने धनुषि सिंहे च वर्षिते सप्ततुरंगमे॥ सौरमत्रं न कर्त्तव्यं विवाहं गृहकर्म चेति॥ श्मश्रुकर्म त्रिम
रीचिः॥ निरासनस्य सुप्तस्य तिष्ठतश्च तथैव वा सायं भुक्तवतश्चैव स्नातस्य हृषितस्य वा यात्रायुद्धोद्यतस्यापि श्म
श्रुकर्म विवर्जयेत्॥ ॥अथ मांसनिषिद्धकालः हेमाद्रौ नंदिपुराणे। यदि नाम चतुर्दश्यां स मांसं विवर्जयेत् व
र्जयेद्यनेमुख्यकतत्स्वर्गमतिनरः। चतुर्थीं चाष्टमीं चैव द्वादशीं च चतुर्दशीं तथा पंचदशीं वा षष्ठीं तिमुखा नि
वा संक्रमे वापि सूर्यस्य विषुवे वापि वार्षिके। मांसात्तु विरतो मर्त्यो यातिस्वर्गं दिनत्रयमिति। संक्रमादयनविषुव
तोऽत्र हुहर्तां दोषातिशयार्थं॥ वार्षिके॥ वर्षाकालसंबंधि मास चतुष्टये। दिनत्रयमपि वा षिके विरतरतिसंबं
धः॥ अथवा श्वयुजं मासं वर्जयेन्मांसभक्षणं॥ चतुर्मासकृतं पुण्यं फलमेतान्न पुराणाः॥ अन्यत्र मासत्रयपर्य
मांसत्यागे यत्फलं तत्प्राप्नोति तपः। यो नरः कार्त्तिकमासे मांसं तु परिवर्जयेत्॥ संवत्सरस्य लभते पुण्यं मांस विव राम ८५

र्जनादि॥ ॥अथ कलिवर्ज्यानि॥ आदित्यपुराणे भयस्तु कार्त्तयुगो धर्मो न कर्तव्यः कलौ युगे॥ पापप्रयुक्ताः खलु स
दा कलौ नार्यो नरास्तदेति॥ कार्त्तयुगः कृतयुगसंबंधी हिमाद्रौ माधवीये॥ विधवायां प्रजोत्पत्तौ देवरस्य नियोजनं।
बालिका क्षतयोन्याश्च वरेणान्येन संस्कृतिः॥ विधवायां वाग्दानानंतरं देवरस्य नियोजनं यस्याम्रियेत कन्या
या वा वा सत्ये कृते पतिः॥ तामनेन विधानेन निजो विंदेत देवरः॥ अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया॥ सपिंडो
वा सगोत्रो वा ताभ्यक्ता क्रतावियादिति मनुयाज्ञवल्क्याभ्यामुक्तं निषिध्यते॥ ननु विवाहानंतरं विधवायां ना
न्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिरिति मनुनांते निषिधात्॥ क्षतयोन्या न संस्कृतिरिति तेन देवरनियोजन
परं पूर्वंततपोनक्तमाता बालिकासंकल्पदत्ता मवाग्दत्ता। तदानीं क्षतयोनित्वशंका या अभावात्। इदं च वि
ज्ञानेश्वरेणादत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेदित्यनेन सप्तपद्युक्रमणात्प्राग्पदन्ये सैदानमुक्तं तद्विषय
मिति ध्येयं। तथा कन्यानामसवर्णानां विवाहश्च द्विजातिभिः। तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं।
ब्राह्मणात्क्षत्रियविड्शूद्रा भार्याः स्वाः शूद्रजन्मनः इति विवाहितः। तथा। आततायिद्विजाग्र्याणां धर्मयुद्धे न हिंस
नमिति द्विजाग्र्याणां विप्राणां। आततायिनमायांतं हन्यादेवाविचारयन् इति विहितं सनुस्वमकूटशस्त्रेण
मारणं एतेन नाततायि वधे दोषोन्यत्र गोब्राह्मणेभ्य इति सुमंतुवाक्यं कलिविषयमेवेति सिद्धं। तथा। द्वि

स· ज्ञस्याशौचानुनोपात्तुः शोधितस्यापि संग्रहः ॥ सत्रदीक्षा च सर्वेषां कमंडलुविधारणमिति ॥ सत्रदीक्षानिषेधमु-
क्त्वेनसत्राधिकार एव विप्राणां पर्युदस्यते ॥ अथ कमंडलुचर्यामुपदिशंतीत्यादि बौधायनेतिकर्तव्यताकसोद-
कं वकमंडलुमितिस्नातकस्य विहितं मन्मयस्य काष्ठकमंडलोर्धारणं ॥ अन्ये तु कमंडलुधारणमित्यनेन वान-
प्रस्थाश्रम एव लक्ष्यत इति । तन्न । बृहन्नारदीये तु भयोरपि भिन्नत्वेनोपादानात् । तथा महाप्रस्थानगमनं गोसं-
ज्ञप्तिश्च गोसवे । इति । महाप्रस्थानगमनं । उत्तरदिग्गमनं । गोसवो यज्ञविशेषः । तथा सौत्रामण्यामपि सुराग्रहः ॥
स्यव संग्रह इति । अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः ॥ लेहः निष्कृष्यास्वादनं ॥ कथं विलीढायाः परिग्रहः ॥
पुनर्होमसाधनत्वं । तथा वानप्रस्थाश्रमस्यापि प्रवेशो विधिबोधितः । वृत्तस्वाध्यायसापेक्षमघसंकोचनं
तथेति । व्रतमपि परिवर्षादि विद्याग्निपुक्तविप्रस्य त्र्यहमाशौचमिष्यत इति देवलवचनाविहितं ॥ तथा प्राय-
श्चित्तविधानं विप्राणां मरणांतिकमिति । कामकृते महापापादौ न तस्य निष्कृतिर्दृष्टा मृग्वाग्निपतनादिते
॥ इति विहितस्य विधानादुपदेशः । एवं मतिपूर्वमनिर्देश्यप्राणांतिकमिति स्थितिरितिमनुवाक्यमप्येत-
द्युगविषयमेव । एकमूलकल्पनालाघवात् ॥ संसर्गदोषः स्तेयान्यमहापातकिनिष्कृतिरित्यत्र जे हि शंकृत-
युगे त्रेतायां ग्राममुत्सृजेत् । द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे इति पराशरवचनेन संलापादिनव विधसं- राम ८६

सर्गाभावेपि विहितस्य देशादित्यागस्य निषेधः पद्मा । कृते संभाष्य पतति त्रेतायां स्पर्शनेन तु । द्वापरे त्वन्नमादाय क-
लौ कर्मैव लिप्यत इति वचनेन संभाषणस्पर्शनादिजन्यपातित्यस्यैव निषेधः ॥ ननु पतितेन सह संवत्सरं न व विध्व-
संसर्गे प्राप्तस्य पातित्यस्य । पूर्वोक्तवचनद्वयबाधमात्रे तात्पर्यतार्थस्य न व विध्वसंसर्गनिषेधप्रतिपादकानेकवा-
क्यबाधस्यान्याय्यत्वात् । कलौ पतति कर्मणेति वाक्यस्वारस्येन पतितसंसर्गरूपकर्मजन्यस्य पातित्यस्य तु निवा-
रत्वाच्च । अत एवेदानींतनानां संसर्गप्रायश्चित्तानुष्ठानाचारः स्वाचार एव ॥ स्तेयान्यमहापातकेषु निष्कृतिः रहस्यप्रा-
यश्चित्तं निषिध्यते । अत्र केचित् स्तेयान्यमहापातकिप्रायश्चित्तमेव कलौ ॥ न भवतीत्याहुः ॥ तन्न । पराशरस्मृ-
तौ महापातकिनामपि प्रत्येकं प्रायश्चित्तविधानात् कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः । द्वापरे शां-
खलिखिताः कलौ पाराशराः स्मृता इत्यनेन अन्यस्मृतिविरोधे विकल्पप्रसक्तौ स्मृत्यन्तरीयविशेषशास्त्राणां बा-
धप्रसक्तौ पराशराः स्मृता इत्यनेन अन्यस्मृतिविरोधे विकल्पाप्रसक्तौ स्मृत्यन्तरीयविशेषशास्त्राणां बाधप्रस-
क्तौ पराशरस्मृतेः कलौ बलीयस्त्वनियमेन स्तेयान्येत्यस्याबाधात् । न च बाधे विषयान्तरासंभवाद्ग्रामस्यापाप-
तिः । औदुंबरीस्पर्शोऽपि दितिकृत्याबाधितायाः औदुंबरीसर्वावेष्टयितव्येतिस्मृतेर्दृष्टांतपंक्तौ निर्मुक्तास-
र्वावेष्टयितव्येतिन्यायसुधाकारीकृतात्पर्यकल्पनवदिहापि स्तेयान्यमहापातकनिष्कृतिर्नोपदेश्या । कृताया

स॰

प्यपि निषिध्यते। संसर्गेण निकायदृइति तात्पर्यकल्पनात। वस्तुतस्तु मनुवाक्ये नोपदेशनिषेधस्यासिद्धत्वात् ब्राह्मणानां भोजना
दिविधिविरोधात् रहस्यप्रायश्चित्तं निषिध्यते न भवतीति कल्प्यं। अत एव तत्र तत्र रहस्यप्रायश्चित्तं निंदितं। तस्मात् क्व
शक्रेत्यापमित्यादि वीक्षानवेवं च पापपुदासोसंगतः॥ तस्य कलावनयासेनस्तीयनि व्यत्यात्तिनिमित्तमुपदेश
स भवेन रहस्यप्रायश्चित्तं सम्यनुत्तानार्थत्वात। तथा वरातिथिपितृम्यश्च पशूपाकरणक्रियेति वरस्य प्राजापत्ये
तिथ्योग्राविश्वानरा इति याग विधिः। वार्ध्रीणस्य मांसेन तृप्ति द्वादश वार्षिकी। पादिवचनकदंबकेनात्र वपिप्राप्ति
अत्र आक्षेपमुपयागाभावेन तद्धमानि तिदिष्टा उपाकरणप्राप्ति अभूपाकरणशब्दलक्षितं तंतत्र कृति कं पितृम्योमां
सतानं निषिध्यते। तथा च श्राद्धे मांसमित्यनेन कमूलत्वान्न कल्पनागौरवं। तथा दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः॥
सवर्णान्याङ्गनादुष्टेः संसर्गः शोधितेरपि॥ सवर्णान्याः असवर्णायाश्च अंगनायाः पितुर्दुष्टि स्त्रीसंपर्कः कृतप्रायश्चित्तैरपि
पिसंसर्गः॥ इदं चोत्तमवर्णाभिर्षपमेवेति युक्तमुत्पश्यामः॥ तथा अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः॥ इति॥
दत्तस्त्तु परित्याज्यापाशिष्यगा गुरुगावपा॥ पतिश्चीव विशेषेता नुतितोपगताविचेतिपादिना विहितः। अनेन पुगात
रे अयोनौ संसर्गे परित्यागद् तिगम्यते॥ तथापरोहे शतमस्याः कडुछि द्वस्यापि वर्जनीयं गवाचे ब्राह्मणतो जैवास घस्रा
णान्परित्यजेदितिविहितः स्वमुत्छिष्टमुत्छिष्टोपहृतं वेति वर्जितमाधुकं तन्निमित्तं प्रायश्चित्तं वेतिकेचित॥ विश्वाणानं राम ८१

वितरणास्यपर्शनं प्रतिपादनं प्रादेशनं निर्वपणमपवर्जनमंहति रितित्रिकंदीस्मरणाद पवर्जनं स्नानं ब्राह्मणस्योदगुरी
धं प्रयच्छेदित्यादिनाधुपकादिविहितमितिभ्रात वरणा॥ प्रतिमाम्यश्वनाद्यपितं कल्पयेत्स धर्मकृ॥ इयमेव प्रति
मा यावज्जीवं मया पूजनीयेत्यादिकः। अशुचिसेवयनादू धर्मं गस्पर्शनमेव च। शामित्रं चैव विप्राणां सोमविक्रयणं
तथा॥ शामित्रं पशुत्वे यमिवपशुमारणं॥ चद्रूक्षानयुनेनान्नहरणं हीनकर्मताः॥ चद्रूक्षानशनं उपवासत्रयं॥ मु
वृत्ति तद्धाहं स्त्रीत्वा धान्यमब्राह्मणात् ॥ धरेत इतिविहितं॥ शूद्रेषु दासगोपालकुलमित्रार्धसीरिणां॥ भोज्यान्नता
गृहस्थस्य तीर्थयात्रातिदूरतः॥ गृहस्थस्या हितामेरिति केचित॥ तथा॥ शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीर॥ ता॥ गुरु
वदाने पुन्यास्वसवर्णा गुरुयोषितं रतिमनूक्ता॥ तथा॥ आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा॥ त्रात्रे णाकमरणा
नीजे द्विशांवाप्यापदिद्विजर त्रिप्याहिको श्वस्तनोपि वेतिऊक्ता॥ तथा॥ प्रजार्थं तु द्विजाग्र्याणां प्रातारतिपरिग्रहः॥
ब्राह्मणानां प्रवासित्वं मुखाग्नि धमनक्रिया॥ प्रवासशीलत्वं॥ वथा तुनचिरं वसेदितिस्मरणादिति केचित तथा
॥ बलात्कारादिदुष्टस्त्री संग्रहविधिचोदितः॥ यतिश्च सर्ववर्णेषु भिक्षुवर्या विधानतः॥ नवोदके दशाहं च दक्षिणा
विधिचोदिते॥ दशरात्रे तामुद्धंतिम्न मिष्ठं वनवोदकमिति स्मृतं॥ गुरवे तु वरं दत्वा स्नानं प्रीतितदनुज्ञयेति विहि
तं दक्षिणादानं तथा॥ ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च॥ आपद्यधिष्ठिता ग्रस्तः संस्कारस्पृशितपा

स. पत्नीव विहिता ॥ तथा ॥ भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ॥ अत्र मूलं ॥ वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभि
षक्क्रियः ॥ इत्यादि विज्ञानेश्वरग्रंथाद्दृष्टव्यं ॥ गोतृप्तिशिष्टेपपशिष्टेरवमनक्रिया ॥ पितापुत्रविरोधेषु साक्षि
णां दंडकल्पनं ॥ सांशिताणां समाधानतत्वा ॥ पितापुत्रविरोधेनुसाक्षिणां ॥ ६ द्विगुणोदम ॥ अंतरेव तथा ॥ यं:सवा
त्मस्यापदः पुत्रोत्तमहरणं विहितं ॥ यत्र सायंगृहत्वेवमुनिभिस्तत्वतत्परैः ॥ यत्रसायंकालो जानंस्तत्रैवसंन्यासि
नामवस्थानं ॥ एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ॥ निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः ॥ समयश्चापि सा
धूनां प्रमाणं वेदवद्भवेत् ॥ ब्रह्मपुराणे ॥ दीर्घकालं ब्रह्मचर्यं धारणं च कमंडलोः ॥ गोत्रान्मातृसपिंडाद्वा विवा
हो गोवधस्तथा ॥ नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिः ॥ दीर्घकालमिति कालपदोपादानबलादष्टाचत्वारि
शद्वर्षाणि वेदब्रह्मचर्यं इति फलितं ॥ अन्यथादीर्घब्रह्मचर्यमित्येवावक्ष्यत् ॥ एतेन ब्रह्मचर्यं तं नैष्ठिकमिति रा
मचंद्राचार्योक्तिः परास्ता ॥ अत एव द्राविडानां नैष्ठिकब्रह्मचर्यविचारः संगच्छते ॥ कमंडलुधारणं च स्पष्टं ॥ गोत्रात्
इत्यनेन स्वगोत्रोत्पन्नायाः पितृष्वसुः ॥ मातृसपिंडादित्यनेन मातुलगोत्रस्य पिंड्ययोः सामान्यनिषेधेनैव प्राप्त
भावान्मातुलकन्यापरिणयनं च निषिध्यते ॥ तेन मातुलकन्यापरिणयननिषेधकानि वाक्यानि कलिविषयाणि प
वा ॥ अत एवाधुनिकानां तदाचारोप्यनाचार एव ॥ कृष्णार्जुनादीनां तु युगांतरीयत्वात्सदाचार एव ॥ अत एव व्यासे राम

८८

न कलिनिंदाप्रक्रमे ॥ तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ॥ भुक्त्वैनवोद्वहिष्यंति विप्राः पापविमोहिताः इत्य
लं ॥ बोधायनेन च मातुलपितृष्वसृदुहितृगमनमिति दाक्षिणात्यानामाचारेषु गणितं ॥ गोवधो मधुपर्कादौ ॥ नरमेध
ब्रह्महत्तो ब्राह्मणामात्यमतहत्यादि मद्यं गौडीमाध्व्यादि रूपं क्षत्रियवैश्ययोर्निषिध्यते ॥ तस्माद्ब्राह्मणपरानर्थो देवव
श्चनसुरांपिबेदित्यनेन सुरापाद्विजान्यवच्छेदेन निषेधस्यासिद्धत्वात् ॥ यद्वा वामागमादौ तन्त्रे वाणिक पुरस्कारेण
विनायकशांत्यादौ तन्त्रियादि पुरस्कारेणोक्तं च निषिध्यते ॥ क्रतुः ॥ देवरान्नसुतोत्पत्तिर्दत्ता कन्या न दीयते ॥ न यज्ञे गोवधः
कार्यः कलौ न च कमंडलुः ॥ विधवायां प्रजोत्पत्ताविव्यनेन समानार्थकं पूर्वार्धं ॥ आदित्यपुराणे ॥ ऊढायाः पुनरुद्वाहं
ज्येष्ठांशं गोवधं तथा ॥ कलौ पंच न कुर्वीत भ्रातृजायां कमंडलुं ॥ ज्येष्ठांशं विषमविभागं ॥ भ्रातृजायां जाया मितिशेषः ॥ बृह
न्हेमाद्रौ गरुडपुराणे ॥ न कलौ क्रियते चाश्वमेधो वाप्यथ गोसवः ॥ नरमेधोऽथ नानारीदेवरात्पुत्रसंततिः ॥ यद्वि
तं सप्रकंत्येतद्वानस्थ कमंडलू ॥ श्राद्धदीपकलिकायां मदनपारिजाते च निगमः ॥ अन्नतां गोपशुश्चैव श्राद्धे मांसं त
थामधु ॥ देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेत् ॥ यथा वेदविहितमपि तां प्रधानसंबंधिमात्रं शोधि विधि जन्तुता
दृष्टादृष्टप्रमाणाभावान्न तद्वत् ॥ श्राद्धे मांसमित्यत्र श्राद्धसंबंधिकत्वर्थपुरुषार्थं च निषिध्यते ॥ अविशे
त ॥ पंचेत्यत्र न परिसंख्या दोषत्रयापत्तेः ॥ पूर्वोक्तानेकवाक्यानर्थक्यापत्तेश्च ॥ अतः प्रदर्शनमात्रार्थं एतत् तावपो

स॰ न्नत्वोपाधिनावपं वत्वोपपत्तिः॥ आदित्यपुराणे [illegible] शकुनाः प्रश्नाः सामुद्रिकमुपश्रुतिः [illegible] दितं [illegible] सं
वर्तिकाविक्रलो। तस्मा [illegible] न्नत्वा भेनकलौकार्यनकारये त। विष्णुभ्वरपद्ध [illegible] कार्यः॥ वबार्यं [illegible] दराह [illegible]
शतानिवाक लेर्यदाग [illegible] ति तिन दत्तिनापरिग्रहः॥ संन्यासश्च नकर्त्तव्योदाहतोन विजानतेति॥ अनन्ने [illegible] रेहि [illegible]
तिवन्नासर्वा धानमेवनिषिध्यते। अत एव तोगा [illegible] तिः॥ अन्नर्दा धानं स, तं श्रौतं समानं ग्नौ सद्य [illegible] कृतिः [illegible]
[illegible] कृतिः पूर्वयुगाश्रितेति॥ युगस्यपूर्वं पूर्वयुगं कलेः पूर्वभाग इति अर्थः॥ अन्न द्धि [illegible] दिदि [illegible]
[illegible] अत एव दे वनः॥ यावद्वर्णविभागो स्ति यावद्वेद प्रवर्तते संन्यासं चाग्नि [illegible] तावत्कुर्यात्कलौ युग [illegible]
न्यास [illegible] त्यादिशास्त्रं तावदवधिकत्वं वासिनो क्तं नथा पिगो [illegible] काले नेनसमर्थत इति के चित्॥ [illegible]
प्राये [illegible] वदे [illegible] परे। सामान्यतो निषिद्धस्य व्यासवाक्येनोपसंहार इत्यन्ये॥ [illegible] यपीत्पादी [illegible]
निमहा [illegible] प्रून्यश्यंते॥ एतिकलिवर्ज्यनिर्णयः॥ ॥ इतिश्रीमीमांस [illegible] भहा [illegible]
निभास्करा ख्ये निबंधे समयपूर्वः समाप्तिमगमत॥ ॥ श्रीरस्तु शुभं भूयात्॥ [illegible]

राम
८९